Tanjore Sarasvati Mahal Series – No. 350.

॥ श्रीः ॥

॥ वेदसारसहस्रम् ॥

पद्मपुराणान्तर्गत

॥ शिवसहस्रनामस्तोत्रम् ॥

Vedasarasahasram

(PADMAPURANA)

TANJORE MAHARAJA SERFOJI'S
SARASVATI MAHAL LIBRARY, THANJAVUR.

1993] [Price : Rs. 80-00

Tanjore Sarasvati Mahal Series - No. 350.

SRI:

Vedasarasahasram

(PADMAPURANA)

With Commentary by :

His Holiness **SRI PARAMASIVENDRA SARASWATI,**
of Kanchi Kamakoti Peetham.

Edited by :

Thethiyur. **S. KRISHNAMURTHI SASTRI**
Senior Sanskrit Pandit

AND

Vidwan. **N. SRINIVASAN**
Sanskrit Pandit
Sarasvati Mahal Library, Thanjavur.

Published By

DIRECTOR,
SARASVATI MAHAL LIBRARY, THANJAVUR.

*

1993] **[Price : Rs. 80—00**

Bibliographical Data

Title of the Book	:	Vedasara Sahasram
Editors	:	S. Krishnamurthi Sastri N. Srinivasan
Publisher	:	T. Shanmuga Rajeswaran, I.A.S Director i/c. Sarasvati Mahal Library.
Publication No.	:	350
Language	:	Sanskrit
Edition	:	I Edition
Date of Publication	:	September, 1993.
Paper used	:	14.2 Kg. Seshasayee
Size of the Book	:	21 × 14 cm.
Printing type used	:	16 pt.
Number of Pages	:	488
No. of copies	:	500
Price	:	Rs. 80 (Rupees Eighty)
Printer	:	Sarasvati Mahal Library Press
Binding	:	Half Calico
Subject	:	Philosophy

तञ्जापुरी सरस्वतीमहालयग्रन्थमालायाः पुष्पम् - ३५०.

॥ श्रीः ॥

॥ श्रीगुरुभ्यो नमः ॥

॥ वेदसारसहस्रम् ॥

पद्मपुराणान्तर्गत

॥ शिवसहस्रनामस्तोत्रम् ॥

श्रीकाञ्चीकामकोटिपीठ–भूतपूर्वाधिप

श्रीपरमहंसपरिव्राजकाचार्य श्रीपरमशिवेन्द्रसरस्वतीविरचितव्याख्यासहितम्

सम्पादकौ

तेदियूर् कृष्णमूर्तिशास्त्री

(सरस्वतीमहालय प्रधान संस्कृतपण्डितः)

एन. श्रीनिवासः

(सरस्वतीमहालय संस्कृतपण्डितः)

प्रकाशनम्

तञ्जापुरी शरभोजिमहाराजस्य सरस्वतीमहालयः

तञ्जापुरी ॥

१९९३]

[मूल्यम् रू. ८०-००

प्रथमावृत्तिः — १९९३

प्रकाशिका :

तञ्जपुरी शरभोजिमहाराजस्य सरस्वतीमहाल् ग्रन्थालयस्य कार्यकारिणी समितिः
तञ्जपुरी

तञ्जपुरी
सरस्वतीमहाल् ग्रन्थालयकार्यकारिणीसमितिमुद्राक्षरशालायां मुद्रितम्.

PUBLISHER'S PREFACE

I am very glad that Sarasvati Mahal of Thanjavur is releasing VEDA SARA SAHASRAM of Sri Paramasivendra Sarasvati, the 57th Acharya of Sri Kanchi Kamakoti Peetham during the Centenary year of Sri Paramacharya of Sri Kanchi Kamakoti Peetham, which is a rare coincidence.

The piece of Prayer which is found in PADMA-PURANA in the form of verses, is consisting of one thousand different names of Lord Shiva. The author explains the meaning of all the names with reference to the VEDAS, UPANISHATS, PURANAS etc.

This will be useful to the devotees from all parts of the world who have a good knowledge of Sanskrit.

My thanks are due to Sri. S. Krishnamurti Sastri, the Senior Sanskrit Pandit and Sri. N. Srinivasan, the Sanskrit Pandit of Sarasvati Mahal for their endeavour in releasing this rare work.

My appreciations are due to Sri. A. M. Mohamed Yousuff, the Administrative Officer and Sri. A. Panchanathan, M. A., M. L. I. S. the Publication Manager of Sarasvati Mahal Library in bringing out this rare manuscript.

My thanks are due to the Govt. of India for their liberal grants to bring out the rare manuscripts and the members of the printing press of Sarasvati Mahal for the neat execution.

T. SHANMUGA RAJESWARAN,
I. A. S.
District Collector & Director (i/c)
Sarasvati Mahal Library.

Thanjavur,
27-9-1993.

பதிப்புரை

தஞ்சாவூர் சரசுவதி மகால் நூலகம் "வேதஸார ஸஹஸ்ரம்" எனும் நூலின் அரிய ஸம்ஸ்க்ருத உரையைப் பதிப்பித்து வெளியிடுவது அறிந்து மகிழ்ச்சியடைகிறேன். உரையாசிரியர், காஞ்சீ காமகோடி பீடத்தின் 57ஆவது தலைவராக விளங்கிய **ஸ்ரீ பரமசிவேந்த்ர ஸரஸ்வதீ** என்பவராவார். இந்த நூல் காஞ்சீ காமகோடி பீடம் **ஸ்ரீ பரமாசார்யார்** அவர்களின் நூற்றாண்டு வருடத்தில் வெளியிடப்படுவது மிகவும் பொருத்தமானதே.

இந்தத் தோத்திர நூல், செய்யுள் வடிவில் பதினெண் புராணங்களில் ஒன்றாகிய பத்மபுராணத்தில் உள்ளது. இதில் சிவபெருமானின் சிறப்பினைக் கூறும் ஆயிரம் பெயர்கள் உள்ளன. அந்தப் பெயர்களுக்கு, உரையாசிரியர் வேதங்கள், உபநிடதம், புராணங்கள் ஆகியவற்றில் கூறப் பட்டுள்ள கருத்துக்களை மேற்கோளாகக் குறிப்பிட்டு விளக்கப்பொருள் கூறுகிறார்கள். உலகிலுள்ள ஸம்ஸ்க்ருதம் அறிந்த அன்பர்களுக்கு இந்த நூல் மிகவும் பயனுள்ள தாகும்.

இந்த அரிய சுவடியை நூல் வடிவில் வெளிக்கொணரு வதற்கு அரிய முயற்சி மேற்கொண்ட மஹால் மேநிலை ஸம்ஸ்க்ருத பண்டிட் திரு. எஸ். கிருஷ்ணமூர்த்தி சாஸ்திரிகள் அவர்களுக்கும், மஹால் ஸம்ஸ்க்ருத பண்டிட் திரு. என். ஸ்ரீநிவாசன் அவர்களுக்கும் என் நன்றி.

இந்த நூலகத்தின் நிருவாக அதிகாரி திரு. ஏ. எம் முகமது யூசுப் அவர்களுக்கும், நூலக வெளியீட்டு மேலாளர் திரு. அ பஞ்சநாதன், எம். ஏ., எம். எல். ஐ. எஸ். அவர்களுக்கும் என் நன்றி.

அரிய சுவடிகளை வெளியிடுவதற்குப் பொருள் உதவி வழங்கும் இந்திய அரசாங்கத்திற்கும், இந்தப் புத்தகத்தை நல்ல முறையில் அச்சிட்டுத் தந்த சரசுவதி மகால் நூலக அச்சகத்தாருக்கும் நன்றி.

தி. சண்முக ராஜேஸ்வரன், இ. ஆ. ப.,
மாவட்ட ஆட்சித்தலைவர் மற்றும்
இயக்குநர் (பொறுப்பு.)

தஞ்சாவூர்.
27—9—93.

|| श्रीः ||

|| श्रीगणेशाय नमः ||

|| प्रस्तावना ||

वन्देऽज्ञानतमःस्तोमविद्रावणविचक्षणम् ।
श्रीचन्द्रशेखराभिख्यं काञ्चीपीठाधिगं महः ॥

इह लोके हि सुखसाधनतया प्रतीयमानं सर्वमपि दुःखैकनिदानं भवति, अनुभूयमानं सुखमपि वस्तुतो भूयोबन्धाय-भूयोदुःखायैव कल्पते । अतः सार्वकालिकदुःखासम्भिन्नसुखमात्रलाभाय तादृशनित्यनिरतिशय-सुखलाभोपदेशका वेदाः तदुपबृंहकाः पुराणेतिहासादय एव आश्रयणीया-भवन्ति । वेदाश्चत्वारोऽपि यस्य निःश्वासभूताः तद् वाङ्मनसागोचरं परमात्मसंज्ञितं वस्तु वस्तुतो नामरूपरहितमेव भवति । तथापि विविध-रुचिविशेषविशिष्टजनाऽऽराधनोपयिकतया तदेव दैवतं नानानामरूपाङ्कितं कृत्वा नानोपचारैराराध्यते । नामरूपादिरहितस्य सर्वत्राविशेषेण व्याप्तस्य वेदानामप्यगोचरस्य परमात्मवस्तुनः स्मरणं-भावनं वा सर्वजनासुलभमिति कृत्वा मुनिपुङ्गवा निर्गुणस्यापि तस्य परमात्मनः सगुणत्वं साकारतां नाना-कारतां च बोधयित्वा तत्तदुपासनाप्रकारं च विवृण्वन्ति स्म । एवंरीतिमनुसृत्य क्रियमाणा सगुणोपासना च क्रमेण निर्गुणोपासनायां पर्यवस्यति ॥ उक्तं च भगवत्पादैः —

"स्थूला सूक्ष्मा चेति द्वेधा हरिभक्तिरुद्दिष्टा ।
प्रारम्भे स्थूला स्यात् सूक्ष्मा तस्याः सकाशाच्च" इति ॥

सगुणोपासनायां "आदित्यश्चाम्बिका विष्णुर्गणनाथो महेश्वरः इति विविधाकारवतां दैवतानां आराधनाङ्गभूतार्चनौपयिकतया नानाविधानि शत-सहस्रादिनामानि पुराणेतिहासग्रन्थेषूपदिष्टानि भवन्ति। आपाततया वैष्णवत्वेन प्रतीयमाने पद्मपुराणे श्रीरुद्रसूक्तादिप्रोक्तानि शिवनामानि वेदसार-शिवसहस्रनामस्तोत्ररूपेण कथितानि दृश्यन्ते।

नामसहस्रव्याख्याकरणपद्धतिश्च श्रीभगवत्पादैरेव आदृता। दृश्यते खलु श्रीमन्महाभारतीयविष्णुनामसहस्रस्य श्रीभगवत्पादविरचिता व्याख्या। एवं विदितमेव ब्रह्माण्डपुराणान्तर्गतश्रीललितासहस्रनाम्नां श्रीगणेशपुराणप्रोक्तश्रीमहागणपतिसहस्रनाम्नां च भास्कररायमखिप्रणीतं भाष्यद्वयम्॥

एवंरीतिमवलम्ब्य सम्यमीन्द्रश्रीपरमशिवेन्द्रसरस्वतीश्रीपादैः विरचिता पद्मपुराणोक्तानां वेदसारशिवसहस्रनाम्नां व्याख्यापि दृश्यते। सोऽयं भाष्य-ग्रन्थः तञ्जावूर् सरस्वतीमहाल् मातृकाकोशागारे J. L. II 10/11 अङ्काङ्किततया कागदपत्रात्मकमातृकात्मना संरक्षितः इदम्प्रथमतया प्राकाश्यं नीयते।

विवरण (व्याख्या) ग्रन्थकर्तृपरिचयः —

एतद्विवरणग्रन्थरचयितारः श्रीकाञ्चीकामकोटिपीठं सप्तपञ्चाशत्तम-पीठाधीशतया अलमकुर्वन्। एतेषां पूर्वाश्रमनामधेयं तु श्रीशिवरामकृष्ण इति ज्ञायते॥ इदमधिकृत्य पुण्यश्लोकमञ्जरी* परिशिष्टनामके श्रीआत्मबोधेन्द्रकृते ग्रन्थे एवमुक्तम् —

* PUNYA SLOKA MANJARI PARISISHTA Part—I by Athmabodhendra. Printed at Liberty Press, Madras, 1961.

"आचार्यः 57"

पम्पासरस्तटभुवः परमेश्वरस्य
पुत्रः सदाशिवरतः शिवरामकृष्णः ।
तस्मादवाप्य नियमं नियमी निरस्त-
सङ्गोऽध्युवास सदनं खलु कामनेत्र्याः ॥

श्रीचक्रपूजनरतः शिवयोगलम्बी
श्रीदेशिकेन्द्रवचसा श्रितकामपीठः ॥ इति ॥

एभिराचार्यवर्यैः **तात्पर्यप्रकाशिकेति** शिवगीताव्याख्या, **दहरविद्या-प्रकाशिका**, **स्वरूपानुसन्धानम्**, **भूतिरुद्राक्षमाहात्म्यम्** इत्यादयोऽन्ये च बहवो ग्रन्था विरचिता इति ज्ञायते । एते प्राधान्येन सुप्रसिद्धयोगिवर्यस्य श्रीसदाशिवब्रह्मेन्द्रस्य ब्रह्मविद्योपदेष्टार इति कथ्यते ॥

"विष्णोर्नामसहस्राच्च शिवनामैकमुत्तमम्" इत्युक्तरीत्या अर्थानु-सन्धानपुरःसरं भाव्यमानं शिवनाम भूयोदुरितापगमाय कल्पेतेति मनीषया विरचिते ग्रन्थेऽस्मिन् पद्मपुराणोक्तानां शिवनाम्नां वेदार्थ एव हृदयं भवतीति वेदवेदान्तेतिहासपुराणगतवचनशतोद्धरणैर्निरूप्यते श्रीचरणैः ॥

उक्तं चेदं तैरेवास्मिन् ग्रन्थे* —

"भारतादित्यपुराणेषु [शिवरहस्येऽन्यत्र च] श्रीशिवनामसहस्राणि बहूनि सन्ति । तथापि श्रुतिमूलत्वादिदमुत्कृष्टमत एव वेदसाराख्यत्वेन प्रसिद्धम् । श्रुतिमूलत्वं च तत्तन्नामव्याख्यानान्ते केषाञ्चिन्नाम्नां प्रदर्शयिष्यत" इति ।

---

* Page. 50—14

मातृकामधिकृत्य —

सरस्वतीमहालयमातृकाकोशागारे जम्बुनाथपट्लाण्टके इति नाम्ना कश्चिन्मतृकाकोशसङ्ग्रहो वर्तते । तदन्तर्गतेयं मातृका J.L. II 10/11 सङ्ख्याका भवति । ग्रन्थस्यास्य मातृकान्तरं भारतवर्षस्थमातृकागारेषु कुत्रापि नोपलभ्यते । किन्तु लण्डन् नगरीस्थ इण्डिया आफ़िस् मातृकालये मातृका काचित् वर्तत इति New Catalogus Catalogorum XI Vol. Page 171 (a) द्वारा ज्ञायते ॥

एतद्ग्रन्थप्रकाशनार्थाय कृतादेशेभ्यः भूतपूर्वनिर्देशकेभ्यः, इदानीं निर्देशनाधिकारं निर्वहद्भ्यः श्री T. **षण्मुखराजेश्वरन्**, I.A.S. महोदयेभ्यः, महालयाधिकारिवर्येभ्यः श्री A. M. **मोहम्मद् यूसुफ्** महोदयेभ्यः, ग्रन्थ-प्रकाशनविभागाधिपेभ्यः श्री **अ. पद्मनाथन्**, M. A., M. L. I. S. महोदयेभ्यश्च कृतज्ञता निवेद्यते ॥

दर्शनीयतया मुद्रणाय कृतप्रयत्नेभ्यः महालयमुद्रणविभागकर्मचारि-भ्यश्चास्मत्कृतज्ञतामावेदयावः ॥

इत्थं

सरस्वतीमहालयः
तञ्जावूर्
02—09—1993

तेदियूर् पण्डित एस्. कृष्णमूर्तिशास्त्री
विद्वान् एन्. श्रीनिवासः

முகவுரை

यदपाङ्गतः प्रबोधो भवदुस्स्वप्नावमानकरः ।
तमहं परमशिवेन्द्रं वन्दे गुरुमखिलतन्त्रजीवातुम् ।।

— सिद्धान्तलेशसङ्ग्रहे

உலகில் நாம் துய்க்கும் இன்பங்கள் அனைத்துமே துன்பங்களுக்கு காரணமாகின்றன. இன்பமாக நினைத்துக் கொள்கிறோமேயன்றி, அந்த இன்பமே துன்பமாகவும் ஆகின்றது. நாவின் சுவைக்கு அடிமையாகிப் புசிக்கும் "நல்லுணவும், அதிக உணவும்" சில மணிகளில் வயிற்றில் துன்பமுண்டாக்கி 'ஏன் இதனை-இவ்வளவு உண்டோம்' என்ற எண்ணத்தை ஏற்படுத்துகின்றது. இங்ஙனம் ஒவ்வொரு செயலிலும் முதலில் இன்பமாகத் தோன்றியவை பிறகு துன்பத்திற்குக் காரணமாகின்றன.

என்னாளும் இன்பத்தையே நல்கும் இறையருளை நாம் அடைவதற்கு வழிகாட்டுவது வேதம். வேதத்திற்கு அங்கங்கள் ஆறு. சிக்ஷா, வியாகரணம், சந்தஸ், நிருக்தம், ஜ்யோதிஷம், கல்ப்பம் என்பன. இவை ஒவ்வொன்றும் வேதத்தை அறிவதற்கும், அவற்றைப் பயன்படுத்துதற்கும், அவற்றின் பொருளை அறிவதற்கும் அவற்றை எளிதில் பிழையின்றிக் கற்பதற்கும் வழிகாட்டுகின்றன,

'இன்னது' என்று சொல்லால் விளக்கமுடியாததாகவும் மனத்திற்கும் அப்பாற்பட்டதாகவுமிருக்கும் *ஒன்றை — ப்ரம்மத்தை — பரம்பொருளை நமது சௌகரியத்திற்காக, 'நாம் விரும்பும் உருவம் கொடுத்தும்', அவ்வுருவத்திற்குப் பல்வேறு காரணங்களைக்கூறி பெயரிட்டும் 'அதனை' வழிபடுகிறோம். அப்பெயர்களாலேயே 'அப்பொருளை'

---

* "यतो वाचो निवर्तन्ते अप्राप्य मनसा सहेति" श्रुतिः ॥

வழிபடவும் செய்கிறோம். இதனை மாணிக்கவாசகப் பெருமான் திருவாசகத்தில்.

"ஒருநாமம் ஓருருவம் ஒன்றுமில்லாற்கு ஆயிரந்
திருநாமம் பாடிநாம் தெள்ளேணங் கொட்டாமோ"

என்று பாடியுள்ளார்.

இவ்வாறு நாம, ரூப, பேதங்கடந்த ப்ரம்மத்திற்கு; நாம, ரூபங்களைக் கொடுத்து உபசாரங்கள் செய்து வழிபடுகின்றோம். வேதங்கள் கூறும் யாக விதிகளைப் பற்றிக் கூறுவதுடன் இத்தகைய வழிபாட்டு முறைகளைக் கூறும் பகுதி 'கல்ப்பம்' என்ற பகுதியாகும். எங்கும் நீக்கமற நிறைந்திருக்கும் இறைவனை — ப்ரம்மத்தை — நினைப்பதோ-உணர்வதோ-அடைவதோ அனைவராலும் முடியாது என்ற காரணத்தால் உபநிடதங்களில் கூறப்பட்ட கருத்தை அனுசரித்து நம் முன்னோர்கள். உருவ வழிபாடு-(ஸகுணோபாஸனை); அருவ வழிபாடு — (நிர்குணோபாஸனை); என்ற இரண்டு பிரிவுகளாகப் பிரித்தனர். முதலில் ஸகுணோபாஸனை செய்துகொண்டே வந்தால் தானாகவே நிர்குணோபாஸனையில் அது கொண்டு சேர்த்துவிடும் என்று கூறியுள்ளனர். இக்கருத்தை ஆதி சங்கரர் இயற்றியுள்ள "பிரபோத ஸுதாகரம்" என்னும் நூலில்,

स्थूला सूक्ष्मा चेति,द्वेधा हरिभक्तिरुद्दिष्टा ।
प्रारम्भे स्थूला स्यात्सूक्ष्मा तस्याः सकाशाच्च ॥

இக்கருத்தை வலியுறுத்துகின்றார். மாடிக்குச் செல்கின்ற ஒருவன், ஒவ்வொரு படியாகக் கடந்து மேலே செல்லுமாப் போலே ஸகுணோபாஸனைக்குப் பின்னர் நிர்குணோபாஸனை செய்யவேண்டும் என்பது கருத்து.

ஆதலால், உருவ வழிபாடாக விளங்கும் ஸகுணோபாஸனைக்குரிய முறைகளை கூறும் நூல்களில் இறைவனை தியானம், ஆவாஹனம், ஆஸனம், அபிஷேகம், அர்ச்சனை மற்றும் உபசாரங்களால் இறைவனாகிய ஸகுணப்ரம்மத்தை (விக்ரஹம்—சிலை—யந்த்ரம் போன்றவற்றை) வழிபட

வேண்டும் என்ற நெறிமுறைகளை "கல்பம்" என்னும் பகுதி விளக்குகின்றது.

மேலும், சிவன்-விஷ்ணு-அம்பாள்-கணபதி போன்ற தெய்வங்களை அர்ச்சித்தற்குரிய நாமாக்கள் (திருப்பெயர்கள்) வேத-புராண-இதிஹாஸங்களில் பல்வேறு இடங்களில் தொகுத்து ஸ்தோத்திரங்களாகக் கூறப்பெற்று உள்ளன. வேதங்களில் ஆங்காங்கே இருக்கும் சிவனின் நாமாக்களைத் தொகுத்துக் கூறும் பகுதி "பத்ம புராணத்தில்" காணப்படுகிறது. இதற்கு "வேதஸார சிவ ஸஹஸ்ரநாம ஸ்தோத்ரம்" என்று பெயர். இத்தகைய நாமாக்களுக்கு உரை எழுதும் வழக்கம் ஆதிசங்கரர் காலந் தொடங்கியேயுள்ளது.

மஹாபாரதத்தின் "அனுசாஸனபர்வாவில்" காணப்படும் ஸ்ரீ விஷ்ணு ஸஹஸ்ரநாமத்திற்கு உரை எழுதியவர் ஆதிசங்கர பகவத்பாதர்; ப்ரம்மாண்ட புராணத்தில் காணப்படும் ஸ்ரீ லலிதா ஸஹஸ்ரநாமத்திற்கும்; கணேச புராணத்தில் காணப்பெறும் ஸ்ரீ கணேச ஸஹஸ்ரநாமத்திற்கும் 'பாஸ்கரராயர்' உரை எழுதியுள்ளார். இவ்வரிசையில் தோன்றியதே 'வேதஸார சிவஸஹஸ்ரநாம வ்யாக்யானம்' என்னும் இந்நூல்.

உரையாசிரியர் வரலாறு:

உரையாசிரியர் ஸ்ரீகாஞ்சீ காமகோடி பீடத்தின் 57வது பீடாதிபதியாக விளங்கியவர் இவரது இயற்பெயர் "சிவராமகிருஷ்ணர்". ஸன்யாஸம் பெற்றுக்கொண்டபின் தீக்ஷாநாமம் "பரமசிவேந்திர ஸரஸ்வதீ" என்பதாகும்*. இவர் ஸர்வக்ஞ ஸதாசிவபோதேந்திரரிடம் (காமகோடி பீடத்தின் 56ஆவது பீடாதிபதி) ஸன்யாஸம் பெற்றுக் கொண்டார். நாராயணேந்த்ர ஸரஸ்வதீ என்பவர்

---

* अथ सप्तपञ्चाशमात्मनो देशिकमभिष्टवीति द्वाभ्यां—हृदय इति
— गुरुरत्नमालिका by सदाशिवेन्द्रः

இவருக்கு வித்யாகுரு என்று கூறப்படுகிறது. இவரைப் பற்றிய குறிப்புகள் 'புண்யச்லோக மஞ்ஜரீ பரிசிஷ்டத்தில்' காணப்படுகிறது

இவர் அத்வைத குரு பாரம்பரியத்தில் வந்தமையால் சிவனிடத்திலும், ராமனிடத்திலும் துல்யமான பக்தியுடன் விளங்கியுள்ளார். சிவபெருமான் ஸ்ரீராமனுக்கு உபதேசித்த கீதை "சிவகீதை" என்று வழங்கப்படுகிறது. இந்த சிவ கீதைக்கு இவர் "தாத்பர்ய பிரகாசிகா" என்ற பெயரில் ஒரு உரை எழுதியுள்ளார். இவ்வுரையின் தொடக்கத்தில் "ஸாம்ப பரமேச்வரனையும், லீலாவதாரமெடுத்த ஸ்ரீராமனையும் வணங்கி சிவகீதையின் பொருளை விளக்குகின்றேன்[1] என்று கூறுவதால் சிவன், ராமன் என்ற பேதமின்றி இருவரிடமும் பக்தியுள்ளவர். இதன் காரணமாக இந்த உரையாசிரியரை "ஸ்ரீராமஸரஸ்வதீ" என்ற பெயரால் அழைப்பதுண்டு. இதனை மதுஸூதன ஸரஸ்வதீ ஸ்வாமிகள் "அத்வைதஸித்தி" என்ற நூலில் **श्रीरामविश्वेश्वर-माधवानाम्** என்ற ச்லோகத்தால் தமது மூன்று குருமார்களையும் பரமகுரு, குரு, வித்யாகுரு என்னும் வரிசையில் வணங்குகின்றார். இந்த நூலுக்கு உரையான "லகு சந்த்ரிகா"வில் **परमगुरु,गुरु,विद्यागुरून् प्रणमति श्रीरामेति** என்று எழுதியுள்ளார் இதனால் 'ஸ்ரீராமஸரஸ்வதீ' என்பது (இந்த நூலாசிரியரான பரமசிவேந்திரரையே குறிக்கும் என்று காலம் சென்ற மஹாவித்துவான் போலகம் ஸ்ரீ ராம சாஸ்திரிகள் குறிப்பிடுகின்றார்.[2] ஆதலால் இவரை "ஸ்ரீராமஸரஸ்வதீ" என்று அழைக்கும் மரபு இருந்திருக்கிறது எனத்தெரிகிறது.

இவர் வேத, சாஸ்த்ர, புராணங்களில் சிறந்த மேதாவியாகத் திகழ்ந்துள்ளார். இவருக்கு சிஷ்யர்கள் பலர்.

---

1. **नत्वा सर्वगुरुं साम्बं लीलामानुषविग्रहम् ।**
   रामं च शिवगीतायास्तात्पर्यं वर्ण्यते मया ॥

2. ஸ்ரீஸதாசிவப்ரும்மேந்த்ர ஸரஸ்வதீ விஜயம்—பக்கம் 12.

இவர்களில் முக்கியமானவரும், அனைவராலும் வழிபடத் தக்கவருமான ஸ்ரீ ஸதாசிவப்ரம்மேந்த்ர ஸரஸ்வதீ ஸ்வாமி களைக் கூறலாம்.

ஸ்ரீ பரமசிவேந்த்ர ஸரஸ்வதீ அவர்கள் தமக்குப்பின் ஸதாசிவப்ரம்மேந்திர ஸரஸ்வதீயைக் காஞ்சீ காமகோடி பீடத்தை அலங்கரிக்கும் பீடாதிபதியாக்கவேண்டும் என்று விரும்பினார் ஒரு ஸமயம் தாம் செய்யும் ஸ்ரீ சந்த்ர மௌளீச்வர பூஜையைச் செய்யுமாறு அவருக்கு நியமனம் செய்தார். எப்பொழுதும் ப்ரம்மத்துடன் சஞ்சரிக்கும் ஸதாசிவம் "சிவமானஸிக பூஜா ஸ்தோத்ரத்தில்" காணப் படும் ஸபர்யா பர்யாய ஸ்தவத்தில் கூறியபடி—"ப்ரபோ! அறிவிற்கெட்டாத மகிமை பொருந்திய உம்மை எப்படி தியானம் செய்வேன். நீங்கள் இல்லாத இடமே இல்லை யாதலின் உம்மை எங்கு வைத்து ஆவாஹனம் செய்வேன்"* என்று வெளிப்படையான (பாஹ்யமான) பூஜையை ப்ரம்மேந்த்ராள் செய்யவில்லை இதை அறிந்த பரம சிவேந்த்ரர், "ஸதாசிவப்ரம்மம் எப்பொழுதும் அந்தர்முக மாகவே இருப்பவர். ஆகையால் இவர் பீடாதிபத்யத்திற் குரியவரில்லை" என்று தெரிந்துகொண்டு, தம்மிடம் பயிலுர் ஸதாசிவேந்த்ரரின் சகபாடியான "ஆத்மபோதர்" என்பவரை காஞ்சி மடத்திற்குப் பீடாதிபதியாக்கினார் என்றும் அறியமுடிகிறது.[2] இவர் பார்த்திப ஆண்டு, ஆவணி மாதம் சுக்லபக்ஷ தசமி திதியில் தஞ்சை மாவட்டத் திலுள்ள "திருவெண்காடு" என்னும் க்ஷேத்ரத்தில் ஸித்தி அடைந்தார் எனத்தெரிகிறது.

இவருடைய காலம் :

தஞ்சையை ஆட்சி செய்த இரண்டாம் ஷஹஜி (கி. பி. 1684–1710) மன்னரின் ஆட்சிக் காலத்தில், திருவிசநல்லூர்

---

* "ध्यायामि कथमिव त्वां धीवर्त्मविदूरदिव्यमहिमानम् ।
आवाहनं विभोस्ते देवाग्र्य भवेत्प्रभो कुतः स्थानात् ॥"

2. ஸ்ரீ ஸதாசிவ ப்ரம்மேந்த்ர ஸரஸ்வதீ விஜயம்—பக்கம் 20.

என்று வழங்கும் ஷஹஜி ராஜபுரத்தில் அக்ரஹாரம் அமைத்து 46 பண்டிதர்களுக்கு வித்யாதானமாக வழங்கி யுள்ளார். இவ்வூரில் இருந்து வாழ்ந்த வித்வான்கள் பல்வேறு விதமான இலக்கிய, இலக்கண, சாஸ்திர நூல்களை இயற்றியுள்ளனர். இக்காலத்தில் வாழ்ந்த கிருஷ்ணானந்த ஸரஸ்வதி அவர்கள் **ஸித்தாந்த ஸித்தாஞ் சனம், சிவதத்வ ரத்னகலிகா** போன்ற நூல்களை இயற்றி யுள்ளார். மற்றெந்த மாவட்டத்தைக் காட்டிலும் அதிக மான வேதாந்த நூல்கள் தஞ்சை மாவட்டத்தில் தோன்றி யுள்ளன. மேலும், இந்த **சரசுவதி மகால்** நூலகத்தில் உள்ள தர்சன நூற்சுவடிகளில் அத்வைத வேதாந்த நூற் சுவடிகளே அதிகமாகக் காணப்படுகின்றன. இதற்குக் காரணத்தைச் சிந்திக்கும்போது அத்வைத ஸன்யாஸி களான, பரமசிவேந்த்ர ஸரஸ்வதீ, போதேந்திரர் போன்ற பல மகான்கள் கும்பகோணத்தைச் சார்ந்த பகுதிகளை அலங்கரித்தனர் என்பதும் இங்கு கருதத்தக்கது. மேலும், இவரது சீடர்கள் இம்மன்னரின் காலத்தில் வாழ்ந்திருப்ப தால் இவர் 17-ம் நூற்றாண்டின் பிற்பகுதியில் வாழ்ந்தவர் என்பதும் உறுதியாகத் தெரிகிறது.

இவரது நூல்கள் :

1. தஹரவித்யா பிரகாசிகா
2. தாத்பர்ய பிரகாசிகா —சிவ கீதையின் உரை
3. ஶ்ரீருத்ராக்ஷ மாஹாத்மியம்
4. வேதஸார ஸஹஸ்ரநாம வ்யாக்யா
5. வேதாந்தநாம ரத்ன ஸாஹஸ்ரம்.

தஹரவித்யா பிரகாசிகா :

இந்த நூல் இயற்றக் காரணமாக இருந்தவர்கள் த்ர்யம்பகராயமகி, ஶ்ரீராமேந்த்ரர், வரதராஜர், சங்கர நாராயணமகி ஆகியோர். இவர்கள் செய்துகொண்ட ப்ரார்த்தனையால் "தஹரவித்யா ப்ரகாசிகா" என்னும் நூலை இயற்றியுள்ளேன் என்று நூலாசிரியர் நூலின்

முடிவில் கூறியுள்ளார்.* இந்நூல் ப்ரம்மசூத்திரத்திற்கு உரையான சங்கரபாஷ்யத்திலுள்ள "தஹராதிகரண" (दहराधिकरण)த் திற்கு விளக்கம் அளிக்கிறது.

தாத்பர்ய ப்ரகாசிகா—சிவகீதையின் உரை :

சிவபெருமான் ஸ்ரீராமச்சந்திரனுக்கு ஆத்மக்ஞானத்தை உபதேசிப்பதாக அமைந்த நூல் சிவகீதை. இந்நூலுக்கு உரிய உரையை எழுதியுள்ளார்.

பூதிருத்ராக்ஷ மாஹாத்ம்யம் :

இந்த நூல் சிவ சின்னங்களான விபூதி, ருத்ராக்ஷம் ஆகியவற்றின் சிறப்பு, அவற்றை அணியும் முறை, அணிவதால் ஏற்படும் நன்மை ஆகியவற்றைப்பற்றி பல சான்றுகளுடனும், மேற்கோள்களுடனும் விளக்குகின்றது. சிவகீதையில் விபூதி, ருத்ராக்ஷங்களின் சிறப்பைக் கூறுமிடத்தில் இஃது விளக்கப்பட்ட செய்திகளையே ஒரு தனி நூல் வடிவாகக் கொடுக்கப்பெற்றுள்ளது.

வேதஸார (சிவ) ஸஹஸ்ரநாமவியாக்யா :

இந்த நூலும், சிவகீதையின் தொடர்ச்சியே. சிவநாமாக்கள் ஒவ்வொன்றும் வேதத்தின் அடிப்படையில் எழுந்தவைகளே என்பதை ஸ்ருதி, ஸ்ம்ருதி இதிஹாஸ புராணங்களின் அடிப்படையில் உரை எழுதியுள்ளார். சிவகீதையில் விபூதியைத் தரிக்கும்போது சிவ சிந்தனையுடனும், சிவனுடைய நாமாக்களை உச்சரித்துக்கொண்டே அணியவேண்டும் என்று சிவபெருமான் ஸ்ரீராமனுக்கு உபதேசம் செய்கிறார் என்றும், சிவனுடைய நாமாக்களை உச்சரிக்கும்போது "அந்த சிவ நாமாவின் பொருளை உணர்ந்து உச்சரித்தல் அவசியம்" என்றும், ஆதலால் இந்த நாமாக்களின் நுட்பமான பொருளாய் விளங்குவது பரம்

---

* एषा त्र्यम्बकमखिनः श्रीरामेन्द्रस्य वरदराजस्य ।
शङ्करनारायणमखिवरस्य चाभ्यर्थनावशाद्रचिता ॥

பொருளேயாகும் என்பதை உணர்த்தும் விதத்தில் சிவ ஸஹஸ்ரநாம உரை எழுதப்பட்டுள்ளது.

மஹாபாரதம், பத்ம புராணம், ஆதித்ய புராணம் போன்ற இதிஹாஸ புராணங்களில் சிவ ஸஹஸ்ரநாமங்கள் பல காணப்படுகின்றன இருந்தும், வேதாம அனைத்துக்கும் அடிப்படை என்பதாலும், அதில் கூறப்பட்டுள்ள நாமாக்களுக்குரிய சிறப்பைக் கருதியும், "நாமாக்கள் வேதத்தின் ஸாரமே"* என்பதாலும் வேதஸார சிவ ஸஹஸ்ர நாமத்திற்கு உரை எழுதியுள்ளேன் என்றும், வேதங்களில் காணப்படும் சொல்லாட்சிகளையும் அந்தந்த நாமாக்களின் கீழ் எடுத்தாண்டுள்ளார்.

வேதாந்த நாமரத்ன ஸஹஸ்ரம் :

இந்த நூலில் உபநிஷத்துக்களில் காணப்படும் ப்ரம்ம ஸ்வரூப வாக்கியங்களுக்குரிய மேற்கோள்களுடன் உரை எழுதப்பெற்றுள்ளது.

16, 17 ஆம் நூற்றாண்டுகளில் எழுந்த நூல்களில் பல வேத, ஸ்ம்ருதி, இதிஹாஸ, புராணங்களில் கூறப்பட்டுள்ள ஓரேவிதமான செய்திகள் தொகுக்கப் பெற்றுள்ளன, உதாரணமாக ஸன்யாஸிகளைப் பற்றிக் கூறும் பகுதிகளை 'பரமஹம்ஸசர்யா' என்ற நூலும், உபநிஷத்துக்களில் காணப்படும் ப்ரம்மவாசகங்களின் தொகுப்பைக் கூறும் 'உபநிஷன் நாம ஸாஹஸ்ரம்' என்ற நூலும்; விபூதி, ருத்ராக்ஷம் பற்றிக் கூறும் பகுதிகளை 'பூதிருத்ராக்ஷ மாஹாத்ம்யம்' என்ற நூலும்; ஆறு தர்சனங்களைப் பற்றிச் சுருக்கமாகக் கூறும் 'ஷட்தர்சனீ சித்தாந்த ஸங்க்ரஹம்' என்னும் நூலும், இதுபோன்று பல்வேறு வகைகளான செய்திகளைப் பல வித்வான்கள் தொகுத்து

---

* भारतादित्यपुराणेषु (शिवरहस्येऽन्यत्र च) शिवविषयकनामसहस्राणि बहूनि सन्ति । तथापि श्रुतिमूलत्वादिदमुत्कृष्टमत एव वेदसाराख्यत्वेन प्रसिद्धम् । श्रुतिमूलत्वं च तत्तन्नामव्याख्यानान्ते प्रदर्शयिष्यते ॥ (இந்நூல் பக்கம் 50)

உள்ளனர். இதுபோன்றே க்ரியாபத நிகண்டு, உணாதி கோசம் போன்ற நிகண்டுகளும் தொகுக்கப்பெற்றுள்ளன என்பதும் இங்கு குறிப்பிடத் தக்கது.

இவரது சீடர்கள் :

1. விஸ்வாதிகாத்மபோதேந்த்ர ஸரஸ்வதீ
2. ஸதாசிவேந்த்ர ஸரஸ்வதீ
3. ராமபத்ர தீக்ஷிதர்
4. நல்லாத்வரி
5 வேங்கடகிருஷ்ண தீக்ஷிதர்.

மேலே காணும் சீடர்கள் தங்களது நூல்களில் தனது குருநாதரான ஸ்ரீ பரமசிவேந்த்ர ஸரஸ்வதீ ஸ்வாமிகளை (இந்நூலாசிரியரை)க் குறித்து வணங்கியுள்ளனர்.* இவர்களைப் பற்றிய செய்திகள் :—

விஸ்வாதிக ஆத்மபோதர்

இவர் காமகோடி பீடத்தின் 58வது பீடாதிபதியாக பரமசிவேந்த்ர ஸரஸ்வதீ ஸ்வாமிகளிடம் தீக்ஷை பெற்றுக் கொண்டார். இவருடைய இயற்பெயர் "விச்வேச்வரர்". இவர் காசியில் பல காலம் தங்கியிருந்தவர். யஜுர் வேதத்திலுள்ள ஸ்ரீருத்ரத்திற்குத் தெளிவுரை எழுதியுள்ளார். "குருரத்னமாலிகா" என்னும் நூலை

---

* a. श्रीमत्परमशिवेन्द्रश्रीदेशिकानां वयं मुदा ।
अद्वैतानन्दमाध्वीकमङ्घ्रिपद्ममुपास्महे ॥
— आत्मानुसन्धाने सदाशिवब्रह्मेन्द्रसरस्वती

b. भुवनाद्भुतानुभावं परमशिवेन्द्राभिधं भजामि गुरुम् ।
यदपाङ्गव्यापारः पुंसां संसारतारको भवति ॥
— अद्वैतरसमञ्जरीव्याख्यापरिमले - नल्लाध्वरी

c. "गुरुपरमशिवेन्द्राध्यापितब्रह्मविद्य"
— कुशलवविजयनाटके–वेङ्कटकृष्णदीक्षितः

ஸ்ரீ ஸதாசிவேந்த்ர ஸரஸ்வதியை எழுதுமாறு நியமித்தார். ஈச்வர வருடம் ஐப்பசி கிருஷ்ணாஷ்டமியில் 'கடிலம்' நதிக் கரையில் ஸித்தியடைந்தார்.

ஸதாசிவேந்த்ர ஸரஸ்வதீ :

இவர் இயற்கையிலேயே உலகப் பற்றற்றவர். கரூரில் இருந்து திருவிசை நல்லூர் வந்தார். ஸ்ரீ பரமசிவேந்த்ரரிடம் ஆத்ம வித்யையை அறிந்தவர். பதஞ்ஜலி எழுதிய யோக சூத்திரத்தைப் பயின்று அதனைத் தனது அனுபவத்திலும் கொண்டு விளங்கியவர். பிற்காலத்தில் இவர் **யோக ஸூத்ரத்திற்கு "வ்ருத்தி"** (குறிப்புரை) எழுதியவர். எல்லாம் துறந்த அவதூதர், ஞானி, சித்தபுருஷர். ஆனால் தனது குருநாதரை தரிசிக்கவரும் பண்டிதர்களிடம் பல கேள்விகளைக் கேட்டு அவர்களைத் திணறடிப்பார். இதனால் வருந்திய பண்டிதர்கள் குருநாதரிடம் முறையிட, அது கேட்ட பரமசிவேந்த்ரர், "ஸதாசிவா! உன் வாய் எப்பொழுது அடைபடப் போகிறது?" என்று சொல்ல அன்றுமுதல் இவர் மௌனியானார். எவரிடமும் பேசுவது இல்லை ஏதேனும் அவரிடம் கேட்டால் எழுதிக் காண்பிப்பார். பின்னாளில் ஆடையின்றி அவதூதராக ஆனார். பசியெடுத்தால் கைகளை நீட்டி பிக்ஷை எடுப்பார். பைத்தியம்போல் திரிந்தார். ஞானியும் பைத்தியம்போலத் தானே பாமரர் கண்களுக்குத் தெரியும்? இதனை இவரது குரு பரமசிவேந்த்ரரிடம் கூறினர் மக்கள். "ஸ்வாமி! தங்களுடைய சீடன் ஸதாசிவம் பைத்தியம்போலத் திரிகிறாரே" என்று சொல்ல குருநாதர் "அப்பைத்தியம் தனக்குப் பிடிக்கவில்லையே" என்று ஏங்கினாராம். அது ஒரு ச்லோகமாக உருவெடுத்தது.* இத்தகைய சீடரைப் பெற்றுத்திகழ்ந்தவர்

---

* उन्मत्तवत्सञ्चरतीह शिष्य-
स्तवेति लोकस्य वचांसि शृण्वन् ।
खिद्यन्नुवाचास्य गुरुः पुराहो
ह्युन्मत्तता मे न हि तादृशीति ॥

இவ்வுரையாசிரியர். ஸதாசிவர் பதினோரு நூல்களையும் நாம மகிமைகளைக் கூறும் கீர்த்தனங்களையும் பாடியுள்ளார். திருச்சி மாவட்டத்திலுள்ள "நெரூர்" என்னும் ஊரில் ஸித்தியடைந்தார்.

ராமபத்ர தீக்ஷிதர் :

இவர் சகஜிராஜபுரம் என்னும் திருவிசநல்லூரில் பிறந்து வாழ்ந்தவர். சகஜியின் அவையில் தலைமைப் புலவராகத் திகழ்ந்தார். கௌண்டின்ய கோத்திரத்தினர். இவர் **ஜானகீ பரிணயம், பதஞ்ஜலி சரித்ரம்** போன்ற ஏழு நூல்களை இயற்றியுள்ளார்.

நல்லாத்வரி :

நல்லாகவி, நல்லபுதர், பூமிநாதகவி என்ற பல பெயர்களால் அழைக்கப்படுபவர் கௌசிக கோத்ரம். பாலசந்த்ர தீக்ஷிதரின் மகன். தஞ்சை மாவட்டம் கண்டரமாணிக்கம் என்ற ஊரில் வாழ்ந்தவர். இந்நூலாசிரியரிடத்திலும், சதாசிவர், ராமபத்ர தீக்ஷிதர், வைத்யநாத தீக்ஷிதர் ஆகியோரிடம் கல்வி பயின்றவர், (ஐயாவாள்) ஸ்ரீதர வேங்கடேசரின் சமகாலம். இவர் **சித்தவ்ருத்தி கல்யாணம், தர்மவிஜயசம்பூ** போன்ற ஆறு நூல்களை இயற்றியவர்.

வேங்கடகிருஷ்ண தீக்ஷிதர் :

இவர் சிதம்பரத்தைச் சார்ந்தவர். அந்த க்ஷேத்திரம் குறித்து "நடேச விஜயம்" என்ற காவியத்தை எழுதினார். பின்னர் சகஜி மன்னரின் ஆதரவினால் சகஜிராஜபுரம் என்ற திருவிசநல்லூரில் வாழ்ந்தவர். இவர் எழுதிய ஏனைய நூல்கள் **ராமசந்த்ரோதயம்** (காவியமும்-உரையும்), **உத்தரசம்பூ, குசலவ விஜய** நாடகம் முதலியன.

* ஸ்ரீ ஸதாசிவப்ரும்மேந்த்ர ஸரஸ்வதீ விஜயம்-முன்னுரை. பக். v, vi.

சுவடி வரலாறு:

சரசுவதி மகால் நூலகத்திலுள்ள ஜம்புநாதபட் லாண்டகே (J. L. Collection) என்ற பெயரில் ஒரு சுவடித் தொகுதி உள்ளது. இத்தொகுதிச் சுவடிகளை 8-1-1921ல் இந்நூலகத்திற்கு அன்பளிப்பாக அளித்துள்ளார். இந்தத் தொகுதியில் பல அரிய சுவடிகள் பாதுகாக்கப்பெற்று வருகின்றன. இத்தொகுதி பற்றிய பிற செய்திகளை இந் நூலக பருவ இதழ் 40ல் வெளியாகியுள்ளது. இத்தொகுதி யில் J.L. II 10/11ஆம் எண்ணில் பாதுகாக்கப்படும் ஒரே ஒரு சுவடி. (இந்த நூலின் வேறு சுவடி இந்தியாவில் வேறு எந்த நூலகத்திலும் காணப்பெறவில்லை. இதுபோன்ற வேறு சுவடி லண்டனில் உள்ள இந்திய ஆபீஸ் நூலகத்தில் உள்ளதாக New Catalogus Catalogorum XI Vol. Page 171 (a) மூலமாக அறியமுடிகிறது. (எண் Indian Office Library No. 171 (a)).

நன்றியுரை :

இந்த நூலைப் பதிப்பிக்கும் பணியை எமக்கு நல்கிய முன்னாள் இயக்குனருக்கும், இதற்கு அணிந்துரை நல்கிய இந்நூலக இயக்குனரும் (பொறுப்பு), மாவட்ட ஆட்சித் தலைவருமான உயர்திரு. T. **சண்முகராஜேஸ்வரன்.** I. A. S., அவர்களுக்கும், இந்நூலக நிருவாக அதிகாரி, உயர்திரு, **A. M முக்ம்மது யூசுப்** அவர்களுக்கும், நூலகப் பதிப்பு மேலாளர் உயர்திரு. A. **பஞ்சநாதன்.** M. A., M. L. I. S. அவர்களுக்கும் எங்களது நன்றியைத் தெரிவித்துக் கொள்கிறோம்.

சிறப்பாக அச்சிட்டுத்தந்த இந்நூலக அச்சகப் பிரிவின ருக்கும் எங்களது நன்றியைத் தெரிவித்துக்கொள்கிறோம்.

இங்ஙனம்,

நேதியூர் எஸ். கிருஷ்ணமூர்த்தி சாஸ்திரிகள்,
மேனிலை ஸம்ஸ்க்ருத பண்டிதர்,

என். ஸ்ரீநிவாஸன்,
ஸம்ஸ்க்ருத பண்டித்ர்.

தஞ்சாவூர்
14—9—1993

॥ वेदसारशिवसहस्रनामस्तोत्रम् ॥

(पद्मपुराणोक्तम्)

*

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥ -१

ऐश्वरं परमं तत्वमादिमध्यान्तवर्जितम् ।
आधारं सर्वभूतानामनाधारमविक्रियम् ॥ -२

अनन्तानन्दबोधाम्बुनिधिमद्भुतविक्रियम् ।
अम्बिकापतिमीशानमनीशं प्रणमाम्यहम् ॥ -३

ऐशमाद्यन्तनिर्मुक्तमतिशोभनमादरात् ।
नमामि विग्रहं साम्बं संसारामयभेषजम् ॥ -४

व्यास उवाच —

एकदा मुनयः सर्वे द्वारकां द्रष्टुमागताः ,
वासुदेवं च सोत्कण्ठाः कृष्णदर्शनलालसाः ॥ -५

ततः स भगवान्प्रीतः पूजां चक्रे यथाविधि ।
तेषामाशिस्ततो गृह्य बहुमानपुरःसरम् ॥ -६

तैः पृष्टः कथयामास कुमारप्रभवं च यत् ।
चरितं भूमिभारघ्नं लोकानन्दकरं परम् ॥ -७

मार्कण्डेयमुखाः सर्वे माध्याह्निकक्रियोत्थिताः ।
कृष्णः स्नानमथो चक्रे मृदक्षतकुशादिभिः ॥ -८

पीताम्बरं त्रिपुण्ड्रं च धृत्वा रुद्राक्षमालिकाः ।
सूर्योपस्थानं सन्ध्यां च स्मृतिधर्ममनुस्मरन् ॥ -९

शिवपूजां ततः कृष्णो गन्धपुष्पाक्षतादिभिः
चकार विधिवद्भक्त्या नमस्कारयुतां शुभाम् ॥ -१०

जय शङ्कर सोमेश रक्ष रक्षेति चाब्रवीत् ।
जजाप शिवसाहस्रं भुक्तिमुक्तिप्रदं विभोः ॥
अनन्यमानसः शान्तः पद्मासनगतः शुचिः ॥ -११

ततस्ते विस्मयापन्ना दृष्ट्वा कृष्णविचेष्टितम् ।
मार्कण्डेयोऽवदत्कृष्णं बहुशो मुनिसंमतम् ॥ -१२

मार्कण्डेय उवाच —

त्वं विष्णुः कमलाकान्तः परमात्मा जगद्गुरुः ।
भवत्पूज्यः कथं शम्भुरेतत्सर्वं वदस्व मे ॥ -१३

व्यास उवाच —

अथ ते मुनयः सर्वे मार्कण्डेयं समार्चयन् ॥ -१४

वचोभिर्वासुदेवश्च पृष्टः साधु त्वयेति च ।

कृष्ण उवाच —

साधु साधु मुने पृष्टं हिताय सकलस्य च ॥ -१५

अज्ञातं तव नास्त्येव तथापि च वदाम्यहम् ।
दैवतं सर्वलोकानां सर्वकारणकारणम् ॥ -१६

ज्योतिर्यत्परमानन्दं सावधानमतिः शृणु ।
विश्वसाधनमीशानं गुणातीतमजं परम् ॥ -१७

जगतस्तस्थुषो ह्यात्मा मम मूलं महामुने ।
यो देवः सर्वदेवानां ध्येयः पूज्यः सदाशिवः ॥ -१८

स शिवः स महादेवः शङ्करश्च निरञ्जनः ।
तस्मान्नान्यः परो देवस्त्रिषु लोकेषु विद्यते ॥ -१९

सर्वज्ञः सर्वगः शक्तः सर्वात्मा सर्वतोमुखः ।
पठ्यते सर्वसिद्धान्तैर्वेदान्तैर्यो मुनीश्वराः ॥ -२०

तस्मिन्भक्तिर्महादेवे मम धातुश्च निर्मला ।
महेशः परमं ब्रह्म शान्तः सूक्ष्मः परात्परः ॥ -२१

सर्वान्तरः सर्वसाक्षी चिन्मयस्तमसः परः ।
निर्विकल्पो निराभासो निःसङ्गो निरुपद्रवः ॥ -२२

निर्लेपः सकलाध्यक्षो महापुरुष ईश्वरः ।
तस्य चेच्छाऽभवत्पूर्वं जगत्स्थित्यन्तकारिणी ॥ -२३

वामाङ्गादभवं तस्य सोऽहं विष्णुरिति स्मृतः ।
जनयामास धातारं दक्षिणाङ्गात्सदाशिवः ॥ -२४

मध्यतो रुद्रमीशानं कालात्मा परमेश्वरः ।
तपः कुर्वन्तु भो वत्सा अब्रवीदिति ताञ्छिवः ॥ -२५

ततस्ते शिवमात्मानं प्रोचुः संयतमानसाः ।
स्तुत्वा तु विविधैः स्तोत्रैः प्रणम्य च पुनःपुनः ॥ -२६

ब्रह्मविष्णुमहेश्वरा ऊचुः —

तपः केन प्रकारेण कर्तव्यं परमेश्वर ।
ब्रूहि सर्वमशेषेण स्वात्मानं वेत्सि नापरः ॥ -२७

श्रीमहादेव उवाच —

कायेन मनसा वाचा ध्यानपूजाजपादिभिः ।
कामक्रोधादिरहितं तपः कुर्वन्तु भोः सुराः ॥ -२८

देवा ऊचुः —

त्वया यत्कथितं शम्भो दुर्ज्ञेयमजितात्मभिः ।
सौम्योपायमतो ब्रूहि नवद कारुण्यवारिधे ॥ -२९

श्रीशङ्कर उवाच –

शृणुध्वं सर्वपापघ्नं भुक्तिमुक्तिप्रदं नृणाम् ।
सहस्रनामसद्विद्यां जपन्तु मम सुव्रताः ॥ -३०

यया संसारमग्नानां मुक्तिर्भवति शाश्वती ।
शृण्वन्तु तद्विधानं हि महापातकनाशनम् ॥ -३१

पठतां शृण्वतां सद्यो मुक्तिः स्यादनपायिनी ।
ब्रह्मचारी कृतस्नानः शुक्लवासा जितेन्द्रियः ॥ -३२

भस्मधारी मुनिर्मौनी पद्मासनसमन्वितः ।
ध्यात्वा मां सकलाधीशं निराकारं निरीश्वरम् ॥ -३३

पार्वतीसहितं शम्भुं जटामुकुटमण्डितम् ।
दधानं चर्म वैयाघ्रं चन्द्रार्धकृतशेखरम् ॥ -३४

त्र्यम्बकं वृषभारूढं कृत्तिवासस्समुज्ज्वलम् ।
सुरार्चितपदद्वन्द्वं दिव्यभोगं सुसुन्दरम् ॥ -३५

बिभ्राणं सुप्रसन्नं च कुठारवरदाभयम् ।
दुर्दर्शं कमलासीनं नागयज्ञोपवीतिनम् ॥ -३६

विश्वकायं चिदानन्दं शुद्धमक्षरमव्ययम् ।
सहस्रशिरसं शर्वमनन्तकरसंयुतम् ॥ ३७

सहस्रचरणं दिव्यं सोमसूर्याग्निलोचनम् ।
जगद्योनिमजं ब्रह्म शिवमाद्यं सनातनम् ॥ -३८

दंष्ट्राकरालं दुष्प्रेक्ष्यं सूर्यकोटिसमप्रभम् ।
निशाकरकराकारं भेषजं भवरोगिणाम् ॥ -३९

पिनाकिनं विशालाक्षं पशूनां पतिमीश्वरम् ।
कालात्मानं कालकालं देवदेवं महेश्वरम् ॥ -४०

ज्ञानवैराग्यसम्पन्नं योगानन्दकरं परम् ।
शाश्वतैश्वर्यसम्पन्नं महायोगीश्वरेश्वरम् ॥ -४१

समस्तशक्तिसम्युक्तं पुण्यकायं दुरासदम् ।
तारकं ब्रह्म सम्पूर्णमणीयांसं महत्तमम् ॥ -४२

यतीनां परमं ब्रह्म व्रतिनां तपसः फलम् ।
सम्यमीहृत्समासीनं (?) तपस्विजनसंवृतम् ॥ -४३

विधीन्द्रविष्णुनमितं मुनिसिद्धनिषेवितम् ।
महादेवं महात्मानं देवानामपि दैवतम् ॥ -४४

शान्तं पवित्रमोङ्कारं ज्योतिषां ज्योतिरुत्तमम् ।
ततः पठेद्धि कवचं मम सर्वाघनाशनम् ॥ -४५

शङ्करो मे शिरः पातु ललाटं फाललोचनः ।
विश्वचक्षुर्दृशौ पातु भ्रुवौ रुद्रो ममावतु ॥ -४६

गण्डौ पातु महेशानः श्रुती रक्षतु पूर्वजः ।
कपोलौ मे महादेवः पातु नासां सदाशिवः ॥ -४७

मुखं पातु हविर्भोक्ता ओष्ठौ पातु महेश्वरः ।
दन्तान्रक्षतु देवेशस्तालू सोमकलाधरः ॥ -४८

रसनां परमानन्दः पातु शङ्खौ शिवाप्रियः ।
चुबुकं पातु मे शम्भुः श्मश्रूञ्छत्रुविनाशनः ॥ -४९

कूर्चं पातु भवः कण्ठं नीलकण्ठोऽवतु ध्रुवम् ।
स्कन्धौ स्कन्दगुरुः पातु बाहू पातु महाभुजः ॥ -५०

उपबाहू महावीर्यः करौ विबुधसत्तमः ।
अङ्गुलीः पातु पञ्चास्यः पर्वाणि च सहस्रपात् ॥ -५१

हृदयं पातु सर्वात्मा स्तनौ पातु पितामहः ।
उदरं हुतभुक्पातु मध्यं मे मध्यमेश्वरः ॥ -५२

कुक्षिं पातु भवानीशः पृष्ठं पातु कुलेश्वरः ।
प्राणान्मे प्राणदः पातु नाभिं भीमः कटिं विभुः ॥ -५३

सक्थिनी पातु मे भर्गो जानुनी जनताधिपः ।
जङ्घे पुररिपुः पातु चरणौ भवनाशनः ॥ -५४

शरीरं पातु मे शर्वो बाह्यमाभ्यन्तरं शिवः ।
इन्द्रियाणि हरः पातु सर्वत्र जयवर्धनः ॥ -५५

पूर्वे मम मृडः पातु दक्षिणे यमसूदनः ।
वारुण्यां सलिलाधीश उदीच्यां मे महीधरः ॥ -५६

ऐशान्यां पातु भूतेशश्चाग्नेय्यां रविलोचनः ।
नैरृत्यां भूतभृत्पातु वायव्यां बलवर्धनः ॥ -५७

ऊर्ध्वं पातु मखद्वेषी ह्यधः संसारनाशनः ।
सर्वतः सुखदः पातु बुद्धिं पातु सुलोचनः ॥ -५८

एवं न्यासविधिं कृत्वा साक्षाच्छम्भुमयो भवेत् ।
नमो हिरण्यबाह्वादि पठेन्मन्त्रं तु भक्तितः ॥ -५९

सद्योजातादिभिर्मन्त्रैर्नमस्कुर्यात्सदाशिवम् ।
ततः सहस्रनामेदं पठितव्यं मुमुक्षुभिः ॥ -६०

सर्वकार्यकरं पुण्यं महापातकनाशनम् ।
सर्वगुह्यतमं दिव्यं सर्वलोकहितप्रदम् ॥ -६१

मन्त्राणां परमो मन्त्रो भवदुःखषड्ऊर्मिहृत् ।
ओं नमः शम्भवे चेति षड्भिर्मन्त्रैः षडङ्गकम् * ॥
न्यासं कृत्वा तु विधिवत्सम्यग्ध्यानं ततश्चरेत् ॥ -६२

*

* न्यासविधिध्यानादिकमुत्तरत्र विवरणमध्ये वक्ष्यते ॥

ॐ

॥ वेदसारशिवसहस्रनामस्तोत्रम्* ॥

नमः पराय देवाय शङ्कराय महात्मने ।
कामिने नीलकण्ठाय निर्मलाय कपर्दिने ॥ -१

निर्विकल्पाय शान्ताय निरहङ्कारिणे नमः ।
अनघाय विशालाय सालहस्ताय ते नमः ॥ -२

निरञ्जनाय शर्वाय श्रुताय च परात्मने ।
नमः शिवाय भर्गाय गुणातीताय वेधसे ॥ -३

महादेवाय वीताय पार्वतीपतये नमः ।
केवलाय महेशाय विशुद्धाय बुधात्मने ॥ -४

कैवल्याय सुदेशाय निःस्पृहाय स्वरूपिणे ।
नमः सोमविभूषाय कालायामिततेजसे ॥ -५

अजिराय जगत्पित्रे जनकाय पिनाकिने ।
निराधाराय सिद्धाय मायातीताय ते नमः ॥ -६

बीजाय सर्पभूषाय पशूनां पतये नमः ।
पुरन्दराय भद्राय पुरुषाय महीयसे ॥ -७

---

* ऋष्यादिन्यासपूर्वकं पठनीयमिति स्थितिः ।

महासन्तोषरूपाय ज्ञानिने शुद्धबुद्धये ।
नमो वृद्धस्वरूपाय तपसे परमात्मने ॥ -८

पूर्वजाय सुरेशाय ब्रह्मणेऽनन्तमूर्तये ।
निरक्षराय सूक्ष्माय कैलासपतये नमः ॥ -९

निरामयाय कान्ताय निरातङ्काय ते नमः ।
निरालम्बाय विश्वाय नित्याय यतये नमः ॥ -१०

आत्मारामाय भव्याय पूज्याय परमेष्ठिने ।
विकर्तनाय सूर्याय शम्भवे विश्वरूपिणे ॥ -११

ताराय हंसनाथाय प्रतिसर्याय ते नमः ।
परावरेशरुद्राय भावायालङ्घ्यशक्तये ॥ -१२

इन्द्रध्वंसनिधीशाय कालहन्त्रे मनस्विने ।
विश्वमात्रे जगद्धात्रे जगन्नेत्रे नमो नमः ॥ -१३

जटिलाय विरागाय पवित्राय मृडाय च ।
निरवद्याय पात्राय स्तेनानां पतये नमः ॥ -१४

नादाय रविनेत्राय व्योमकेशाय ते नमः ।
चतुर्भोगाय साराय योगिनेऽनन्तमायिने ॥ -१५

धर्मिष्ठाय वरिष्ठाय पुरत्रयविघातिने ।
गरिष्ठाय गिरीशाय वरदाय नमो नमः ॥ -१६

व्याघ्रचर्माम्बरायाथ दिशावस्त्राय ते नमः ।
परमप्रेममन्त्राय प्रथमाय सुचक्षुषे ॥ -१७

आद्याय शूलहस्ताय शितिकण्ठाय ते नमः ।
उग्राय वामदेवाय श्रीकण्ठाय नमो नमः ॥ -१८

विश्वेश्वराय सूर्याय गौरीशाय वराय च ।
मृत्युञ्जयाय वीराय वीरभद्राय ते नमः ॥ -१९

कामनाशाय गुरवे मुक्तिनाथाय ते नमः ।
विरूपाक्षाय सूताय वह्निनेत्राय ते नमः ॥ -२०

जलन्धरशिरश्छेत्रे हविषे हितकारिणे ।
महाकालाय वैद्याय सङ्घृणेशाय ते नमः ॥ -२१

नम ओंकाररूपाय सोमनाथाय ते नमः ।
रामेश्वराय शुचये भीमेशाय नमो नमः ॥ -२२

त्र्यम्बकाय निरीहाय केदाराय नमो नमः ।
गङ्गाधराय कवये नागनाथाय ते नमः ॥ -२३

भस्मप्रियाय सूक्ष्माय लक्ष्मीशाय नमो नमः ।
पूर्णाय भूतपतये सर्वज्ञाय दयालवे ॥ -२४

धर्माय धनदेशाय गजचर्माम्बराय च ।
फालनेत्राय यज्ञाय श्रीशैलपतये नमः ॥ -२५

कृशानुरेतसे नीललोहिताय नमो नमः ।
अन्धकासुरहन्त्रे च पावनाय बलाय च ॥ -२६

चैतन्याय त्रिणेत्राय दक्षनाशकराय च ।
नमः सहस्रशिरसे जयरूपाय ते नमः ॥ -२७

सहस्रचरणायाथ योगिहृत्पद्मवासिने ।
सद्योजाताय वन्द्याय सर्वदेवमयाय च ॥ -२८

आमोदाय प्रगल्भाय गायत्रीवल्लभाय च ।
व्योमाकाराय विप्राय नमो विप्रप्रियाय च ॥ -२९

अघोराय सुवेषाय श्वेतरूपाय ते नमः ।
विद्रुत्तमाय चित्राय विश्वग्रासाय नन्दिने ॥ -३०

अधर्मशत्रुरूपाय दुन्दुभेर्मथनाय च ।
अजातशत्रवे तुभ्यं जगत्प्राणाय ते नमः ॥ -३१

नमो ब्रह्मशिरश्छेत्रे पञ्चवक्त्राय खड्गिने ।
नमस्ते हरिकेशाय पञ्चवर्णाय वज्रिणे ॥ -३२

नमः पञ्चाक्षरायाथ गोवर्धनधराय च ।
प्रभवे सर्वलोकानां कालकूटविषादिने ॥ -३३

सिद्धेश्वराय सिद्धाय सहस्रवदनाय च ।
नमः सहस्रहस्ताय सहस्रनयनाय च ॥ -३४

सहस्रमूर्तये तुभ्यं विष्णवे जितशत्रवे ।
काशीनाथाय गेहयाय नमस्ते विश्वसाक्षिणे ॥ -३५

हेतवे सर्वजीवानां पालकाय नमो नमः ।
जगत्संहारकायाथ त्रिधावस्थाय ते नमः ॥ -३६

एकादशस्वरूपाय नमस्ते वह्निमूर्तये ।
नरसिंहमहादर्पघातिने शरभाय च ॥ -३७

भस्माभ्यक्ताय तीर्थाय जाह्नवीजनकाय च ।
देवदानवदैत्यानां गुरवे ते नमो नमः ॥ -३८

दलिताञ्जनभासाय नमो वायुस्वरूपिणे ।
स्वेच्छामन्त्रस्वरूपाय प्रसिद्धायात्मने नमः ॥ -३९

वृषध्वजाय गोष्ठ्याय जगद्यन्त्रप्रवर्तिने ।
अनाथाय प्रदेशाय विष्णुगर्वहराय च ॥ -४०

हरेर्विधातुः कलहनाशाय च नमो नमः ।
नमस्ते दशहस्ताय गगनाय नमो नमः ॥ -४१

कैवल्यफलदात्रे च परमाय नमो नमः ।
ज्ञानाय ज्ञानगम्याय घण्टारावप्रियाय च ॥ -४२

पद्मासनाय पुष्टाय निर्वाणाय नमो नमः ।
अयोनये सुदेहाय ह्युत्तमाय नमो नमः ॥ -४३

अन्तकालाधिपतये विशालाक्षाय ते नमः ।
कुबेरबन्धवे तुभ्यं सोमाय सुखदायिने ॥ -४४

अमृतेश्वररूपाय कौबेराय नमो नमः ।
प्रियंवदसमर्थाय धन्विने विभवे नमः ॥ -४५

गिरिशाय गिरित्राय गिरिशन्ताय ते नमः ।
नमस्ते पारिजाताय पञ्चयज्ञाय ते नमः ॥ -४६

तरुणाय विशिष्टाय बालरूपधराय च ।
जीवितेशाय तुष्टाय पुष्टानां पतये नमः ॥ -४७

भवहेतवे हिरण्याय कनिष्ठाय नमो नमः ।
मध्यमाय विधात्रे ते शूराय सुभगाय च ॥ -४८

आदित्यतापनायाथ नमस्ते रुद्रमन्यवे ।
महाह्रदाय ह्रस्वाय वामनाय नमो नमः ॥ -४९

नमस्तत्पुरुषायाथ चतुर्हस्ताय ते नमः ।
नमो धूर्जटये तुभ्यं जगदीशाय ते नमः ॥ -५०

जगन्नाथस्वरूपाय लीलाविग्रहरूपिणे ।
अनघाय नमस्तुभ्यममराय नमो नमः ॥ -५१

अमृताय नमस्तुभ्यमच्छात्राय नमो नमः ।
लोकाध्यक्षाय वै तुभ्यमनादिनिधनाय च ॥ -५२

व्यक्तेतराय व्यक्ताय नमस्ते परमाणवे ।
लघुस्थूलस्वरूपाय नमः परशुधारिणे ॥ -५३

नमः खट्वाङ्गहस्ताय नागहस्ताय ते नमः ।
वरदाभयहस्ताय घण्टाहस्ताय ते नमः ॥ -५४

घस्मराय नमस्तुभ्यमजिताय नमो नमः ।
अणिमादिगुणेशाय पञ्चब्रह्ममयाय च ॥ -५५

पुरातनाय शुद्धाय बलप्रमथनाय च ।
पुण्योदयाय पद्माय विरक्ताय नमो नमः ॥ -५६

उदाराय विचित्राय विचित्रगतये नमः ।
वाग्विशुद्धाय चितये निर्गुणाय नमो नमः ॥ -५७

परमेशाय शेषाय नमः पद्मवराय च ।
महेन्द्राय सुशीलाय करवीरप्रियाय च ॥ -५८

महापराक्रमायाय नमस्ते कालरूपिणे ।
विष्टरश्रवसे लोकचूडारत्नाय ते नमः ॥ -५९

साम्राज्यकल्पवृक्षाय नमस्तुभ्यं त्विषीमते ।
वरेण्याय नमस्तुभ्यं वज्ररूपाय ते नमः ॥ -६०

परमज्योतिषे पद्मगर्भाय सलिलाय च ।
तत्त्वाधिकाय सर्गाय नमो दीर्घाय स्रग्विणे ॥ -६१

नमस्ते पाण्डराङ्गाय घोराय ब्रह्मरूपिणे ।
निष्कलाय नमस्तुभ्यं प्रपथ्याय नमो नमः ॥ -६२

नमो जयाय क्षेत्राय क्षेत्राणां पतये नमः ।
कलाधराय पूताय पञ्चभूतात्मने नमः ॥ -६३

अनिर्विण्णाय तथ्याय पापनाशकराय च ।
विश्वतश्चक्षुषे तुभ्यं मन्त्रिणेऽनन्तरूपिणे ॥ -६४

सिद्धसाधकरूपाय मेदिनीरूपिणे नमः ।
अगण्याय प्रतापाय सुधाहस्ताय ते नमः ॥ -६५

श्रीवल्लभायेध्रियाय नमस्ते मधुराय च ।
उपाधिरहितायाथ नमः सुकृतराशये ॥ -६६

नमो मुनीश्वरायाथ शिवानन्दाय ते नमः ।
रिपुघ्नाय नमस्तेजोराशयेऽनुत्तमाय च ॥ -६७

चतुर्मूर्तिवपुस्स्थाय नमो बुद्धीन्द्रियात्मने ।
उपद्रवहरायाथ प्रियसन्दर्शनाय च ॥ -६८

भूतनाथाय मूलाय वीतरागाय ते नमः ।
नैष्कर्म्याय विरूपाय षट्चक्राय विशुद्धये ॥ -६९

कुलेशायावनि(नी)भर्त्रे भुवनेशाय ते नमः ।
हिरण्यबाहवे जीववरदाय नमो नमः ॥ -७०

आदिदेवाय भाग्याय चन्द्रसञ्जीवनाय च ।
हराय बहुरूपाय प्रसन्नाय नमो नमः ॥ -७१

आनन्दपूरितायाथ कूटस्थाय नमो नमः ।
नमो मोक्षफलायाथ शाश्वताय विरागिणे ॥ -७२

यज्ञभोक्त्रे सुषेणाय दक्षयज्ञविघातिने ।
नमः सर्वात्मने तुभ्यं विश्वपालाय ते नमः ॥ -७३

विश्वगर्भाय गर्भाय देवगर्भाय ते नमः ।
संसारार्णवमग्नानां समुद्धरणहेतवे ॥ -७४

मुनिप्रियाय खल्लाय मूलप्रकृतये नमः ।
समस्तसिद्धये तेजोमूर्तये ते नमो नमः ॥ -७५

आश्रमस्थापनायाथ वर्णिने सुन्दराय च ।
मृगबाणार्पणायाथ शारदावल्लभाय च ॥ -७६

विचित्रमायिने तुभ्यमलङ्करिष्णवे नमः ।
बर्हिर्मुखमहादर्पमथनाय नमो नमः ॥ -७७

नमोऽष्टमूर्तये तुभ्यं निष्कलङ्काय ते नमः ।
नमो हव्याय भोज्याय यक्षनाथाय ते नमः ॥ -७८

नमो मेध्याय मुख्याय विशिष्टाय नमो नमः ।
अम्बिकापतये तुभ्यं महादान्ताय ते नमः ॥ -७९

सत्यप्रियाय सत्याय प्रियनित्याय ते नमः ।
नित्यतृप्ताय वेदित्रे मृदुहस्ताय ते नमः ॥ -८०

अर्धनारीश्वरायाथ कुठारायुधपाणये ।
वराहभेदिने तुभ्यं नमः कङ्कालधारिणे ॥ -८१

महार्थाय सुसत्त्वाय कीर्तिस्तम्भाय ते नमः ।
नमः कृतागमायाथ वेदान्तपठिताय च ॥ -८२

अश्रोत्राय श्रुतिमते बहुश्रुतिधराय च ।
अघ्राणाय नमस्तुभ्यं गन्धावघ्राणकारिणे ॥ -८३

पादहीनाय वोढ्रे च सर्वत्रगतये नमः ।
त्र्यक्षाय जननेत्राय नमस्तुभ्यं चिदात्मने ॥ -८४

रसज्ञाय नमस्तुभ्यं रसनारहिताय च ।
अमूर्तायाथ (य च) मूर्ताय सदसस्पतये नमः ॥ -८५

नमो जितेन्द्रियायाथ परञ्ज्योतिःस्वरूपिणे ।
नमस्ते सर्वमर्त्यानामादिकर्त्रे भुवन्तये ॥ -८६

सर्गस्थितिविनाशानां कर्त्रे ते प्रेरकाय च ।
नमोऽन्तर्यामिणे सर्वहृदिस्थाय नमो नमः ॥ -८७

चक्रभ्रमणकर्त्रे ते पुराणाय नमो नमः ।
वामदक्षिणहस्तात्थलोकेशहरिशालिने ॥ -८८

नमः सकलकल्याणदायिने प्रसवाय च ।
स्वभावोदारधीराय सूत्रकाराय ते नमः ॥ -८९

विषयार्णवमग्नानां समुद्धरणसेतवे ।
अस्नेहस्नेहरूपाय वार्तातिक्रान्तवर्तिने ॥ -९०

यत्र सर्वं यतः सर्वं सर्वं यत्र नमो नमः ।
नमो महार्णवायाथ भास्कराय नमो नमः ॥ -९१

भक्तिगम्याय भक्तानां सुलभाय नमो नमः ।
दुष्प्रधर्षाय दुष्टानां विजयाय विवेकिनाम् ॥ -९२

अतर्किताय लोकाय सुलोकाय नमो नमः ।
पूरयित्रे विशेषाय शुभाय च नमो नमः ॥ -९३

नमः कर्पूरदेहाय सर्पहाराय ते नमः ।
नमः संसारपाराय कमनीयाय ते नमः ॥ -९४

वह्निदर्पविघाताय वायुदर्पविघातिने ।
जरातिगाय वीर्याय विश्वस्य व्यापिने नमः ॥ -९५

सूर्यकोटिप्रतीकाशनिष्क्रियाय नमो नमः ।
चन्द्रकोटिसुशीताय विमलाय नमो नमः ॥ -९६

नमो गूढस्वरूपाय दिशां च पतये नमः ।
नमः सत्यप्रतिज्ञाय समस्ताय समाधये ॥ -९७

एकरूपाय शून्याय विश्वनाभिहृदाय च ।
सर्वोत्तमाय कौलाय प्राणिनां सुहृदे नमः ॥ -९८

अन्नानां पतये तुभ्यं चिन्मात्राय नमो नमः ।
ध्येयाय ध्यानगम्याय ध्यानरूपाय ते नमः ॥ -९९

नमस्ते शाश्वतैश्वर्यविभवाय नमो नमः ।
वरिष्ठायाथ गोप्त्रे च निधानायाग्रजाय च ॥ -१००

योगीश्वराय योगाय योगगम्याय ते नमः ।
नमः प्राणेश्वरायाथ सर्वशक्तिधराय च ॥ -१०१

धर्माधाराय धन्याय पुष्कलाय नमो नमः ।
महेन्द्रोपेन्द्रचन्द्रार्कनमिताय नमो नमः ॥ १०२

महर्षिवन्दितायाथ प्रकाशाय सुधर्मिणे ।
नमो हिरण्यगर्भाय नमो हिरण्मयाय च ॥ -१०३

जगद्बीजाय हरये सेव्याय क्रतवे नमः ।
आधिपत्याय कामाय यशसे ते प्रचेतसे ॥ -१०४

नमो ब्रह्ममयायाथ सकलाय नमो नमः ।
नमस्ते रुक्मवर्णाय नमस्ते ब्रह्मयोनये ॥ -१०५

योगात्मने त्वभीताय दिव्यनृत्ताय ते नमः ।
जगतामेकबीजाय मायाबीजाय ते नमः ॥ -१०६

सर्वहृत्सन्निविष्टाय ब्रह्मचक्रभ्रमाय च ।
ब्रह्मानन्दाय महते ब्रह्मण्याय नमो नमः ॥ -१०७

भूरिभारार्तिसंहर्त्रे विधिसारथये नमः ।
हिरण्यगर्भपुत्राणां प्राणसंरक्षणाय च ॥ -१०८

दुर्वाससे षड्विकाररहिताय नमो नमः ।
नमो देहार्धकान्ताय षडूर्मिरहिताय च ॥ -१०९

प्रकृत्यै भवनाशाय ताम्राय परमेष्ठिने ।
अनन्तकोटिब्रह्माण्डनायकाय नमो नमः ॥ -११०

एकाकिने निर्मलाय द्रविणाय दमाय च ।
नमस्त्रिलोचनायाथ शिपिविष्टाय बन्धवे ॥ -१११

त्रिविष्टपेश्वरायाथ नमो व्याघ्रेश्वराय च ।
विश्वेश्वराय दात्रे ते नमश्चन्द्रेश्वराय च ॥ -११२

व्यासेश्वराय युधिने यज्ञकेशाय ते नमः ।
जैगीषव्येश्वरायाथ दिवोदासेश्वराय च ॥ -११३

नागेश्वराय न्यायाय न्यायनिर्वाहकाय च ।
शरण्याय सुपात्राय कालचक्रप्रवर्तिने ॥ -११४

विचक्षणाय दंष्ट्राय वेदाश्वाय नमो नमः ।
नीलजीमूतदेहाय परात्मज्योतिषे नमः ॥ -११५

शरणागतपालाय महाबलपराय च ।
सर्वपापहरायाथ महानादाय ते नमः ॥ -११६

कृष्णस्य जन्मदात्रे ते त्रिल्वकेशाय ते नमः ।
दिव्यभोगाय दूताय कोविदाय नमो नमः ॥ -११७

कामपाशाय चित्राय चित्राङ्गाय नमो नमः ।
नमो मातामहायाथ नमस्ते मातरिश्वने ॥ -११८

निःसङ्गाय सुनेत्राय विघ्नेशाय जयाय च ।
व्याजसंमर्दनायाथ मध्यस्थाय नमो नमः ॥ ११९

अङ्गुष्ठशिरसा लङ्कानाथदर्पहराय च ।
वैयाघ्रपुरवासाय नमःसर्वेश्वराय च ॥ -१२०

नमः परावरेशाय जगत्स्थावरमूर्तये ।
नमोऽप्यनुपमेशाय शार्ङ्गिणे विष्णुमूर्तये ॥ -१२१

नारायणाय रामाय सुदीप्ताय नमो नमः ।
नमो ब्रह्माण्डमालाय गोधराय वरूथिने ॥ -१२२

नमः सोमाय कूप्याय नमः पातालवासिने ।
नमस्ताराधिनाथाय वागीशाय नमो नमः ॥ -१२३

सदाचाराय गौराय स्वायुधाय नमो नमः ।
अतर्क्याप्रमेयाय प्रमाणाय नमो नमः ॥ -१२४

कलिग्रासाय भक्तानां भुक्तिमुक्तिप्रदायिने ।
संसारमोचनायाथ वर्णिने लिङ्गरूपिणे ॥ -१२५

सच्चिदानन्दरूपाय पापराशिहराय च ।
गजारये विदेहाय त्रिलिङ्गरहिताय च ॥ -१२६

अचिन्त्यशक्तयेऽलङ्घ्यशासनायाच्युताय च ।
नमो राजाधिराजाय चैतन्यविषयाय च ॥ -१२७

नमः शुद्धात्मने ब्रह्मज्योतिषे स्वस्तिदाय च ।
मयोभुवे दुर्विज्ञेयसामर्थ्याय च यज्वने ॥ -१२८

चक्रेश्वराय वै तुभ्यं नमो नक्षत्रमालिने ।
अनर्थनाशनायाथ भस्मलेपकराय च ॥ -१२९

सदानन्दाय विदुषे सगुणाय विरोधिने ।
दुर्गमाय शुभाङ्गाय मृगव्याधाय ते नमः ॥ -१३०

प्रियाय धर्मधाम्ने ते प्रयोगाय विभागिने ।
नाद्यायामृतपायाथ सोमपाय तपस्विने ॥ -१३१

नमो विचित्रवेषाय पुष्टिसंवर्धनाय च ।
चिरन्तनाय धनुषे वृक्षाणां पतये नमः ॥ -१३२

निर्मायायाग्रगण्याय व्योमातीताय ते नमः ।
संवत्सराय लोप्याय स्थानदाय स्थविष्णवे ॥ -१३३

व्यवसायफलान्ताय महाकर्तृप्रियाय च ।
गुणत्रयस्वरूपाय नमः सिद्धस्वरूपिणे ॥ -१३४

नमः स्वरूपरूपाय स्वेच्छाय पुरुषाय च ।
कालात्पराय वेद्याय नमो ब्रह्माण्डरूपिणे ॥ -१३५

अनित्यनित्यरूपाय तदन्तर्वर्तिने नमः ।
नमस्तीर्थ्याय कूल्याय पूर्णाय वटवे नमः ॥ -१३६

पञ्चतन्मात्ररूपाय पञ्चकर्मेन्द्रियात्मने ।
विशृङ्खलाय दर्पाय नमस्ते विषयात्मने ॥ -१३७

अनवद्याय शास्त्राय स्वतन्त्रायामृताय च ।
नमः प्रौढाय प्रज्ञाय योगारूढाय ते नमः ॥ -१३८

मन्त्रज्ञाय प्रगल्भाय प्रदीपविमलाय च ।
विश्वावासाय दक्षाय वेदनिःश्वसिताय च ॥ -१३९

यज्ञाङ्गाय सुवीराय नागचूडाय ते नमः ।
व्याघ्राय बाणहस्ताय नमः स्कन्दाय दक्षिणे ॥ -१४०

क्षेत्रज्ञाय रहस्याय स्वस्थानाय वरीयसे ।
गहनाय विरामाय सिद्धान्ताय नमो नमः ॥ -१४१

महीधराय गृह्याय वटवृक्षाय ते नमः ।
ज्ञानदीपाय दुर्गाय सिद्धान्तैर्निश्चिताय च ॥ -१४२

श्रीमते मुक्तिबीजाय कुशलाय विवासिने ।
प्रेरक्षाय विशोकाय हविर्धानाय ते नमः ॥ -१४३

गम्भीराय सहायाय भोजनाय सुभोगिने ।
महायज्ञाय तीक्ष्णाय नमस्ते भूतचारिणे ॥ -१४४

नमः प्रतिष्ठितायाथ महोत्साहाय ते नमः ।
परमार्थाय शिशवे प्रांशवे च कपालिने ॥ -१४५

सहजाय गृहस्थाय सन्ध्यानाथाय विष्णवे ।
सद्भिः सम्पूजितायाथ वितलासुरघातिने ॥ -१४६

जनाधिपाय योग्याय कामेशाय किरीटिने ।
अमोघविक्रमायाथ नम्राय दलघाटिने ॥ -१४७

सङ्ग्रामाय नरेशाय नमस्ते शुचिभस्मने ।
भूतिप्रियाय भूम्ने ते सेनाय चतुराय च ॥ -१४८

मनुष्यबाह्यगतये कृतज्ञाय शिखण्डिने ।
निर्लेपाय जटार्द्राय महाकालाय भैरवे ॥ -१४९

नमो विरूपरूपाय शक्तिगम्याय ते नमः ।
नमः सर्वाय सदसत्सत्याय सुव्रताय च ॥ -१५०

नमो भक्तप्रियायाथ श्वेतरक्षापराय च ।
सुकुमारमहापापहराय रथिने नमः ॥ -१५१

नमस्ते धर्मराजाय धनाध्यक्षाय सिद्धये ।
महाभूताय कल्पाय कल्पनारहिताय च ॥ -१५२

ख्याताय जितविश्वाय गोकर्णाय सुचारवे ।
श्रोत्रियाय वदान्याय दुर्लभाय कुटुम्बिने ॥ -१५३

विरजाय सुगन्धाय नमो विश्वम्भराय च ।
भवातीताय तिष्याय नमस्ते सामगाय च ॥ -१५४

चिन्मयाय नमः शुक्लज्योतिषे क्षेत्रगाय च ।
अद्वैताय द्वितीयाय कल्पराजाय भोगिने ॥ -१५५

सर्वभोगसमृद्धाय साम्परायाय ते नमः ।
नमस्ते स्वप्रकाशाय स्वच्छन्दाय सुतन्तवे ॥ -१५६

सर्वज्ञमूर्तये तुभ्यं गुह्येशाय सुशान्तये ।
शारदाय सुशीलाय कौशिकाय धनाय च ॥ -१५७

अभिरामाय तत्त्वाय व्यालकल्पाय ते नमः ।
अरिष्टमथनायाथ सुप्रतीकाय ते नमः ॥ -१५८

आशवे ब्रह्मगर्भाय वरुणायाद्रये नमः ।
नमः कालाग्निरुद्राय श्यामाय सुजनाय च ॥ -१५९

अहिर्बुध्न्याय जाराय दुष्टानां पतये नमः ।
नमः समयनाथाय समयाय गुहाय च ॥ -१६०

दुर्लङ्घ्याय नमस्तुभ्यं छन्दःसाराय दंष्ट्रिणे ।
ज्योतिर्लिङ्गाय मित्राय जगतां हितकारिणे ॥ -१६१

नमः कारुण्यनिधये श्लोकाय जयशालिने ।
ज्ञानोदयाय बीजाय जगद्विभ्रमहेतवे ॥ -१६२

अवधूताय शिष्टाय छन्दसां पतये नमः ।
नमः फेन्याय गुह्याय सर्वबन्धविमोचिने ॥ -१६३

उदारकीर्तये शश्वत्प्रसन्नवदनाय च ।
वसवे वेदकाराय नमो भ्राजिष्णुजिष्णवे ॥ -१६४

चक्रिणे देवदेवाय गदाहस्ताय पुत्रिणे ।
पारिजातसुपुष्पाय गणाधिपतये नमः ॥ -१६५

सर्वशाखाधिपतये प्रजनेशाय ते नमः ।
सूक्ष्मप्रमाणभूताय सुरपार्श्वगताय च ॥ -१६६

अशरीरशरीराय अपगल्भाय ते नमः ।
सुकेशाय सुपुष्पाय श्रुतये पुष्पमालिने ॥ -१६७

मुनिध्येयाय मुनये बीजसंस्थमरीचये ।
चामुण्डाजनकायाथ नमस्ते कृत्तिवाससे ॥ -१६८

व्युप्तकेशाय योग्याय धर्मपीठाय ते नमः ।
महावीर्याय दीप्ताय बुद्धायाशनये नमः ॥ -१६९

विशिष्टेष्टाय सेनान्ये द्विपदे कारणाय च ।
कारणानां भगवते बाणदर्पहराय च ॥ -१७०

अतीन्द्रियाय रम्याय जनानन्दकराय च ।
सदाशिवाय सौम्याय चिन्त्याय शशिमौलिने ॥ -१७१

नमस्ते जातुकर्णाय सूर्याध्यक्षाय ते नमः ।
ज्योतिषे कुण्डलीशस्य वरदायाभयाय च ॥ -१७२

वसन्ताय सुरभये जयारिमथनाय च ।
प्रेम्णे पुरञ्जयायाथ पृषदश्वाय ते नमः ॥ -१७३

रोचिष्णवेऽसुरजिते श्वेतपीताय ते नमः ।
नमस्ते चञ्चरीकाय तमिस्रमथनाय च ॥ -१७४

प्रमाथिने निदाघाय चित्रगर्भाय ते नमः ।
शिवालयाय स्तुत्याय तीर्थदेवाय ते नमः ॥ -१७५

पत्तीनां पतये तुभ्यं विचित्रशक्तये नमः ।
नमो निस्तुलरूपाय सवित्रे तपसे नमः ॥ -१७६

अहङ्कारस्वरूपाय मेधाधिपतये नमः ।
अपाराय तत्वविदे क्षयद्वीराय ते नमः ॥ -१७७

पञ्चास्यायाग्रगण्याय विष्णुप्राणेश्वराय च ।
अगोचराय याम्याय क्षेम्याय बडवाग्नये ॥ -१७८

विक्रमाय स्वतन्त्राय स्वतन्त्रगतये नमः ।
वनानां पतये तुभ्यं नमस्ते जमदग्नये ॥ -१७९

अनावृत्ताय मुक्ताय मातृकापतये नमः ।
नमस्ते बीजकोशाय दिव्यानन्दाय ते नमः ॥ -१८०

नमस्ते विश्वदेवाय शान्तरागाय ते नमः ।
विलोचनसुदेवाय हेमगर्भाय ते नमः ॥ -१८१

अनाद्यन्ताय चण्डाय नमो नाथाय ते नमः ।
ज्ञानस्कन्दाय तुष्टाय कपिलाय महर्षये ॥ -१८२

नमस्त्रिकाग्निकालाय देवसिद्धाय ते नमः ।
नमस्ते मणिपूराय चतुर्वेदाय ते नमः ॥ -१८३

स्वरूपाणां स्वभावाय चान्तर्योगाय ते नमः ।
नमः श्लोक्याय वन्याय महाधर्माय ते नमः ॥ -१८४

प्रसन्नाय नमस्तुभ्यं सर्वात्मज्योतिषे नमः ।
स्वयम्भुवे त्रिमूर्तीनामध्वातीताय ते नमः ॥ -१८५

उत्तरन्यासः

ध्यानं, पञ्चपूजा च पूर्ववत् ॥

'सहस्रनामस्तोत्रपाठे कृतादरैः पूर्वोत्तरभागसहिततयैव पाठः करणीय' इति नियमो विदितचरोऽपि स्मार्यते ॥

AN APPEAL

Manuscripts on Palm Leaf or Paper of the ancient works of the wise men of the past, are the great treasures, solely inherited by the Nation and it is the moral obligation of persons who possess them to preserve them safely for the future generations of mankind.

Probably you have some of these in your possession or you know friends or neighbours who possess them. You can make a great contribution to the cause of the preservation not only of our National Culture but also to the Culture of Humanity as a whole by arranging to present such manuscripts to the famous T. M. S. S. M. Library, Thanjavur.

The manuscripts so presented will be accepted and acknowledged with pleasure and gratitude by the authorities of the Library, preserved with meticulous care and made available to successive generations of readers and scholars for study and research. The hitherto unpublished works found among them, will be printed and published in due course, as facilities occur, with the expression of the Library's gratitude for your gift.

The great Scholar-King of Tanjore, Rajah Serfoji, has attained immortal fame by dedicating enormous time and wealth to the expansion and firm establishment of this world-famous 'Sarasvati Mahal Library.' It is open to you to share the honour of Serfoji, in your own measure by contributing your manuscripts to the great institution built by him.

This great Honour is beckoning to you to accept it. Will you hasten to take it up? The Library waits for your answer.

DIRECTOR,
Sarasvati Mahal Library, Thanjavur.

॥ श्रीः ॥

॥ वेदसारसहस्रम् ॥

(पद्मपुराणान्तर्गतम्)

श्रीपरमहंसपरिव्राजकाचार्यवर्यश्रीपरमशिवेन्द्रसरस्वती-

विरचितव्याख्यासहितम् ॥

मूलम् - शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ॥ -१

ऐश्वरं परमं तत्त्वमादिमध्यान्तवर्जितम् ।
आधारं सर्वभूतानामनाधारमविक्रियम् ॥ -२

अनन्तानन्दबोधाम्बुनिधिमद्भुतविग्रहम् ।
अम्बिकापतिमीशानमनिशं प्रणमाम्यहम् ॥ -३

ऐशमाद्यन्तनिर्मुक्तमतिशोभनमादरात् ।
नमामि विग्रहं साम्बं संसारामयभेषजम् ॥ -४

व्याख्या - महदादिविशेषान्तं जगद्यस्याः समुत्थितम् ।
यस्यामेव लयं याति वन्दे तामम्बिकामहम् ॥

गुरुमूर्तिधरां गुह्यां गुह्यविज्ञानदायिनीम् ।
गुह्यभक्तजनप्रीतां गुहायां निहितां नुमः ॥

नत्वा गणेश्वरं स्कन्दं साम्बं सद्गुरुमेव च ।
वेदसारसहस्रस्य व्याख्या सम्यग्विरच्यते ॥

"काशीखण्डे" विष्णुवचनम् —

कृत्वापि सुमहत्पापं त्वां यः स्मरति भावतः ।
आधारं जगतामीशं तस्य पापं विलीयते ॥

तव नामानुरक्ता वाक् पुंसो यस्य जगत्पते ।
अघ्यद्रिकूटतुलितं नैनस्तमनुबाधते ॥

"आदित्यपुराणे" —

नामानि च महेशस्य गृह्णन्त्यज्ञानतोऽपि ये ।
तेषामपि शिवो मुक्तिं ददाति किमतः परम् ॥

ये स्मरन्ति महादेवं यदि पापरता अपि ।
ते विज्ञेया महात्मान इति सत्यं ब्रवीम्यहम् ।

"ईशानसंहितायाम्" यमं प्रति शिवः —

महादेवादिशब्दस्तु जिह्वाग्रे यस्य वर्तते ।
मम प्रियतमो ह्येष पूज्यस्सर्वैस्त्वया यम ॥

शिवगीतायाम् —

आश्चर्ये वा भये शोके क्षुते वा मम नाम यः ।
व्याजेन वा स्मरेद्यस्तु स याति परमां गतिम् ॥

अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा ।
यः स्मरेच्छिवमीशानं स बाह्याभ्यन्तरे शुचिः ॥

"शिवरहस्ये" सप्तमांशे

शिवनामरसाप्लुष्टरसनाः शिवपूजकाः ।
शिवनामरता नित्यं सन्ति धन्याः क्वचित्क्वचित् ।

यन्नामसङ्कीर्तनमेकमेव
विनाशयत्याशु महाघसङ्घम् ।
तं देवमीड्यं शरणं व्रजामि
ब्रह्मेन्द्रविष्ण्वादिसुरैकवन्द्यम् ॥

यन्नाममात्रोच्चरणेन नित्यं
धन्या भवन्त्येव हि पापिनोऽपि ।
तं देवमीड्यं शरणं व्रजामि
ब्रह्मेन्द्रविष्ण्वादिसुरैकवन्द्यम् ॥

मू — व्यास उवाच -

एकदा मुनयः सर्वे द्वारकां द्रष्टुमागताः ।
वासुदेवं च सोत्कण्ठाः कृष्णदर्शनलालसाः ॥ -५

ततः स भगवान्प्रीतः पूजां चक्रे यथाविधि ।
तेषामाशी(शि)स्ततो गृह्य बहुमानपुरःसरम् ॥ -६

तैः पृष्टः कथयामास कुमारप्रभवं च यत् ।
चरितं भूमिभारघ्नं लोकानन्दकरं परम् ॥ -७

व्या – कुमारप्रभवं तपःकारणं (तपश्चरणम्) शिवप्रसादपूर्वकं साम्बोत्पत्त्यादिप्रकारम् । भूमिभारघ्नं - भूमिभाररूपकंसजरासन्ध-दुर्योधनादिसंहाराङ्कितम् । अत एव लोकानन्दकरं चरित च पृष्टः सन् कथयामासेति संबन्धः ॥

उक्तं च –

"जातः कंसवधार्थाय भूभारोद्धरणाय च ।
कौरवाणां विनाशाय दैत्यानां निधनाय च ॥" इति

मू — मार्कण्डेयमुखाः सर्वे माध्याह्निकक्रियोत्थिताः ।
कृष्णः स्नानमथो चक्रे मृदक्षतकुशादिभिः ॥ -८

पीताम्बरं त्रिपुण्ड्रं च धृत्वा रुद्राक्षमालिकाः ।
सूर्योपस्थानं च सन्ध्यां च स्मृतिधर्ममनुस्मरन् ॥ -९

व्या – अथो ऋषिगमनानन्तरं मृदक्षतकुशादिभिः स्नानादियोग्य-द्रव्यादिभिः । आदिशब्देन गोमयगोशृङ्गपलाशपत्रादिकं मन्त्र-क्रियादिकं च गृह्यते ।

उक्तं च -

"वायव्यसंहितायाम्" - कृष्णं प्रत्युपमन्युना

कृष्णः -

"भगवन् श्रोतुमिच्छामि शिवाश्रमनिषेविणाम् ।
शिवशास्त्रोदितं कर्म नित्यनैमित्तिकं तथा ॥

उपमन्युः –

"प्रातरुत्थाय शयनादि" ति प्रस्तुत्य -

"नद्यां वा देवखाते वा ह्रदे वाथ गृहेऽपि वा ।
स्नानद्रव्याणि तीरे तु स्थापयित्वा बहिर्जले ॥

व्यपोह्य मृदमालिप्य स्नात्वा गोमयमालिपेत् ।
स्नात्वा पुनः पुनर्वस्त्रंत्यक्त्वा वाथ विशोध्य च ॥" इति

अवगाह्य समाचान्ते जले न्यस्य कमण्डलुम् ।
सौम्यमर्कानलं मन्त्रं जपेच्छक्त्या शिवं स्मरेत् ॥

उत्थायाचम्य तेनैव स्वात्मानमभिषेचयेत् ।
गोशृङ्गेण सदर्भेण पालाशेन दलेन वा ॥

पाद्मेन वाथ पाणिभ्यां पञ्चकृत्वस्त्रिरेव वा ।
तर्पयेदथ देवेभ्य ऋषिभ्यश्च विशेषतः ॥

भूतेभ्यश्च पितृभ्यश्च दद्यादर्घ्यं यथाविधि ।
रक्तचन्दनतोयेन हस्तमात्रेण मण्डलम् ॥

सुवृत्तं कल्पयेद्भूमौ रक्तपुष्पाद्यलङ्कृतम् ।
तत्रस्थं हेमपात्राद्य (पात्रं च चूतपल्लव) सम्मितम् (संहित) ॥

पूरयेद्गन्धतोयेन रक्तचन्दनयोजितैः ।
रक्तपुष्पैस्तिलैश्चैव कुशाक्षतसमन्वितैः ॥

दूर्वापामार्गगव्यैश्च केवलेन घृतेन वा ।
जानुभ्यां धरणीं गत्वा नत्वा देवं च मण्डलम् ॥
कृत्वा शिरसि तत्पात्रं दत्वा चार्घ्यं शिवाय तत् ॥" इति च ।

मू — शिवपूजां ततः कृष्णो गन्धपुष्पाक्षतादिभिः ।
चकार विधिवद्भक्त्या नमस्कारयुतां शुभाम् ॥ -१०

जय शङ्कर सोमेश रक्ष रक्षेति चाब्रवीत् ।
जजाप शिवसाहस्रं भुक्तिमुक्तिप्रदं विभोः ॥ -११

अनन्यमानसः शान्तः पद्मासनगतः शुचिः ।
ततस्ते विस्मयापन्ना दृष्ट्वा कृष्णविचेष्टितम् ॥
मार्कण्डेयोऽवदत्कृष्णं बहुशो मुनिसम्मतम् ॥ -१२

व्या — गन्धपुष्पाक्षतादिभिरित्यादिशब्देन धूपदीपादिकं गृह्यते । शिवसाहस्रं वेदसाराख्यम् । अनन्यमानसः शिवैकमानसः मुनिसम्मतं मुनिध्येयमिति यावत् ॥

मू — मार्कण्डेय उवाच -

त्वं कृष्ण (विष्णुः) कमलाकान्तः परमात्मा जगद्गुरो(रु)ः ।
भवत्पूज्यः कथं शम्भुरेतत्सर्वं वदस्व मे ॥ -१३

व्या – 'कमलाकान्त' इत्यादिना विशेषणत्रयेण ऐश्वर्यमोक्षविद्यार्थं शिवपूजा कर्तव्येत्यभिप्रायः ।

मू — व्यास उवाच -

अथ ते मुनयः सर्वे मार्कण्डेयं समार्चयन् ।
वचोभिर्वासुदेवश्च पृष्टः साधु त्वयेति च । -१४

व्या – समार्चयन् स्तुतिं कृतवन्तः ।

मू — कृष्ण उवाच -

साधु साधु मुने पृष्टं हिताय सकलस्य च ।
अज्ञातं तव नास्त्येव तथापि च वदाम्यहम् ॥ -१५

दैवतं सर्वलोकानां सर्वकारणकारणम् ।
ज्योतिर्यत्परमानन्दं सावधानमतिः शृणु ॥ -१६

व्या – दैवतमित्यादि विशेषणचतुष्टयं -

"तमीश्वराणां परमं महेश्वरं
तं देवतानां परमं च दैवतम् ।"

"तं देवा ज्योतिषां ज्योतिः ।"

"एषोऽस्य परम आनन्दः" इत्येवमादि श्रुतिसिद्धम् । सावधानमतिरिति - यद्यपि ममैश्वर्यादिकमस्ति, तथापि सर्वं परमेश्वराधीनमिति श्लोकस्य तात्पर्यम् । अयमेवार्थ उत्तरत्र बहुभिः श्लोकैः स्फुटीकरिष्यामि इत्यतश्चित्तैकाग्र्येण भवितव्यमिति निष्कृष्टोऽर्थः ।

मू — विश्वसाव(ध)नमीशानं गुणातीतमजं परम् ।
जगतस्तस्थुषो ह्यात्मा मम मूलं महामुने ॥ -१७

व्या – जगतो जङ्गमस्य तस्थुषःस्थावरस्य मूलं कारणम् ॥

मू — यो देवः सर्वदेवानां ध्येयः पूज्यः सदाशिवः ।
स शिवः स महादेवः शङ्करश्च निरञ्जनः ॥ -१८

व्या – सर्वदेवानां देव इत्यादि ... ... नाम्नामुत्तरत्र नामसाहस्रव्याख्यायां स्फुटीभविष्यति ॥

मू — तस्मान्नान्यः परो देवस्त्रिषु लोकेषु विद्यते ।
सर्वज्ञः सर्वगः शक्तः सर्वात्मा सर्वतोमुखः ॥ -१९

पठ्यते सर्वसिद्धान्तैर्वेदान्तैर्यो मुनिश्वराः ।
तस्मिन्भक्तिर्महादेवे मम धातुश्च निर्मला ।
महेशः परमं ब्रह्म शान्तः सूक्ष्मः परात्परः ॥ -२१

सर्वान्तरः सर्वसाक्षी चिन्मयस्तमसः परः ।
निर्विकल्पो निराभासो निःसङ्गो निरुपद्रवः ॥ -२२

व्या - निराभासः जन्यज्ञानाविषयः स्वयंप्रकाशरूपत्वात् । अज्ञान-निवृत्त्यर्थं तत्वमस्यादिमहावाक्यजन्यवृत्तिव्याप्तिमात्रमपेक्ष्यते ।

मू — निर्लेपः सकलाध्यक्षो महापुरुष ईश्वरः ।
तस्य चेच्छाऽभवत्पूर्वं जगत्स्थित्यन्तकारिणी ॥ -२३

व्या - पूर्वं - वियदादिसृष्टिसमये । स्थित्यन्तकारिणीत्युपनेरुपलक्षणम् ॥ तथाच परमेश्वरस्य सर्गादौ जगदुत्पत्तिस्थितिसंहारकारिणी माया-वृत्तिरभूत् । तदर्थम् -

मू — वामाङ्गादभवं तस्य सोऽहं विष्णुरिति स्मृतः ।
जनयामास धातारं दक्षिणाङ्गात्सदाशिवः ॥ -२४

मध्यतो रुद्रमीशानं कालात्मा परमेश्वरः ।
तपः कुर्वन्तु भो वत्साः अब्रवीदिति ताञ्छिवः ॥ -२५

व्या - भो वत्साः तपस्तपन्त्विति तान्प्रति अब्रवीदित्यन्वयः ।

मू — ततस्ते शिवमात्मानं प्रोचुः सम्यतमानसाः ।
स्तुत्वा तु विविधैः स्तोत्रैः प्रणम्य च पुनःपुनः ॥ -२६

व्या - ते ब्रह्मविष्णुरुद्राः सम्यतमानसाः सावधानचित्ताः सन्तः । विधिवच्छिरस्यञ्जलिं निधाय प्रदक्षिणत्रयपुरःसरं पुनःपुनः प्रणम्य

द्वादश नमस्कारान्कृत्वा । लौकिकवैदिकस्तोत्रैः स्तुत्वात्मानं प्रत्यगात्मभूतं शिवं प्रोचुरित्यन्वयः ॥

मू — ब्रह्मविष्णुमहेश्वरा ऊचुः —

तपः केन प्रकारेण कर्तव्यं परमेश्वर ।
ब्रूहि सर्वमशेषेण स्वात्मानं वेत्सि नापरः ॥ -२७

व्या — किं तपःशब्दवाच्यम् ? केन प्रकारेण इति कर्तव्यता-विशेषेण 'तपः' कर्तव्यमिति त्वमेव ब्रूहि । तत्र हेतुमाह स्वात्मानं वेत्सीति । तपसस्त्वात्मरूपत्वात्त्वमेव वेत्सि नापरः । तदुक्तं श्रुत्याम् - "त्रयं वा इदं नाम रूपं कर्मेति प्रस्तुत्य तदेकत्रयं सदेकमयमात्मे" ति ।

मू — श्रीमहादेव उवाच —

कायेन मनसा वाचा ध्यानपूजाजपादिभिः ।
कामक्रोधादिरहितं तपः कुर्वन्तु भोः सुराः ॥ -२८

व्या — ध्यानपूजाजपादिभिरित्यादिशब्देन प्रदक्षिणनमस्कारस्तोत्रादिकं गृह्यते । कामक्रोधादीत्यादिशब्देन लोभमोहा (मदमात्सर्या)-दिकं गृह्यते ॥

मू — देवा ऊचुः —

त्वया यत्कथितं शम्भो दुर्ज्ञेयमजितात्मभिः ।
सौम्योपायमतो ब्रह्मन् वद कारुण्यवारिधे ॥ -२९

व्या – दुर्ज्ञेयं - दुःखेन ज्ञातुं योग्यं किमुत कर्तुम् ।
अजितात्मभिः - अजितबाह्यान्तःकरणैः ॥

मू — ईश्वरः (उवाच) –

श्रृणुध्वं सर्वपापघ्नं भुक्तिमुक्तिप्रदं नृणाम् ।
सहस्रनामसद्विद्यां जपन्तु मम सुव्रताः ॥ -३०

व्या – सर्वपापघ्नं भुक्तिमुक्तिकरं नृणामित्युक्तवतः शिवस्यायमभिप्रायः - यद्यपि यूयमीश्वराः निरवधिकभोगसम्पन्नाः मुक्ताश्च तथापि- लोकानुग्रहार्थमिदं कर्तव्यमिति ॥ "यद्यदाचरति श्रेष्ठ" इति न्यायेन ॥ सद्विद्यां सदात्मविषयिणीम् ।

मू — यया संसारमग्नानां मुक्तिर्भवति शाश्वती ।
श्रृण्वन्तु तद्विधानं हि महापातकनाशनम् ॥ -३१

व्या – यया सद्विद्यया वक्ष्यमाणध्यानपूर्विकया तत्तन्नामार्थज्ञानपुरःसरया च । तद्विधानं विद्याङ्गभूतऋषिच्छन्दोदेवताङ्गन्यासध्यानादि- पुरःसरं जपानुष्ठानप्रकारम् ॥

मू — पठतां श्रृण्वतां सद्यो मुक्तिः स्यादनपायिनी ।

व्या – मुक्तिः पापान्मुक्तिः । भक्तिरिति पाठान्तरम् । अनपायिनी - दृढा ।

मू — ब्रह्मचारी कृतस्नानः शुक्लवासा जितेन्द्रियः ।
भस्मधारी मुनिर्मौनी पद्मासनसमन्वितः ॥ -३२

व्या – ब्रह्मचारी आश्रमोचितब्रह्मचर्यवान् । शुक्लवासा धौतवासाः । जितेन्द्रियः विषयपराङ्मुखः मुनिः वक्ष्यमाणध्यानपरः । मौनी अनुचितव्यापाररहितः ।

मू — ध्यात्वा मां सकलाधीशं निराकारं निरीश्वरम् ।
पार्वतीसहितं शम्भुं जटामुकुटमण्डितम् ॥ -३३

वसानं (दधानं) चर्म वैयाघ्रं चन्द्रार्धकृतशेखरम् ।
त्र्यम्बकं वृषभारूढं कृत्तिवाससमुज्ज्वलम् ॥ -३४

सुरार्चितपदद्वन्द्वं दिव्यभोगं सुसुन्दरम् ।
बिभ्राणं सुप्रसन्नं च कुठारवरदाभयम् ॥ -३५

[1] दुर्दर्शं कमलासीनं नागयज्ञोपवीतिनम् ।
विश्वकायं चिदानन्दं शुद्धमक्षमव्ययम् ॥ -३६

सहस्रशिरसं शर्वं (शम्भु) मनन्तकरसंयुतम् ॥ -३७

सहस्रचरणं दिव्यं सोमसूर्याग्निलोचनम् ।
जगद्योनिमजं ब्रह्म शिवमाद्यं सनातनम् ॥ -३८

---

1 दुरन्तमिति - मातृकागत: पाठ: । कृत्तिवाससमुज्ज्वलम् इति पाठभेद: ॥

दंष्ट्राकरालं दुष्प्रेक्ष्यं सूर्यकोटिसमप्रभम् ।
निशाकरकराकारं भेषजं भवरोगिणाम् ॥ -३९

पिनाकिनं विशालाक्षं पशूनां पतिमीश्वरम् ।
कालात्मानं कालकान्तं देवदेवं महेश्वरम् ॥ -४०

ज्ञानवैराग्यसम्पन्नं योगानन्दमयं[1] परम् ।
शाश्वतैश्वर्यसम्पूर्णं महायोगीश्वरेश्वरम् ॥ -४१

समस्तशक्तिसंयुक्तं पुण्यकायं दुरासदम् ।
तारकं ब्रह्म सम्पूर्णमणीयांसं महत्तमम्[2] ॥ -४२

यतीनां परमं ब्रह्मव्रतिनां च तपः फलम् ।
संयमीहृत्समासीनं[3] तपस्विजनसंवृतम् ॥ -४३

विधीन्द्रविष्णुनमितं मुनिसिद्धनिषेवितम् ।
महादेवं महा[4]नन्दं देवानामपि दैवतम् ॥ -४४

शान्तं पवित्रमोङ्कारं ज्योतिषां ज्योतिरुत्तमम् ।
ततः पठेद्धि कवचं मम सर्वाघनाशनम् ॥ -४५

(इतिध्यात्वा शिवं चित्ते रक्षार्थं कवचं पठेत्)

---

1 योगानन्दकरम्
2 महत्तरम् इति मातृकायां
3 सम्यमीन्द्रहृदासीनम् इति पाठः समीचीनः ।
4 महात्मानम् ।

शङ्करो मे शिरः पातु ललाटं फाललोचनः ।
विश्वचक्षुर्दृशौ पातु रुद्रः पातु भ्रुवौ मम ॥ -४६

गण्डौ पातु महेशानः श्रुती रक्षतु पूर्वजः ।
कपोलौ मे महादेवः पातु नासां सदाशिवः ॥ -४७

मुखं पातु हविर्भोक्ता ओष्ठौ पातु महेश्वरः ।
दन्तान्रक्षतु देवेशस्तालू सोमकलाधरः ॥ -४८

रसनां परमानन्दः पातु शङ्खं[1] शिवाप्रियः ।
चुबुकं पातु मे शम्भुः श्मश्रूञ्छत्रुविनाशनः ॥ -४९

कूर्चं पातु भवः कण्ठं नीलकण्ठोऽवतु ध्रुवम् ।
स्कन्धौ स्कन्द[2]पतिः पातु बाहू पातु महाभुजः ॥-५०

उपबाहू महावीर्यः करौ विबुधसत्तमः ।
अङ्गुलीः पातु पञ्चास्यः पर्वाणि च सहस्रपात् । -५१

हृदयं पातु सर्वात्मा स्तनौ पातु पितामहः ।
उदरं हुतभुक्पातु मध्यं मे मध्यमेश्व[3]रः ॥ -५२

कुक्षिं पातु भवानीशः पृष्ठं पातु कुलेश्वरः ।
प्राणान्मे प्राणदः पातु नाभिं भीमः कटिं विभुः ॥ -५३

---

1 शङ्खौ 2 स्कन्दगुरुः 3 मध्यं पातु महेश्वरः

सक्थिनी पातु मे भर्गो जानुनी भुवनाधिपः[1] ।
जङ्घे पुररिपुः पातु चरणौ भवनाशनः । -५४

शरीरं पातु मे शर्वो बाह्यमाभ्यन्तरं शिवः ।
इन्द्रियाणि हरः पातु सर्वत्र जयवर्धनः ॥ ५५

पूर्वे दिशि[2] मृडः पातु दक्षिणे यमसूदनः ।
वारुण्यां सलिलाधीश उदीच्यां मे महीधरः ॥ -५६

[3]ईशान्यां पातु भूतेश [4]आग्नेय्यां रविलोचनः ।
नैर्ऋत्यां भूतभृत्पातु वायव्यां बलवर्धनः ॥ -५७

ऊर्ध्वं पातु मखद्वेषी ह्यधः संसारनाशनः ।
सर्वतः सुखदः पातु बुद्धिं पातु सुलोचनः ॥ -५८

एवं [5]न्यासादिकं कृत्वा साक्षाच्छिवमयो[6] भवेत् ।
नमो हिरण्यबाह्वादि पठेन्मन्त्रं तु भक्तितः ॥ -५९

सद्योजातादिभिर्मन्त्रैर्नमस्कुर्यात् सदाशिवम् ।
ततः सहस्रनामेदं पठितव्यं मुमुक्षुभिः ॥ -६०

सर्वकार्यकरं पुण्यं महापातकनाशनम् ।
सर्वगुह्यतमं दिव्यं सर्वलोकहितप्रदम् ॥ -६१

---

1 जनताधिपः इति मुद्रितपुस्तकगतो मूलपाठः ।
2 पूर्वे मम मृडः पातु
3 ऐशान्यां
4 भूतेशश्च
5 न्यासविधिं
6 शम्भुमयो भवेत् ।

मन्त्राणां परमो मन्त्रो भवदुःखषड्रूर्मिहृत् ।
ओं नमः शम्भवे चेति षड्भिर्मन्त्रैः षडङ्गकम्[1] ॥ ६२

[2]ओं अस्य श्रीपरमदिव्यवेदसारशिवसहस्रनामस्तोत्रमहामन्त्रस्य श्रीभगवान्नारायण ऋषिः । अनुष्टुप् छन्दः, परमात्मा श्रीमहादेवो देवता । नम इति बीजम् । शिवायेति शक्तिः । चैतन्यमिति कीलकम् । श्रीमहादेवप्रीत्यर्थे वेदसारसहस्रनामजपे विनियोगः ।

---

1 न्यासं कृत्वा तु विधिवत्सम्यग्ध्यानं ततश्चरेत् इत्याधिकः पाठः अन्यत्र दृश्यते ।

2 प्रसङ्गान्मूलमात्रमुद्रितपुस्तकस्थपाठभेदोऽत्र लिख्यते :— अस्य श्रीवेदसाराख्यपरमदिव्यसहस्रनामस्तोत्रमालामन्त्रस्य श्रीभगवान्नारायण ऋषिः । अनुष्टुप् छन्दः । श्रीपरमात्मा महादेवो देवता । नम इति बीजम् । शिवायेति शक्तिः । चैतन्यमिति कीलकम् । श्रीमहादेवप्रसादसिद्ध्यर्थे जपे विनियोगः । अथ न्यासः - ओं नमः शम्भवे चाङ्गुष्ठाभ्यां नमः । ओं नमो मयोभवे च तर्जनीभ्यां नमः । ओं नमः शङ्कराय च मध्यमाभ्यां नमः । ओं नमो मयस्कराय च अनामिकाभ्यां नमः । ओं नमः शिवाय च कनिष्ठिकाभ्यां नमः । ओं नमः शिवतराय च करतलकरपृष्ठाभ्यां नमः । एवं हृदयादि । अथ ध्यानम् -

"कैलासाद्रिनिभं शशाङ्ककलया स्फूर्जज्जटामण्डलं
नासालोकनतत्परं त्रिणयनं वीरासनाध्यासितम् ।
मुद्राटङ्ककुरङ्गजानुविलसद्बाहुं प्रसन्नाननं
कक्षाबद्धभुजङ्गमं मुनिवृतं वन्दे महेशं परम् ।"

अथ लमित्यादिपञ्चपूजा ॥

ओं नमः शम्भवे च (इति) अङ्गुष्ठाभ्यां नमः ।
ओं मयो भवे च (इति) तर्जनीभ्यां नमः ।
ओं नमः शङ्कराय च मध्यमाभ्यां नमः ।
ओं मयस्कराय च अनामिकाभ्यां नमः ।
ओं नमः शिवाय च कनिष्ठिकाभ्यां नमः ।
ओं शिवतराय च करतलकरपृष्ठाभ्यां नमः ।
एवं हृदयादिन्यासः । भूर्भुवःसुवरोमिति दिग्बन्धः ।

ध्यानम् —

कैलासाद्रिनिभं शशाङ्ककलया स्फूर्जज्जटामण्डलं
नासालोकनतत्परं त्रिणयनं वीरासनाध्यासितम् ।
मुद्राटङ्ककुरङ्गजानुविलसद्बाहुं प्रसन्नाननं
कक्षाबद्धभुजङ्गमं मुनिवृतं वन्दे महेशं परम् ॥

शुद्धस्फटिकसङ्काशं त्रिणेत्रं चन्द्रशेखरम् ।
पञ्चवक्त्रं महाबाहुं दशबाहुसमन्वितम् ॥

भस्मोद्धूलितसर्वाङ्गं नागाभरणभूषितम् ।
परिपूर्णं परानन्दं परञ्ज्योतिः परात्परम् ॥

पराशक्त्या श्रिया सार्धं परमानन्दविग्रहम् ।
सूर्यकोटिप्रतीकाशं चन्द्रकोटिसुशीतलम् ॥
श्रीरुद्रं सच्चिदानन्दं ध्यायेत्सर्वार्थसिद्धये ॥ इति ध्यायेत् ।

व्या – ननु शिवनामसहस्रं हिरण्यबाहुनामादिकमन्यदपि बहु वर्तते । किमिति वेदसारसहस्राख्यव्याख्याप्रतिज्ञा क्रियते (इति चेत्) उच्यते - अस्मिन्नामसाहस्रे अतिशयबाहुल्यस्य विद्यमानत्वात् । तथाहि :- [1]अस्मिन्नेव पाद्मे पुराणे शिवगीतायां तृतीयाध्याये शिवप्रसादसिध्यर्थं श्रीरामं प्रति पाशुपतव्रतोपदेशपुरःसरमगस्त्यवचनम्

"एवं कुरु महाभाग शिवनामसहस्रकम् ।
इदं गुह्यं प्रदास्यामि तेन सर्वमवाप्स्यसि ॥

इत्युक्त्वा प्रददौ तस्मै शिवनामसहस्रकम् ।
वेदसारमयं नित्यं शिवप्रत्यक्षकारकम्" इति ॥

अनन्तरं चतुर्थाध्याये -

"एवमुक्त्वा मुनिश्रेष्ठे गते तस्मिन्निजाश्रमम् ।
अथ रामगिरौ रामः पुण्ये गोदावरीतटे ॥

शिवलिङ्गं प्रतिष्ठाप्य" त्यारभ्य "व्याघ्रचर्मासने स्थित" इत्यन्तेन ग्रन्थेन शिवलिङ्गप्रतिष्ठापनविभूतिधारणशिवार्चनादिकं कृतं (रामेण) इत्युक्त्वा अनन्तरं "नाम्नां सहस्रं प्रजपन्नक्तन्दिवमनन्यधी" रित्यादिना श्रीरामेण नामजपः कृत इति प्रदर्शितम् । अनन्तरं च शिवाविर्भावात्पूर्वं "स्वरेणाप्युच्चरन्

---

1 नामसाहस्रस्यास्य पद्मपुराणप्रोक्तत्वादस्मिन्निति ॥

उच्चैः "शम्भोर्नामसहस्रक" मित्यादिनामसहस्रेण स्तोत्रादिकं श्रीरामेण कृतमिति च प्रसिद्धम् । अनन्तरं च विष्णुब्रह्मादिक्पालादिपरिवारसहितवृषभारूढाम्बासमेतशिवाविर्भावकालेऽपि

"एवं देवसभां दृष्ट्वा कृतार्थो रघुनन्दनः
हर्षगद्गदया वाचा स्तुवन्देवं महेश्वरम् ।
दिव्यनामसहस्रेण प्रणनाम पुनःपुनः"

इत्यन्तेन ग्रन्थेन नमस्कारादिकं कृतमिति (च) प्रसिद्धम् ॥

किञ्च षष्ठाध्यायेऽपि

"पुरा ब्रह्मादयो देवा द्रष्टुकामा ममाकृतिम् ।" इत्यारभ्य
"श्रुत्वेति देवा मद्वाक्यं कैवल्यज्ञानमुत्तमम् ।
जपन्तो मम नामानि मम ध्यानपरायणाः ।
सर्वे ते स्वस्वदेहान्ते मत्सायुज्यं गताः सुराः ॥" इत्यन्तेन

ग्रन्थेन श्रीरामं प्रति शिवेन ब्रह्मादिसमस्तदेवैरपि शिवध्यानपुरःसरं नामसाहस्रं जप्तं तत्फलं कैवल्यं च प्राप्तमित्युक्तम् । किञ्चात्रैव प्रथमाध्याये पुरुषार्थचतुष्टयमीप्सता पुरुषेण विरजादीक्षादिपूर्वकविभूतिधारणरुद्राक्षधारणपुरःसरमेतन्नामसहस्रकजपः कर्तव्य[1] इति ऋषीन्प्रति सूतेनोक्तम् ।

"धर्मार्थकाममोक्षाणां पारं यास्यथ येन वै ।
मुनयस्तत्प्रवक्ष्यामि व्रतं पाशुपताभिधम् ॥

---

1 "तेन तुष्टश्च शङ्करः कैवल्यं प्रदास्यति"

कृत्वा तु विरजादीक्षां भूतिरुद्राक्षधारिणः ।

जपन्तो वेदसाराख्यं शिवनामसहस्रकम् ॥

सन्त्यज्य तेन मर्त्यत्वं शैवीं तनुमवाप्स्यथ ।

ततः प्रसन्नो भगवाञ्छङ्करो लोकशङ्करः ॥

भवतां दृश्यता (पश्यता) मेत्य कैवल्यं च प्रदास्यति ॥"

इत्यनेन ग्रन्थेन ।

किञ्चात्रैव षोडशाध्याये

"नामसङ्कीर्तने ध्याने सर्व एवार्थकारिणः" इति

आश्चर्ये वा भये शोके क्षुते वा मम नाम यः ।

व्याजेन वा स्मरेद्यस्तु स याति परमां गति" मिति

"अन्यानि शैवकर्माणि करोतु न करोतु वा ।

शिवनाम जपेद्यस्तु मुच्यते नात्र संशय" इति (च)

श्रीरामं प्रति शिवेनोक्तम् ।

यद्यपि भारतादित्यपुराणेषु शिवविषयनामसहस्राणि बहूनि सन्ति । तथापि श्रुतिमूलत्वात् इदमुत्कृष्टमत एव वेदसाराख्यत्वेन प्रसिद्धम् । श्रुतिमूलत्वं च तत्तन्नामव्याख्यानान्ते [1]केषाञ्चिन्नाम्नां प्रदर्शयिष्यते । तत्रादौ -

---

1 प्रायशो बहूनाम् ।

१. नमः पराय देवाय –

व्या – सविशेषणमेकं नाम । तत्र परायेति विशेषणं देवायेति विशेष्यम् । परः उत्कृष्टो देवो द्योतनात्मकः, स्वयंप्रकाशः सत्यज्ञानानन्दस्वरूपः, परशिव इत्यर्थः ॥ परमेश्वरस्यैवोत्कृष्टत्वं पुराणेषु प्रसिद्धम् । तथाहि -

काळिकाखण्डे, अष्टाचत्वारिंशेऽध्याये तृणबिन्दुना "को देवो भोगमोक्षदः ?" इति पृष्टः सत्रनिलादो व्यासवृत्तान्तकथनपुरःसरमुक्तवान्

"एतस्मात्कारणाद्ब्रह्मन् नास्त्यन्योऽभ्यधिकः शिवात्" इति ब्रह्माण्डपुराणे, अष्टाविंशाध्याये, शिष्यैःसह काशीं गत्वा प्रसङ्गादृषिगणमध्ये -

"सत्यं सत्यं पुनः सत्यमुद्धृत्य भुजमुच्यते ।
वेदशास्त्रात्परं नास्ति न दैवं केशवात्परम्" इति व्यासेनोक्ते अनन्तरं तस्य भुजे नन्दिना स्तम्भिते सति करुणामूर्त्या देव्या प्रार्थितेन शिवेन ज्ञानदर्शने दत्ते व्यासस्य स्वभुजस्तम्भकारणं शिवद्रोह एवेति ज्ञानमभूत् । अनन्तरञ्च भुजस्तम्भनिवृत्त्यर्थं विघ्नेश्वरद्वारपालकनन्दिकेश्वरवृषभसप्तमातृगण-कार्तिकेयरूपपरिवारदेवान् स्तुत्वा अनन्तरं शिवोत्कर्षस्तोत्रं व्यासेन कृतम् -

व्यास :—

एको रुद्रो न द्वितीयाय तस्थे
[1]ब्रह्मैवैकं नेह नानास्ति किञ्चित् ।
[2]यद्यस्त्यन्यः कोऽपि वा कुत्रचिद्वा
व्याचष्टां तं यस्य शक्तिः समग्रा ॥

यः क्षीराब्धेर्मन्दराघातजातः
ज्वालामालः कालकूटोऽतिभीमः ।
तं सोढुं [3]पावको ? परोऽभून्महेशा-
घत्कीलाभिः कृष्णतामाप विष्णुः ॥

[4]यद्बाणोऽभूच्छ्रीपतिर्यस्ययंता (?)
लोकेशो यत्स्यन्दनं भूः समस्ता ।
वाहा वेदा यस्य चैक्षेषुपातात् (?)
दग्धाः श्रान्तास्तः पुरस्तत्समः कः ॥

---

1 "तद्ब्रह्मैकं नेह नानास्ति किञ्चि"दिति D 22665 b गतः पाठः ।

2 "यद्यन्यः स्यात्कोऽपि वा कुत्रचिद्वा व्याचष्टां तं" इति च पूर्वोक्तमातृका-गतः पाठः ।

3 "तं सोढुं वा कोऽपरोऽभूत्" इति चोक्तमातृकागतः पाठः ।

4 यद्बाणोऽभूत् श्रीपतिर्यस्य यन्ता लोकेशोऽभूत्स्यन्दनं भूः समस्ता । • वाहा वेदा यस्य चैकेषुपातात् दग्धा श्रान्तास्तत्समः कः पुरारेः ॥ इति च

यं कन्दर्पो वीक्षमाणः समानं[1]

देवैरन्यैर्भस्म जातः स्वयं हि ।

पौष्पैर्बाणैः सर्वविश्वैकजेता

को वा जेता कामजेतुस्ततोऽन्यः ॥

यच्छूलाग्रे प्रोतगात्रः सहेति

विष्वक्सेनस्कन्धपार्श्वे विळंबन् (?) ।

हा हा चक्रेऽलंकृतिं वा विदेहः

को वा तस्माच्छूलिनः शाश्वतोऽन्यः ॥

भित्वा स्तम्भं शीघ्रमुत्खाय दैत्यं

हत्वा लोकान्ध्वंसयन्तं नृसिंहं (?) ।

चक्रे शान्तं शारभोग्राकृतिर्यः

सत्यं तुल्यस्तस्य शम्भोर्न चान्यः ॥

D 22665 b मातृकागतः पाठः एवम् :-

1 यं कन्दर्पो वीक्षमाणः समानं देवैरन्यैर्भस्म जातः स्वयं हि ।
पौष्पैर्बाणैः सर्वविश्वैकजेता को वा तुल्यः कामजेतुस्ततोऽन्यः ॥

यच्छूलाग्रे प्रोतगात्रः सहेतिर्विष्वक्सेनः स्कन्दपार्श्वे विलम्बन् ।
हा हा चक्रेऽलङ्कृतिं वा विदेहः को वा तस्माच्छूलिनः शाश्वतोऽन्यः ॥

भित्वा स्तम्भं शीघ्रमुत्खाय दैत्यं हत्वा लोकान्ध्वंसयन्तं नृसिंहम् ।
चक्रे शान्तं शारभोग्राकृतिर्यस्तस्मात्तुल्यस्तस्य शम्भोर्न चान्यः ॥

ब्रह्मविष्णो (ष्वो) स्तुल्यतावादशान्त्यै
योऽभूल्लिङ्गं हंसकोलेन्द्रमृग्यम् ।
विश्वस्य ध्ये [यो] यस्तयोर्जन्यशान्त्यै
श्रेष्ठस्तस्मादीश्वरान्नापरोऽन्यः ॥

यस्याद्यन्तौ नेयतुर्धातृविष्णू
दिव्यैरब्दैरप्यसङ्ख्यैः सवेगौ ।
यं वै भूयः प्रापतुः शान्तमानौ
तुल्यो नान्यो विश्वनाथस्य तस्य ॥

द्वेधा चक्रे यस्य पादाग्ररेखा-
शक्त्या तुल्यं भ्रान्तलोकामरौघम् ।
दोर्भ्यां वेगादुग्रजालन्धराख्यं
तस्मात्तुल्यो नाधिको वा वृषाङ्कात् ॥

ध्वस्तो यज्ञो दक्षमूर्धा च कृत्तः
सर्वे देवाः शासितास्तत्क्षणेन ।
जातेनैतद्वीरभद्रेण कोपा-
त्सत्यं सत्यं तत्समो नाधिकोऽन्यः ॥

वायोर्वह्नेर्वज्रपाणेर्बलं च
दन्तान्पूष्णो यो भगाक्षं बभञ्ज ।

यत्कोपांशादुत्थितो वीरभद्र-
स्तस्याधीशस्यापरः कोऽस्ति तुल्यः ॥

लोकान्कृत्वा यः पशून् तत्पतिः सन्
संहारेषु स्वैरमेकस्तनोति ।
पाशांश्छिन्दन् संसृतिभ्योऽपि ....
तुल्यो मुख्यस्तेन वा कोऽपि नास्ति ॥

यं वै वेधा वेद नो नैव विष्णु-
र्नो वै वेदा नो मनो नैव वाणी ।
तं वै देवं मादृशः कोऽल्पमेधाः
याथार्थ्याद्वै वेत्यहो विश्वनाथम् ॥

यस्मिन् सर्वं यस्तु सर्वत्र विश्वे
यो वै कर्ता यः पिता योऽपहर्ता ।
नो यस्यादिर्यः समस्तादिरेको
नो यस्यान्तो योऽन्तकृत्तं नतोऽस्मि ॥

यस्यैकाख्या वाजिमेधैर्न तुल्या
यस्यानत्या चैकया चेन्द्रलक्ष्मीः ।
यस्य स्तुत्या लभ्यते सत्यलोको
यस्यार्चातो मोक्षलक्ष्मीरुदारा ॥

नान्यं देवं वेद्म्यहं श्रीमहेशा-

न्नान्यं देवं स्तौमि शम्भो ऋतेऽहम् ।

नान्यं देवं चानमामि त्रिणेला-

त्सत्यं सत्यं सत्यमेतन्मृषा न ॥

नाहं स्तोष्ये साम्बमूर्ते ऋतेऽन्यं

सायं प्रातर्नक्तमन्यत्र काले ।

तत्त्वं प्रीतो मह्यमीशान भूयाः

विष्णोः स्रष्टुस्त्वं हि विश्वस्य हेतुः ॥

इत्थं यावत्स्तौति शम्भुं महर्षि-

स्तावच्छम्भोः सत्प्रसादाद्विधेऽहम् ।

तद्दोस्तम्भं त्यक्तवानस्मि नन्दी

दृष्ट्वा तावद्व्यासशिष्या ननन्दुः ॥

तावन्नेदुर्दिव्यवाद्यानि खस्था

पौष्पी वृष्टिः काशिकान्तः पपात ।

वाण्यश्चासन्साधु साध्वित्युदग्रा

सद्यो ब्रह्मन् सिद्धयक्षोगणानाम् ॥

नान्यद्दैवं केशवादस्ति किञ्चि-

त्सत्यं वच्मीत्यूर्ध्वमुद्धृत्य बाहुम् ।

घ्यासेनोक्ते स्तम्भितो योऽस्य बाहु-

मुक्तः स्तोत्रेणामुनेशप्रसादात् ॥

यो वा यत्नादीशकृष्टीं (पूजां) विधास्यन्

लक्ष्मीं वाञ्छन् ज्ञानविज्ञानसिद्धिम् ।

ते नैवैतत्स्तोत्रमीशस्य नित्यं

श्रुत्वा भक्तिप्रेमभावेन जप्यम् ॥

यद्वच्छम्भुर्मूर्तिभेदेषु मुख्यो

यद्वच्छ्रेष्ठः सर्वदेवेषु विष्णुः ।

रक्षाकृद्भ्यो मन्त्रविद्भ्यश्च तद्व-

च्छम्भूत्कर्षस्तोत्रजापी च मुख्यः ॥

पुत्रावाप्तिः शत्रुसंहारवृत्ति-

र्लक्ष्मीवृद्धिः सौख्यमायुष्यवृद्धिः ।

सत्यं शम्भूत्कर्षपाठेन सिद्ध्ये-

त्सिद्ध्येन्मोक्षः स्तोत्रपाठेन जन्तोः ॥

शम्भूत्कर्षस्तोत्रमत्यन्तगुह्यं

ब्रह्मघ्नं च स्तेयिनं तल्पगं च ।

शुद्धं कुर्याज्जप्तमात्रेण सद्यो

मिथ्या नैतन्नन्दिकेशोऽभिवच्मि ॥

इत्युत्कर्षस्तोत्रजापि स रुद्र-
श्चित्ते तस्य स्वैरमीशो यदास्ते ।
तस्यासाध्यं नास्ति मुक्तिः करस्था
किञ्चाप्यन्याः सिद्धयश्चिन्तितार्थाः ॥

तस्मादेतं शाङ्करस्तोत्रराजं
भक्त्या युक्तो यः पठेत्स(च्च) त्रिसन्ध्यम् ।
मुक्ताघौघो राजसूयात्तपुण्यः
सम्प्राप्तश्रीरीशसायुज्यमेति ॥

आदित्यपुराणे द्वितीयाध्याये मनुं प्रति भानुवचनम् –

"स एवात्मा महादेवः सर्वेषामेव देहिनाम् ।
ज्ञानेन भक्तियुक्तेन ज्ञातव्यः परमेश्वरः ।
न पश्यामि महादेवादधिकं देवतान्तरम् ॥" इति

तत्रैव वेदाः –

"यं प्रपश्यन्ति विद्वांसो योगेन क्षालिताशयाः ।
नियम्य करणग्रामं स एवेशो महेश्वरः ॥

ब्रह्मविष्णुविरिञ्चाद्या यस्य देवस्य किङ्कराः ।
यस्य प्रसादाज्जीवन्ति स देवः पार्वतीपतिः ॥

न जानन्ति परं भावं यस्य ब्रह्मादयः सुराः ।
अद्यापि न वयं विद्मः स देवस्त्रिपुरान्तकः ॥

शृण्वन्तु देवताः सर्वाः सत्यमसत्परं वचः ।
नास्ति रुद्रान्महादेवादधिकं देवतान्तरम्" इति ॥

वायव्यसंहितायाम् —

"यस्य पादरजःस्पर्शाद्ब्रह्मत्वं प्राप्तवानजः ।
शार्ङ्गिणापि तथा मूर्ध्ना धार्यते कः शिवात्परः" इति ॥

शैवे (महापुराणे) एकादशरुद्रसंहितायां हेमसभानाथ माहात्म्ये प्रथमाध्याये वसिष्ठं प्रति ऋषीणां प्रश्नः -

"शिवक्षेत्रेषु पुण्येषु कलिकल्मषनाशनम् ।
भोगमोक्षप्रदं ब्रूहि क्षेत्रं क्षेत्रविदां वर ॥

यस्योपासनया सद्यः फलन्त्यभिमताः क्रियाः ।
तमाचक्ष्व परं देवं वेदविद्भिरुपासितम् ॥

सन्ति क्षेत्राणि पुण्यानि शाम्भवानि मुनीश्वराः ।
[1]पुण्डरीकपुरं तेषु भोगमोक्षप्रदं शुभम् ॥

पुण्डरीकपुरे पुण्ये नियतानन्दताण्डवः ।
चिदम्बरेश्वरो देवः शिवः परमकारणः ॥

हृत्पुण्डरीके यद्गूढं वेदान्तैः प्रतिपाद्यते ।
तज्ज्योतिः शक्यते द्रष्टुं पुण्डरीकपुरे द्विजाः" ॥ इति ।

---

1 चिदम्बरं - तिल्लुवनमिति प्रसिद्धं क्षेत्रम् ॥

अत्रमूलभूताश्रुतिस्तु -

"तमःपरे देव एकीभवती" तितेजःपरस्यां देवतायामिति च ॥

अवतारिका :—

ननु परमेश्वरः सर्वोत्कृष्टस्तथापि भक्तानां लोकस्य वा किमायातम् ? अत आह -

२. शङ्कराय —

व्या – शं सुखं करोतीति शङ्करः । अत्र भक्तानां भक्त्यनुसारेण इहैव सुखकरः । सर्वस्य लोकस्य तु आध्यात्मिकादितापत्रय-निवृत्तिपूर्वकं प्रलयकाले महानन्दकरः ।

महाभारते —

द्रोणपर्वणि एकनवतितमाध्याये परमेश्वरस्यभक्तशङ्करत्वं स्फुटीकृतम् ॥

अर्जुनः —

सङ्ग्रामे शात्रवान्निघ्नन् शरौघैर्विमलैरहम् ।
अग्रतो लक्षये यान्तं पुरुषं पावकप्रभम् ॥

ज्वलन्तं शूलमुद्यम्य यां दिशं प्रतिपद्यते ।
तस्यां दिशि विशीर्यन्ते शत्रवो मे महामते ॥

पद्भ्यां न स्पृशते भूमिं न च शूलं विमुञ्चति ।
शूलाच्छूलसहस्राणि निष्पतन्त्यस्य तेजसा ॥

तेन भग्नानरीन् सर्वान् मद्भग्नान्मन्यते जनः ।
तेन दग्धानि सैन्यानि पृष्ठतोऽनुदहाम्यहम् ॥

भगवंस्त्वं समाचक्ष्व को वा स पुरुषोत्तमः ।
शूलपाणिर्महान्कृष्ण तेजसा सूर्यसन्निभः ॥"

व्यास उवाच –

"प्रजापतीनां प्रथमं तेजसां प्रवरं प्रभुम् ।
भुवनं भूर्भुवं देवं सर्वलोकमहेश्वरम् ॥

ईशानमीश्वरं देवं दृष्टवानसि शङ्करमि" ति ।
"नमः शङ्कराये" ति श्रुतिः ॥

शिवरहस्ये –

"स्मर्तव्यः शङ्करो नित्यं शं करोतीति शङ्करः[1] ।
शं नामानल्पमानन्दमनिर्वाच्यमनामयम् ॥

सततं नाम जिह्वाग्रे शङ्करेत्यस्ति यस्य सः ।
दुःखभाङ् न भवत्येव सत्यं सत्यं न संशय" इति च ॥

---

1 शङ्कराय - स्वभक्तानां शं करोतीति शङ्करः तस्मै इति "कल्पलतायाम्" ॥

अव –

सुखकृत्त्वे निमित्तमाह ।

३. महात्मने –

व्या – महांश्चासावात्मा च महात्मा, सर्वप्रत्यगात्मेत्यर्थः ।
"पाद्मे" पुराणे गौतमातिथ्ये शिवं प्रति हनुमांस्तौति
"नमो देवाय महते शङ्कराय महात्मने ।
योगिने योगदात्रे च योगानां गुरवे नमः ।" इति
"एषदेवो विश्वकर्मा महात्मेति" श्रुतिः ॥

अव —

परमेश्वरस्य भक्तान्प्रति दुःखनिवृत्तिकरत्त्वे सुखकरत्वे च हेतुमाह

४. कामिने –

व्या – कामः इच्छा, भक्तविषयदुःखनिवृत्तौ तत्सुखे च यस्य स तथा । न तु स्वस्य दुःखनिवृत्तौ सुखे च, असङ्गत्वादाप्तकामत्वाच्च । अथवा निरन्तरं लोकोत्तरसौन्दर्यशालिदेवीसहितत्वात् ।

"उमासहायं परमेश्वरं प्रभुमि" ति श्रुतिः ॥

अत्र –

परमेश्वरस्य भक्तदु:खनिवृत्तिकरत्वं प्रसिद्धमिति द्योतयितुं स्तौति –

५. नीलकण्ठाय –

व्या – नीलः कण्ठे यस्य स नीलकण्ठः ॥ शिवस्य कण्ठे नैल्यं विष्ण्वादिसकलप्राण्यार्तिकरहालाहलविषधारणप्रयुक्तम् ॥ तथाहि - "पाद्मे" पुराणे प्रथमाध्यायादौ श्रीशिवेन हालाहलविषपानं किमर्थं कृतमिति सनकादिना पृष्टः सन्नन्दिकेश्वर आह —

"ओं नमो नीलकण्ठायेत्यब्रूवन्मन्त्रमैश्वरम् ।
संसारविषदष्टानामुत्तमं परमौषधम् ॥

ध्यायमानो महादेवं नीलकण्ठं चतुर्भुजम् ।
प्रणम्य गिरिजाधीशं प्रणतार्तिहरं परम् ॥

प्राह तेषामृषीणां तां कथां श्रीनन्दिकेश्वरः ।
श्रोतृणामपि वक्तृणामपि कैवल्यदायिनीम् ॥

इति श्लोकत्रयेण स्तुतिनमस्कारपुरःसरम् "पुरा देवैस्तदा दैत्या युद्धेतैस्ते हताः पुनः" इत्यारभ्य

"उवाच पुण्डरीकाक्षं शम्भोः पार्श्वे स्थितं तदा ।
कालकूटमिदं पश्य कण्ठभूषणमीशितुः ॥

सुराङ्गनानां सर्वासां कण्ठमङ्गलदायकम् ।
हैमवत्या विशालाक्ष्याः कटाक्षैरमृतोपमैः ॥

शीतलीकृतमीशस्य कण्ठभूषाऽभवद्विभोः ।
श्रुत्वेति ब्रह्मणो वाक्यं देवासुरवचांसि च ॥

स्थापयित्वा विषं कण्ठे नीलकण्ठः शिवोऽभवत्" इत्यन्तेन ॥

तत्र खलु देवासुराणां सङ्ग्रामस्तदनन्तरं परस्परनाशनम् - अनन्तरमुभयेषां ब्रह्माणं प्रति गमनपुरःसरं नाशाभावोपायप्रश्नः, तदनु तैः सह विष्णुं प्रति गमनं ब्रह्मणः, अनन्तरं विष्णुना नाशाभावोपायः क्षीराब्धिमथनपुरःसरममृतोत्पादनमित्युक्ते सर्वेषामङ्गीकारः । अनन्तरं मन्दरपर्वतं मन्थानं कृत्वा वासुकिं योक्त्रं कृत्वा मथने कृते वासुकिमुखादुत्पन्नविषज्वालया विष्ण्वादि परिपीडने तन्निवृत्त्यर्थं विष्ण्वादिना कैलासगमन शिवस्तोत्र शिवदर्शन स्वकृत्यकथनानन्तरं शिवं प्रति विष्णुना विषोपसंहारप्रार्थना कृता । तेनापि तथैव कृतमिति । तदनु –

"ओं नमो नीलकण्ठाय महादेवाय ते नमः ।
नमः शिवाय सोमाय शाश्वताय नमो नमः ॥"

इत्येव "स्कान्दे" "सनत्कुमारसंहितायां" काशिकावनमहात्म्ये चतुर्थाध्यायादौ कालकूलविषनिर्बर्हणलीला प्रसिद्धा

"त्रिलोचनं नीलकण्ठं प्रशान्तमिति" श्रुतिः ॥

अत्र —

ननु कामित्वे विषास्वादने च विकारित्वं शिवस्य (कुतो) नेत्यत आह

६. निर्मलाय —

निर्गतानि मलानि स्वाभाविकागन्तुकरूपाणि आणवादीनि काम-क्रोधादीनि च यस्मात्स निर्मलः । सर्वदा मुक्त इत्यर्थः ।

"कौर्मे" —

"यद्ज्ञानं निर्मलं शुद्धं निर्विकल्पं निरञ्जनम् ।
ममात्मासौ तदेवेदमिति प्राहुर्विपश्चितः" इति ॥

"निरवद्यं निरञ्जनमिति" श्रुतिः ॥

अत्र —

लोकानां (इव) परमेश्वरस्य कामित्वादिकं वास्तविकं न भवति । किन्तु लीलामात्रमिति द्योतयितुमाह

७. कपर्दिने —

कपर्दः जटानां ग्रन्थिविशेषः ॥ सोऽस्यास्तीति कपर्दी । अनेन तपोनिष्ठापुरःसरं स्वात्मारामत्वं सूचितम् ।

"नमः कपर्दिने च व्युप्तकेशाय चे"ति श्रुतिः ॥

अत्र –

स्वात्मारामत्वे हेतुमाह -

८, निर्विकल्पाय –

निर्गताः विकल्पाः कोटिद्वयात्मका वस्तुशून्या वा प्रत्ययाः यस्मात्सः निर्विकल्पः । अनेन निश्चयज्ञानवत्त्वेन सर्वज्ञत्वं सूचितम् । तदुक्तं "स्कान्दे" -

"विकल्परहितं तत्त्वं ज्ञानमानन्दमव्ययम् ।
ये पश्यन्ति विमुक्तास्ते जीवन्तोऽपि न संशयः" ॥ इति ।

"निर्विकल्पो निराख्यातःशुद्धो देव" इति श्रुतिः ।

९. शान्ताय –

शान्तः सर्वविकारशून्यः । तदुक्तं-

"सूतसंहितायाम्" -

"शब्दहीनाय शान्ताय शब्दलभ्याय साक्षिणे ।
सर्वोपाधिविहीनाय स्वयम्भानाय वै नमः" इति ॥

"पराशर(उप)पुराणेऽ"पि

"अप्रमेयाय शान्ताय स्वप्रकाशाय साक्षिणे ।
स्वप्रकाशैकनिष्ठाय मुक्तिदाय नमो नमः" ॥ इति ।

"यत्तच्छान्तमजरमभयं परञ्चे" ति श्रुतिः ॥

१०. निरहङ्कारिणे

निर्गतः अहङ्कारः अस्यास्तीति निरहङ्कारी । तथा च परिच्छिन्नाऽहङ्काररहित इत्यर्थः ॥ सर्वात्मकोऽहमित्यहङ्कारस्य विद्यमानत्वात् ।

"ब्रह्मगीतायाम्" - पञ्चमाध्याये समस्तदेवादीन्प्रति परमेश्वर-वचनम् –

"अहं हि सर्व" मित्यारभ्य "सर्वस्वरूपेण सुसंस्थितोऽहमि"-त्यन्तेन ॥

उक्तं (च) '**शिवगीतायाम्**'

"पुरा ब्रह्मादयो देवाः" इत्यारभ्य "नित्योऽनित्योऽह" मित्यादिना सर्वाहम्भावः प्रकटीकृतः ।

श्रुति "स्त्वहमेवे" ति ॥ एवकारः परिच्छिन्नाहङ्कारादिद्वैत-निषेधार्थः ।

११. अनर्घ्याय –

वस्त्वन्तरतौल्यरहितोऽनर्घ्यः

१२. विशालाय

विशालो विस्तीर्णः । "विशालःप्रदेश" इत्युपपदाभावाद्देशतः परिच्छेदरहितः पूर्ण इत्यर्थः । "न तत्समश्चाभ्यधिकश्च दृश्यत" इत्युभयत्र श्रुतिः ।

अव —

इदानीं भक्तान्प्रति सुखकरणे दुःखनिवृत्तिकरणे च सामर्थ्य-मस्तीति द्योतयितुं स्तौति ।

१३. सालहस्ताय –

सालो नाम वृक्षविशेषः । स च दीर्घः वृत्तः श्लक्ष्णः कठिनश्च तद्वत्हस्तौ हस्ता वा यस्य सालहस्तः । एभिर्विशेषणैः परमेश्वरस्य दातृत्वं सौन्दर्यं बलवत्त्वं च प्रतिपादितम् ।

"तु विग्रीवो वपोदरःसुबाहुः" ।

"नमो हिरण्यबाहव" इति च श्रुतिः ।

ननु "तु विग्रीवो वपोदरःसुबाहुरि"त्यादिना मघवान् अध्वर-राज इन्द्र एव स्तूयते इति (इति चेत्) न परमेश्वरस्यैवेन्द्रत्वात् । "सन्तमिन्द्रमित्याचक्षते परोक्षेणे"ति श्रुतेः । अध्वरराजत्वं च परमेश्वरस्यैव "आवोराजानमध्वरस्य रुद्र"मिति श्रुतेः । तथा च वज्रहस्तादिशब्देनापि इन्द्ररूपी परमेश्वर एव स्तूयते । एवं परमेश्वरः क्वचिन्निर्गुणः परशिवरूपत्वेन, क्वचित्सगुणत्वेन सर्वात्मकरूपेण, क्वचिल्लीलाविग्रहोमासहायादिरूपेण क्वचिद्भक्तानु-ग्रहार्थं व्याधादिरूपेण क्वचिन्निग्राहकवीरभद्रशरभादिरूपेण क्वचि-दिन्द्रादिरूपेण स्तूयते ॥

१४. निरञ्जनाय –

निरञ्जनः निर्लेपः ।

"स्कान्दे" —

"निर्भेदे निर्जले नित्ये निराधारे निरञ्जने ।
दासः सोऽहमहं सोऽपीत्यात्मन्येव कथं भवेत्" इति ।

देवदेवश्च देवश्च जगन्नाथो निरञ्जनः ।
निर्भयो निर्गुणो नित्यो नित्यानन्दो निरामय" इति

"निरवद्यो निरञ्जनः" इति श्रुतिः ॥

१५. शर्वाय –

शृणाति हिनस्ति सर्वाः प्रजा अन्तकाले इति शर्वः ॥
शृणाति दुष्टदैत्यादीन् भक्तानां पापं वेति ॥

"शर्व सर्वेभ्य" इति श्रुतिः ।

१६. श्रुताय –

श्रुतः विश्रुतः प्रख्यातः वेदान्तादिषु ।
"नमः श्रुताय श्रुतसेनाय चे"ति श्रुतिः ॥

१७. परमात्मने [परात्मने] –

परश्चासावात्मा च परात्मा (परमश्चासावात्मा च परमात्मेति D z2665 b मातृकायाम्)

ननु आत्मनः परविशेषणं व्यर्थम् । "आत्मा वा इदमेक एवाग्र आसीदि" त्यादिनात्मशब्देनैव पर (म) शिवस्वरूपस्योक्तत्वादितिचेत् - देहेन्द्रियादिविशिष्टजीवात्मनिवृत्त्यर्थमिति परमात्मग्रहणम् ।

"तत्सर्वं पर (मा) आत्मनि (सं) प्रतिष्ठत" इति श्रुतिः ।

१८. शिवाय –

शिवो मङ्गलस्वरूपः । निर्मृष्टनिखिलदुःखानुषङ्गपरमानन्दरूप इत्यर्थः ।

"शिवरहस्ये" देवीं प्रति शिवः –

"सर्वाणि शिवनामानि मोक्षदान्येव सर्वदा ।
तेष्वप्यत्युत्तमं नाम शिवेति ब्रह्मसंज्ञितम् ॥

शिवनाम समं वस्तु न दृष्टं क्वापि न श्रुतम् ।
रत्नरत्नमिदं नूनं नामरत्नमनुत्तमम् ॥

नित्यं कण्ठे धृतो येन शिवनाममहामणिः ।
स नीलकण्ठो भूत्वान्ते नीलकण्ठे विलीयते ॥

सादरं भस्मदिग्धाङ्गो वदेच्छिवशिवेति यः ।
स संसारविनिर्मुक्तो भवत्येव न संशयः ॥

अनेकजन्मभिर्नित्यं पुण्यं बहुकृतं यदि ।
तदा शिवेति शब्दोऽयं सादरं निःसरिष्यति ॥

शिवेति नाम विमलं येनोच्चारितमादरात् ।
तेन भूयो न संसारसागरः समवाप्यते ॥

परब्रह्मेति विज्ञेयं शिव इत्यक्षरद्वयम् ।
तद्ब्रह्मेति विदित्वैवं तदुपास्यं मुमुक्षुभिः ॥

तद्धि ब्रह्मेत्युपासीत भवति ब्रह्मवांस्ततः ।
ब्रह्मवान् ब्रह्मविद्भूत्वा ब्रह्मभूतो हि जायते ॥

अव्यक्तं परमं ब्रह्म शिव इत्यक्षरद्वयम् ।
तदेव सर्ववेदान्तप्रतिपाद्यं न संशयः ॥

शिव इत्यस्ति यन्नाम तद्धि नामोत्तमोत्तमम् ।
तदेव परमं ब्रह्म तदेवाहं वरानने ॥

शिवनामस्वरूपेण व्यक्तं ब्रह्माहमेव हि ।
शिवनामाहमेवेति विजानीहि यथार्थतः ॥

यदव्यक्तं परं ब्रह्म वेदान्तप्रतिपादितम् ।
तदेवाहं विजानीहि शिव इत्यक्षरद्वयम् ॥

इदं व्युत्पत्तिरहितं शिवनाम निरञ्जनम् ।
निराकारं परं ब्रह्म नैतस्माद्ब्रह्म भिद्यते ॥

उपासितव्यमेतद्धि ब्रह्मेत्यन्वहमादरात् ।
"शिव" इत्यक्षराकारमक्षरं ब्रह्म शाश्वतम् ॥

तारकं ब्रह्म परमं 'शिव' इत्यक्षरद्वयम् ।
नैतस्मादपरं किञ्चित्तारकं ब्रह्म सर्वदा ॥

इदं यत्तारकं ब्रह्म शिवनामाभिधं शिवे ।
एतस्मिन्ब्रह्मणि श्रद्धा न विना मदनुग्रहम् ॥

नित्यं शिवेति मन्त्रेण पूजयस्व सदाशिवम् ।
नैतस्मादुत्तमो मन्त्रश्रेष्ठो देवेष्वपि ध्रुवम् ॥

शिवेति यः परो मन्त्रः स परब्रह्म उच्यते ।
परब्रह्मस्वरूपं तज्ज्ञातुमेव न शक्यते ॥

तत्त्वं तु शिवमन्त्रस्य येन ज्ञातं भविष्यति ।
तेन तीर्ण इति ज्ञेयो घोरः संसारसागरः ॥

ततस्तेनैव मन्त्रेण पूजनीयः सदाशिवः" इति ।
"नमः शिवाय च शिवतराय चे,"ति श्रुतिः ।

१९. भर्गाय –

भर्ज्यन्ते पच्यन्ते दह्यन्ते पापान्यनेनेति भर्गः । सर्व-पापनिवर्तकत्वं शिवस्य शिवधर्मोत्तरा (पुराणा) दिषु प्रसिद्धम् ।

छित्वा भित्वा च भूतानि हत्वा सर्वमिदं जगत् ।
यजेदेकं विरूपाक्षं न स पापैर्विलिप्यते ॥

भर्जति पचति दहति स्वसाक्षात्कारेणाविद्यां तत्कार्यभूतसंसारं चेति वा भर्गः ।

"भर्गोदेवस्य धीमहीति श्रुतिः ॥"

२०. गुणातीताय -

गुणैः सत्वरजस्तमोरूपैरतीतः गुणातीतः, निर्गुण इत्यर्थः ।

"साक्षीचेता केवलो निर्गुणश्चेति" श्रुतिः ।

२१. वेधसे –

वेधाः विधाता जगन्निर्मातेत्यर्थः । तदुक्तं -

"सूतसंहितायाम्" -

शिवं प्रस्तुत्य -

"अनेनेदं जगत्सर्वं विना न भवति क्वचित् ।
एष धाता विधाता च सर्वं सर्वस्य देहिनाम्" । इति

'स नो बन्धुर्जनिता स विधाते'ति श्रुतिः ॥

'आषाढाय सहमानाय वेधस' इति वा ॥

२२. महादेवाय –

महांश्चासौ देवश्च महादेवः । महत्वं च सकलपूज्यत्वाद्वा विभुत्वेन प्रमाणतो महत्त्वाद्वा । यथोक्तं -

"साम्बपुराणे" -

"पूज्यते यः सुरैः सर्वैर्महांश्चैव प्रमाणतः ।
धातुर्महति (?) (ध्यातुर्महति) पूजायां महादेवस्ततः स्मृतः ।"
इति ॥

अथ कस्मादुच्यते महादेवः ?
यः सर्वान् भावान् परित्यज्यात्मज्ञानयोगैश्वर्ये - महीयते तस्मादुच्यते महादेव इति ।

"अथर्वशिरसि" अस्यार्थः –

सर्वान् भावान् सकलपदार्थान् परित्यज्य समन्तात् त्यक्त्वा आत्मज्ञानयोगैश्वर्ये अहं ब्रह्मास्मीत्यात्मज्ञानं [यत्] तदेव योगैश्वर्यं, तस्मिन् महति प्रौढे निष्ठां लब्ध्वा परमानन्दरूपस्यात्मतत्वस्फूर्ति-वशान्महीयते । अथवा सर्वान् भावान् परित्यज्य बाह्यविषया-सक्तिं परित्यज्यात्मज्ञानयोगैश्वर्यविषयीकृतः सन् योगिभिर्महीयते= पूज्यते योगिनां यो वेदान्तमहावाक्यजन्यसाक्षात्कारः तस्य विषयो भवति, योगिभिर्ज्ञानेन सर्वदा पूज्यत इत्यर्थः ।

"ज्ञानमेव शिवार्चनमिष्यते" इति स्मरणात् ।

अथवा महान् त्रिविधपरिच्छेदरहितः । दीव्यत इति देवः स्वप्रकाशः नित्यपरिपूर्णसर्वचैतन्यस्वरूप इत्यर्थः ।

शिवरहस्ये -

त्रिपुण्ड्रधारणं कृत्वा महादेवमनुस्मरन् ।
यो याति यत्र तत्रैव महादेवोऽधितिष्ठति ॥

महादेव महादेव महादेवेत्ययं ध्वनिः ।
अपमृत्युहरो नूनं कालमृत्योश्च नाशकः ॥

महादेव महादेव महादेवेत्ययं ध्वनिः ।
संसारसर्पदष्टानां दिव्यौषधमनुत्तमम् ॥

महादेव महादेवेत्यरण्ये सञ्चरन् जनः ।
वशीकरोति व्याघ्रादीनपि सत्यं मयोच्यते ॥

कोटयो ब्रह्महत्यानामगम्यागमकोटयः ।
सद्यः प्रलयमायान्ति महादेवेति कीर्तनात् ॥

महादेवेति नामेदं यः शृणोति वदिष्यति ।
न तस्य नरकावासः सत्यं सत्यं न संशयः ॥ इति ॥

महादेव महादेव महादेवेति वादिनम् ।
वत्सं गौरिव गौरीशो धावन्तमनुधावति ॥

महादेव महादेव महादेवेति यो वदेत् ।
(एक एव - एकवारात्) भवेन्मुक्तिर्द्वाभ्यां शम्भुर्ऋणी भवेत् ॥

महादेव महादेव महादेवेत्ययं ध्वनिः ।
मोक्षलक्ष्मीगृहे द्वारकपाटोद्घाटनध्वनिः ॥

महादेवः परं मित्रं महादेवः परं धनम् ।
महादेवः परा विद्या महादेवः परा गतिः ॥

महादेवेति वक्तारं दृष्ट्वा तु यमकिङ्कराः ।
पलायन्ते महाभीताः (?) स्मरन्तो यमशासनम्
'महति महीयते तस्मादुच्यते महादेव' इति श्रुतिः ॥

२३. वीताय —

वीतः आच्छादितः ॥
"मायादिना मायिनन्तु महेश्वरमिति" श्रुतिः ।
अथवा "वीतः परित्यक्तः सर्वदोषैः ॥
"शुद्धो बुद्धो मुक्त" इतिश्रुतिः

२४. पार्वतीपतये —

पर्वतः हिमवान् तस्य पुत्री पार्वती । तस्याः पतिः ॥ तदुक्तं-

सूतसंहितायाम् -

"सा शिवा करुणामूर्तिर्जगन्माता त्रयीमयी ।

शिवाभिन्ना परानन्दा शङ्करस्यापि शङ्करी ॥

स्वेच्छया हिमवत्पुत्री स्वभक्तजनवत्सला" तस्याः पतिः प्रियः परमेश्वरः ॥

"अम्बिकापतय उमापतये नमो नमः" इति श्रुतिः

२५. केवलाय —

(केवलो) निरुपाधिकः । (तस्मै)

"केवलो निर्गुणश्चेति" श्रुतिः ॥

२६. महेशाय —

महांश्चासावीशश्च महेशः

आनुशासनिके श्रीकृष्णं प्रत्युपमन्युः

"यावच्छशाङ्कशकलामलबद्धमौलि -

र्न प्रीयते पशुपतिर्भगवान्महेशः ।

तावज्जरामरणजन्मशताभिघातै -

र्दुःखानि देहविहितानि समुद्वहामि" इति ॥

आदित्यपुराणे –

क्रमेण लभ्यतेऽन्येषां मुक्तिराराधनाद्द्विज ।
आराधनान्महेशस्य तस्मिञ्जन्मनि मुच्यते ॥ इति च ।

"यः परः स महेश्वरः" इति श्रुतिः ॥

२७. विशुद्धाय –

विशेषेण शुद्धो विशुद्धः । सदा सत्त्वादिमलरहित इत्यर्थः । तदुक्तं

"सूतसंहितायाम्" -

"एवमात्मानमद्वन्द्वं निर्विकारं निरञ्जनम् ।
नित्यशुद्धं निराभासं संविन्मात्रं परामृतम् ॥

यो विजानाति वेदान्तैः स्वानुभूत्या च निश्चितम् ।
सोऽतिवर्णाश्रमी नान्यः स एव गुरुरुत्तमः" ॥ इति ॥

"शुद्धमपापविद्धमिति" श्रुतिः ।

२८. बुधात्मने –

बुधश्चासावात्मा च बुधात्मा । बुधः ज्ञानवान् । सर्वज्ञस्वरूप इत्यर्थः ।

"यः सर्वज्ञः स सर्वविदिति" श्रुतिः ॥

२९. कैवल्याय –

कैवल्यो मोक्षस्वरूपः ।

“कैवल्यं पदमश्नुत” इति श्रुतिः ॥

३०. सुदेशाय —

शोभनो देशः सुदेशः कैलासवासीत्यर्थः ।

“शिवां गिरित्र तां कुरु” इति श्रुतिः ॥

येन स्वर्णमहीधरं विरचयंश्चापं गुणं वासुकिं
काण्डं कंसरिपुं रथं वसुमतीं यन्तारमब्जोद्भवम् ।
तूणीरं जलधिं विधाय कृतवान्दग्धुं पुराणां त्रयं
तस्मै चन्द्रकलाधराय विनतिं कुर्मो वयं शर्मणे ॥ इति ॥

“चन्द्रललाटाय कृत्तिवाससे नम” इति श्रुतिः ॥

३१. निःस्पृहाय स्वरूपिणे —

इदं (स) विशेषणं (एकं) नाम । निःस्पृहायेति विशेषणम् ॥ निर्गता स्पृहा विषयेच्छा यस्मात्सः निःस्पृहः । स्वरूपं अस्यास्तीति स्वरूपी । निष्कामस्वरूपीत्यर्थः ।

“योऽकामो निष्काम” इति श्रुतिः ॥

३२. सोमविभूषाय –

विशिष्टा भूषा (विभूषा) सोमः विभूषा भूषणं

यस्य स सोमविभूषः चन्द्रधरः ।

"चन्द्रललाटाय कृत्तिवाससे नम" इति श्रुतिः ॥

भविष्योत्तरपुराणे —

चतुर्विंशाध्याये योगाङ्गे (?)

३३. कालाय —

विश्वं कलयतीति कालः ।

"रुद्राय नमः कालाये"ति श्रुतिः ॥

३४. अमिततेजसे -

अमितमपरिच्छिन्नं तेजः चैतन्यं तदेव स्वरूपं यस्य सः । अमिततेजाः ।

"प्राणो ब्रह्मैव तेज एवेति" श्रुतिः ॥

३५. अजिराय -

अजिरो - गमनकुशलः । "अज - गतिक्षेपणयो" रिति स्मरणात् ॥

"नम आशवे चाजिराय चेति" श्रुतिः ॥

३६. जगत्पित्रे -

जगत्पिता = जगन्निर्माता ।

"इदं सर्वमसृजते"ति श्रुतिः ॥

३७. जनकाय –

सङ्कोचविशेषणाद्यभावात् लोकत्रयस्य च जनकः ।
"त्रयाणां जनकं विभुमि"ति बृहज्जाबालश्रुतिः ॥

३८. पिनाकिने –

पिनाकः अस्यास्तीति पिनाकी - तदुक्तं "भारते" -

उपमन्यूपाख्याने –

"इन्द्रायुधसहस्राभं धनुस्तस्य महात्मनः ।
पिनाकमिति विख्यातं स च गो[1]पन्नगो महान् ॥

सप्तशीर्षो महाकायस्तीक्ष्णदंष्ट्रो विषोल्बणः ।
ज्यावेष्टितमहाग्रीवः स्थितः पुरुषविग्रहः ॥

शरश्च सूर्यसङ्काशो दृष्टः पाशुपतश्च यः ।
येन च त्रिपुरं दग्धं सर्वदेवमयश्च[2] यः ॥" इति ॥

स च तपस्यतः कण्वस्य शिरःप्रदेशोद्भूताद्वल्मीकादुत्पन्नेन वेणुना शिवविष्णुसोमानुद्दिश्य ब्रह्मणा प्रणीतेषु त्रिषु चापेषु प्रथमः ।

---

1 स च चैवं नगो महान् इति पाठान्तरम् ।

2 सर्वदेवमयः शरः इति पाठभेदः ।

यथोक्तमुमामहेश्वरसंवादे —

"युगान्तरे महादेवि कण्वो नाम महामुनिः ।
स च दिव्यां तपश्चर्यां कर्तुमेवोपचक्रमे" ॥ इत्यारभ्य

"पिनाकं नाम मे चापं शार्ङ्गं नाम हरेर्धनुः ।
तृतीयमपि शेषेण गाण्डीवमभवद्धनुः ।
तच्च सोमाय निर्दिश्य ब्रह्मलोकं गतः पुरे"ति

शिवरहस्ये –

पिनाकपाणिं भूतेशं उद्यत्सूर्यायुतप्रभम् ।
भूषितं भुजगैर्ध्यायेत्कण्ठेकालं कपर्दिनमिति ॥

"कृत्तिवासाः पिनाकी"ति श्रुतिः ॥

३९. निराधाराय –

निर्गतं आधारो यस्य (?) सः निराधारः स्वस्यैव सर्वाधारत्वात् ।

"स भगवः कस्मिन्प्रतिष्ठित इति स्वे महिम्नी"ति श्रुतिः ।

४०. सिद्दमाय –

षिङ् बन्धन इति धातोःरूपं सिःइति । कार्यकारण-सम्बन्धो वा स्वस्य सर्वदृश्यसम्बन्धो वा । तं सम्बन्धं,

तत्वमस्यादिवाक्यजन्यप्रत्ययप्रत्यारूढः सन्नसौ परमेश्वरः हन्ति नाशयतीति सिंह इत्युच्यते । हन हिंसागत्योरित्येतस्य रूपमत्र पृषोदरादित्वात्साधु । "सिंहोऽसौ परमेश्वरः" इति श्रुतिः ॥

४१. मायातीताय —

मायाया अतीतः - मायया वा अतीतः ॥ सत्वादिगुणसामान्यरूपप्रकृतिविवर्जित इत्यर्थः ।

'अतमस्कममायमिति' श्रुतिः ॥

४२. बीजाय -

बीजं - कारणम् ॥

"स कारणं करणाधिपाधिप" इति श्रुतिः ॥

४३. सर्पभूषाय -

सर्पाः भुजगाः भूषाः भूषणानि यस्य स सर्पभूषः ।

ननु भूषणत्वायोग्यसर्पधारणं शिवस्यानुचितम् । अत्यल्पमिदमुक्तम् । अस्थ्यादिभूषणं, श्मशानवासस्तद्भस्मानुलेपनं, व्याघ्रहस्त्यादिचर्मवसनं, मृग-डमरुकादिधारणं अपस्मारस्य पादुकात्वेन स्वीकारः इत्येवमादि बह्वस्ति । तर्हि कथं परिहारः ?

उच्यते — एतदेवागस्त्येन पृष्टं स्कन्दं प्रति

"स्कान्दे" एकोनविंशाध्याये —

"भगवन्सर्वधर्मज्ञेति प्रस्तुत्य

"भीषणान्दंशनपरान् बीभत्सान्विषभूषितान् ।
फणीन्द्रान्भूषणत्वेन कुतो धत्ते महेश्वरः ॥"

इत्यादिना । एतस्य सर्वस्यापि स्कन्देनोत्तरं दत्तम् । -

त्वमतीव शिवे भक्तः कर्मणा मनसा गिरा ।
तेन ते निखिलं वक्ष्ये रहस्यं शम्भुचेष्टितम्"

इत्यादिना ।

पुनश्च तत्रैव – "पुरा हिमवतः पृष्ठ" इत्यादिना ऋषीणां तपश्चरणसमये तत्परीक्षार्थं दारुकावनेऽतिसुन्दररूपेण नग्नवेषे शिवे आगते ऋषिपत्नीनां क्षोभे जाते अनन्तरं शिवं प्रति ऋषिभिः शापो दत्तः स व्यर्थो जातः । अनन्तरं चाभिचारे कृते, अग्निकुण्डादुत्पन्ने अपस्मारे, शिवेन निगृहीते पादेन, अनन्तरं शिवनिग्रहार्थमागते मृगे शिवेन निगृह्य करे धृते, अनन्तरं व्याघ्रेऽपि निगृहीते, अनन्तरं शिवपीडनार्थमागते टङ्कायुधसमूहे शिवेन पुष्पवद्धृते, तदनु कुण्डाच्छिन्नव्यामोहार्थं निर्गतभूतप्रेतपिशाचादयस्तन्नमस्कारपूर्वकं तस्यैव भृत्यरूपा जाताः ।

"ततः पञ्चफणा नागा निःश्वसन्तो विषोल्बणाः ।
शीघ्रमुत्थाय कुण्डेभ्यः समाजग्मुर्महेश्वरम् ॥"

ऋषीणामनभिज्ञानां शिवं कोपाग्नयो यथा ।
तानुपादाय नागेन्द्राञ्ज्वलितान् रूपशोभितान् ॥

दधाराभरणत्वेन तेनासीन्नागभूषणः ।
अपरैरपि नागेन्द्रैर्वासुकिप्रमुखैः शिवः ॥
वैनतेयाद्भयोद्विग्नैरलश्चक्रे तनुं निजाम् ॥" इति

एवमतिभीषणसर्पत्वेनातिप्रहरणायुधत्वेन तापत्रयनिवृत्त्यर्थिभिः परमेश्वरो ध्येय इत्यत्र इदं रहस्यम् ॥

"उद्यद्भास्करकोटिप्रकाशमादीप्तदहनमूर्धानम् ।
भीषणभुजङ्गभूषं ध्यायेद्विविधायुधं रुद्रमि" ति ॥

"अहींश्च सर्वाञ्जम्भयन् सर्वाश्च यातुधान्यः" ॥ इति श्रुतिः ॥

४४. पशूनां पतये -

पशूनां ब्रह्मादीनां द्विपदां चतुष्पदां च पतिर्नायकः

"ब्रह्माद्याः स्थावरान्ताश्च पशवः परिकीर्तिताः ।
तेषां पतित्वाद्विश्वेशो भवः पशुपतिः स्मृतः ॥"

इति पुराणम् ।

"सर्वदा यत्पशून्पाति तेषु यद्रमते पुनः ।
तेषामधिपतिर्यच्च तस्मात्पशुपतिः स्मृतः" ॥

इति महाभारतम् ।

"हरिकेशेभ्यः पशूनां पतये नम" इति श्रुतिः ।

४५. पुरन्दराय -

सुरशत्रूणां पुराणां दारणात्पुरन्दरः । त्रिपुरहा ॥

"स तिस्रः पुरो भित्त्वेति" श्रुतिः ।

४६. भद्राय -

भद्रः मङ्गलस्वरूपः । परमानन्दस्वरूपत्वात् ।

"एष एष भद्र" इति श्रुतिः ।

४७. पुरुषाय -

सर्वस्य कार्यप्रपञ्चस्य स्वरूपेण पूरयिता । यद्वा सर्वासु पूर्षु शेत इति पुरुषः

ब्रह्मगीतायाम् -

पुरुषो नाम सम्पूर्णः शिवः सत्यादिलक्षणः ।
साम्बमूर्तिधरो नान्यो रुद्रो विष्णुरजोऽपिवा ॥ इति

"अव्यक्तात्पुरुषः पर" इति श्रुतिः ।

४८. महीयसे -

महीयान्महत्तरः । अपरिच्छिन्न इत्यर्थः ॥

"महतो महीयानिति" श्रुतिः ॥

४९. महासन्तोषरूपाय -

महासन्तोषः निरतिशयानन्दः (रूपं यस्य) "विज्ञानमानन्दं ब्रह्मेति" श्रुतिः ।

५०. ज्ञानिने -

ज्ञानी सर्वज्ञ इत्यर्थः

'यः सर्वज्ञ' इति श्रुतिः ।

५१. शुद्धबुद्धये -

शुद्धा विशेषतः सर्वापरोक्षरूपा बुद्धिर्ज्ञानं यस्य सः शुद्धबुद्धिः

"यः सर्वज्ञः स सर्वविदि" ति श्रुतिः ॥

५२. वृद्धस्वरूपाय -

पूर्णस्वरूपाय । "नमोवृद्धाय चे" ति श्रुतिः ।

५३. तपसे -

तपः सर्वदोषविनिर्मुक्तं स्वयं प्रकाशमानं ब्रह्मेत्यर्थः ॥

"तपसोऽध्यजायते" ति श्रुतिः ॥

५४. परमात्मने -

परमश्चासावात्मा च परमात्मा । कार्यकारणविलक्षण नित्यशुद्धबुद्धमुक्तस्वभावः ।

गीतासु स्मर्यते -

"उपद्रष्टानुमन्ता च भर्ता भोक्ता महेश्वरः ।
परमात्मेति चाप्युक्तो देहेऽस्मिन्पुरुषः परः ॥" इति

उक्तं च वासिष्ठे -

चितेर्जीवस्वभावाया ... ... ।
चिन्मात्रं निर्मलं शान्तं तद्रूपं परमात्मनः ॥

"यः सर्वान्प्राणान्परमात्मनीति" श्रुतिः

५५. पूर्वजाय -

सर्वप्राण्यपेक्षया यदस्य पूर्वकालावस्थानं तदेव पूर्वत्वं .... चानेन सत्वाल्लक्ष्यते ।

मुख्यजन्मनोऽभावात् ।

"नमः पूर्वजाये" ति श्रुतिः ।

५६. सुरेशाय -

सुराणां ब्रह्मादीनां ईशः सुरेशः ।

"तद्दैवतानां परमं च दैवतमिति" श्रुतिः ॥

५७. ब्रह्मणे -

ब्रह्म वृद्धतमं, नित्यं सर्वाधिष्ठानं प्रत्यगभिन्नम् । प्रत्यगभिन्नत्वं च स्फुटीकृतमभियुक्तैः ॥

"अहमस्मि सदा भामि कदाचिन्नाहमप्रियः ।
ब्रह्मैवाहमतः सिद्धः सच्चिदानन्दलक्षणम्" ॥ इति ॥

भाष्यकारैरप्युक्तम् –

"यल्लाभान्नापरो लाभो यत्सुखान्नापरं सुखम् ।
यज्ज्ञानान्नापरं ज्ञानं तद्ब्रह्मेत्यवधारय" इति ॥

वासिष्ठेऽपि –

ब्रह्म चिद्भुवनं ब्रह्म ब्रह्म भूतपरम्परा ।
ब्रह्माहं ब्रह्म मच्छत्रुः ब्रह्म मन्मित्रबान्धवाः ।' इति ॥

उक्तं च भाष्यकारैः ब्रह्मणः सर्वात्मकत्वं शत्रूदाहरणपुरःसरम् "ब्रह्म दाशा ब्रह्मदासा ब्रह्मेमे कितवा" इत्यादिना ॥

"ब्रह्म ह (ह) देवेभ्यो विजिग्य" इति श्रुतिः ।।

५८. अनन्तमूर्तये —

अनन्ता ब्रह्मादिस्थावरान्ता मूर्तयः शरीराणि यस्य सः अनन्तमूर्तिः ॥

"त्वं स्त्री त्वं पुमानसि
त्वं कुमार उत वा कुमारी ।
त्वं जीर्णो दण्डेन वञ्चसि त्वं
जातो भवसि विश्वतोमुखः" इति ॥

"सर्वाणि रूपाणि विचित्य धीरो
नामानि कृत्वाऽभिवदन्यदास्ते" इति च ।

अनन्तमूर्तित्वं श्रुत्यैव स्पष्टम् ॥

५९, निरक्षराय –

निर्गतान्यक्षरणि अभिधानरूपाणि यस्मात् सः निरक्षरः ।
"यतो वाचो निवर्तन्त" इति श्रुतिः

६०. सूक्ष्माय —

सूक्ष्मः सर्वान्तरः इन्द्रियाद्यगम्यः नतु परमाणुतुल्यः ॥
"सूक्ष्मं सौम्यं पुरुषमि" ति श्रुतिः ।

महाभारते –

"चैतन्यं सर्वतो नित्यं सर्वप्राणिहृदि स्थितम् ।
सर्वातीततरं सूक्ष्मं तस्मै सूक्ष्मात्मने नमः ॥"

६१. कैलासपतये –

कैलासस्य कैलासपर्वतस्य पतिरधिष्ठाता ।
"गिरिशन्ताभिचाकशीहीति" श्रुतिः ॥

"कैलासशिखरे रम्ये शङ्करस्य शिवालये ।

देवतास्तत्र मोदन्ति तन्मे मनः शिवसङ्कल्पमस्तु" इति च ॥

६२. निरामयाय –

निर्गता आमयाः रोगाः यस्मात्स निरामयः ।

"शोकमोहं जरां मृत्युमत्येति" इति श्रुतिः ।

६३. कान्ताय –

अभिरूपतमं देहं वहन् कान्तः (तस्मै)

"कामाय कामरूपिण" इति श्रुतिः ।

६४. निरातङ्काय –

"आतङ्कस्तु ज्वरे रोगे साध्वसे मुरजध्वना" विति रत्नमाला ॥ रुक् तापशङ्कास्वातङ्क इत्यमरः ॥ तथा च, साध्वसरूपादातङ्कान्निष्क्रान्तो निरातङ्कः, निर्भयः इत्यर्थः ।

"अजरोऽमरोऽमृतोऽभयो ब्रह्मे" ति श्रुतिः ।

६५. निरालम्बाय –

आलम्बादालम्बनाद् अधिष्ठानस्वरूपेण विद्यमानान्निर्गतो निरालम्बः ।

"सर्वाधिष्ठानः सन्मात्र" इति श्रुतिः ।

६६. विश्वाय –

विश्वस्य जगतः कारणत्वेन विश्वं ब्रह्मेति उच्यते । यद्वा - परमात्मनो नभिन्नमिदं विश्वं परमार्थतः । तेन विश्वमित्यभिधीयते ब्रह्म ॥ "ब्रह्मैवेदं विश्वमिदं वरिष्ठम् इति ॥ पुरुष एवेदं विश्वमिति" च श्रुतिः । तद्भिन्नं न किञ्चित्परमार्थतः सदस्ति ॥ अथवा विशतीति विश्वं ब्रह्म । तत्सृष्ट्वा तदेवानुप्राविशदिति श्रुतेः । किं च, संहृतौ विशन्ति विश्वानि भूतानि ब्रह्मणि । यत्प्रयन्त्यभिसंविशन्तीति श्रुतेः ।

तदुक्तं सूतसंहितायाम् –

"विष्वक्सेनाय विश्वाय विश्वोत्पत्त्यादिहेतवे ।
विश्वविज्ञानरूपाय विमलाय नमो नमः" ॥ इति ।

"विश्वं पुराणं तमसः परस्तादिति" श्रुतिः ॥

६७. नित्याय यतये –

इदं पदद्वयविशिष्टमेकं नाम । यतिः विषयाभिलाषं विना आत्मज्ञाने यतनशीलः । नित्य इति विशेषणेन सर्वदा यतनशीलः ॥ उक्तं च - श्रुत्या - "यः सर्वान्भावान्परित्यज्यात्मज्ञानयोगैश्वर्ये महति महीयते । तस्मादुच्यते महादेव इति ॥ अस्यायमर्थः - सर्वान् भावान् - सकलान्पदार्थान्

परित्यज्य समन्तात्त्यक्त्वा आत्मज्ञान - योगैश्वर्ये । अहं ब्रह्मास्मीत्यात्मज्ञानं तदेव योगैश्वर्यं तस्मिन् महति प्रौढे निष्ठां लब्ध्वा परमानन्दरूपस्वात्मतत्वस्फूर्तिविशेषात् महीयत इति ॥

६८. आत्मारामाय -

आत्मारामः आत्मन्येवाऽऽरामः आरमणं क्रीडादि न तु विषयेषु यस्य सः ॥ "न हि स्वात्मारामं विषयमृगतृष्णा भ्रमयति" ति शिवरहस्ये सप्तमांशे ॥

श्रुतिस्तु पूर्वनामन्युक्तैव ॥

६९. भव्याय –

भव्यं - कुशलं भव्यगेयेत्यादिना - "भवतीति" भव्यमिति कर्तरि यत्प्रत्ययान्तत्वेन निपातनात् साधुता, तदस्यास्तीति भव्यः । अर्शआद्यच् प्रत्ययः ॥

७०. पूज्याय –

पूजायोग्यः पूज्यः सर्ववन्द्यः इत्यर्थः । तदुक्तं-

पराशरोपपुराणे -

"जन्मना लब्धजातीनामाश्रमाणां तथैव च ।
प्राधान्येन महादेवः पूज्यो नान्योऽस्ति सिद्धये" इति ॥

"ब्रह्म ह देवेभ्य" इति प्रस्तुत्य "किमिदं यक्षमि" ति श्रुतिः ॥

७१. परमेष्ठिने -

परमे जगद्रक्षणभावे स्थितः स परमेष्ठी ।

"स परमेष्ठी ब्रह्मात्मे" ति श्रुतेः ॥

७२. विकर्तनाय -

विशेषेण कृन्तति - तत्वमस्यादिमहावाक्यजन्यवृत्तिप्रत्यारूढः सन्न-ज्ञानं तत्कार्यं च सर्वं छिनत्तीति विकर्तनः सर्वसंहारसमर्थः ।
"परिभवासह" इति श्रुतिः ॥

७३. सूर्म्याय -

शोभना ऊर्मयः यस्याः सा सूर्मिः गङ्गादिनदी ।
सूर्मिः कल्याणोर्मिस्रोत इति निरुक्तम्, तत्र भवः सूर्म्यः ॥[1]

"नम ऊर्म्याय च सूर्म्याय चे" ति श्रुतिः ॥

योऽप्सुतिष्ठन्नित्यादिश्च श्रुतिः ॥

---

1 ऊर्मिषु तरङ्गेषु भवाय इत्यर्थः रुद्राध्याय ५७ पुटे आनन्दाश्रम संस्कृतग्रन्थावल्याम् ॥

७४. शम्भवे -

शं सुखम् ॥ भक्तान् भावयतीति शम्भुः । तदाहु-रागमिकाः -

"भुक्तिं मुक्तिमणूनां
स्वव्यापारे समर्थताऽऽधानम् ।
जडवर्गस्य विधत्ते
सर्वानुग्राहकः शम्भुः" इति ॥

सूतसंहितायाम् -

ज्ञात्वा यः कीर्तयेच्छम्भोर्नामान्यमिततेजसः ।
मुक्तिः करतले तस्य स्थितेति मुनयो जगुः इति ॥

वायव्यसंहितायाम् -

सर्वैश्वर्येण सम्पन्नो नाम्नां सर्वेश्वरः स्वयम् ॥
सर्वैर्मुमुक्षुभिर्ध्येयः शम्भुराकाशमध्यगः" "शम्भुराकाशमध्य" इति श्रुतिः ॥

७५. विश्वरूपिणे -

विश्वानि सर्वाणि चेतनाचेतनात्मकानि रूपाणि अस्य सन्तीति विश्वरूपी । परमेश्वरस्य विश्वरूपित्वं श्रीरुद्र-अथर्वशिर आदिषु बहुधा प्रपञ्चितम् ।

उक्तं च पराशरोपपुराणे -

"विग्रहो देवदेवस्य विश्वमेतच्चराचरमि" ति ॥

सूतसंहितायामपि -

"विश्वरूपाय विश्वासलभ्याय विदितात्मने ।
विश्वोत्तीर्णाय विश्वस्य साक्षिभूताय ते नम" इति ॥
"विश्वरूपाय वै नम" इति श्रुतिः ॥

७६. ताराय -

गर्भजन्मजरामरणसंसारमहाभयात्तारयतीति तारः ।
"नमस्ताराय नमः शम्भवे चे" श्रुतिः ॥

७७. हंसनाथाय -

हन्ति गच्छतीति हंसः । मनसोजवीय इति श्रुतेः । अविद्यां तत्कार्यं विनाशयतीति वा हंसः । स चासौ नाथश्च ईश्वरत्वात्, स हंसनाथः । अथवा हन्ति ध्वान्तमिति हंसः सूर्यः । तस्य नाथः । "तदक्षरम् ॥ तत्सवितुर्वरेण्यमि" ति श्रुतेर्वा हंसनाथ इति ॥

७८. प्रतिसर्याय -

प्रतिकूलं सरणं प्रतिसरः मनसो बाह्यविषयानुसरणनिरोधपूर्वकं प्रत्यगात्मनि सरणं प्रतिसरः । तस्यानुग्राहकत्वेन भवः

प्रतिसर्ग: । 'ईश्वरानुग्रहादेव पुंसामद्वैतवासने'ति स्मरणात् । 'नमः सोभ्याय च प्रतिसर्याय चे'ति श्रुतिः ।

७९. परावरेशरुद्राय -

परावरश्चासावीशश्च, स चासौ रुद्रश्च सः परावरेशरुद्रः ॥

ननु परावरेश इत्येवालं, रुद्र इत्यधिकं कल्प्यमिदमयुक्तम् । ईश इत्यप्यधिकम् । परावरशब्देनैव परशिवस्य प्रतिपादनात् । 'तस्मिन् दृष्टे परावरे' इति श्रुतेः । किञ्च अवर इत्यंशोऽप्यधिकः । पर इत्यनेनैव तस्याभिधानात् । 'यत्तच्छान्तमजरमभयं परं चे'ति श्रुतेः । कथं तर्हि ?

शृणु — परशिवस्य इन्द्रसूर्यवह्निब्रह्मविष्णुरुद्रेश्वराद्यपेक्षया निरतिशयोत्कर्षादिप्रतिपादनमिदं नाम ॥ तथाहि – विश्वसादिन्द्र-उत्तरः । अग्निरग्र प्रथमः । सूर्य आत्मा जगतस्तस्थुषश्च । ब्रह्मा देवानां प्रथमो विष्णुः परमः । विश्वाधिको रुद्र इत्यादि श्रुतिवशात्परशिवे केषाञ्चिदुत्कृष्टत्वसन्देहः स्यात् । तन्निवृत्त्यर्थमिदं प्रवृत्तम् । तथाहि - 'पर' इत्युक्ते इन्द्रादेरुक्तिः स्यात् – तन्निवृत्त्यर्थं 'परावरेति' । यद्यपि इन्द्रादिरितरदेवापेक्षया उत्कृष्टः तथापि पितामहस्वरूपकमलासनापेक्षया निकृष्टः । तथा च अस्मदाद्यपेक्षया इतरदेवापेक्षया च इन्द्रादिः परः यस्मादवरः स ब्रह्मा = परावरः । एवं च परावरस्य कमलासनस्य उत्कृष्टत्वनिवृत्त्यर्थं 'ईश' इति पदं प्रवृत्तम् । तथा च परावरस्य कमलासनस्य ईशः पद्मनाभ उक्तः स्यात् ॥

ननु ईशशब्दस्य परमेश्वरे रूढत्वात् कथमनेन विष्णुरुक्तः । परावरेति प्रतियोगिमहिम्ना "लोकेशो हृषीकेश" इत्यादिवदुपपत्तेः । अत उक्तं 'रुद्र' इति ।

ननु सर्वदुःखनिवारकत्वाद्विष्णोस्तेनापि स एवोक्तः । "न रूढिर्योग-मर्हतीति" न्यायात् । एवं चास्मदाद्यपेक्षया परावरशब्दवाच्या इन्द्रादिब्रह्मविष्णुरुद्रेश्वरसदाशिवपर्यन्ताः अवरा निकृष्टाः यस्मात्सः परावरः परशिवः एव ॥ एवं च पूर्वोक्त एव समासः । तथा च सर्वोत्कृष्टः सर्वैश्वर्यसम्पन्नः सर्वदुःखप्रहर्ता निर्मृष्टनिखिलदुःखानुषङ्गः परमानन्दरूपः परशिव एवानेन नाम्ना उक्तः । तथाचोक्तमभियुक्तैः -

इन्द्रं मित्रं वरुणमन(नि)लं पद्मजं विष्णुमीशं
प्राहुस्ते ते परमशिव ते मायया मोहितास्त्वाम् ।
एतैः सार्कं सकलमपि यच्छक्तिलेशे समाप्तं
स त्वं देव श्रुतिषु विदितः शम्भुरित्यादिदेवः ॥

८०. भवाय -

भवत्यस्मात्सर्वमिदं जगदिति भवः ।

महाभारते द्रोणपर्वणि व्यासः -

"देवदेवस्त्वचिन्त्यात्मा अजश्च विष्णुरव्ययः ।
सर्वरूपं भवं ज्ञात्वा लिङ्गेऽर्चयति तं प्रभुम्" ॥ इति

"नमो भवाय चेति" श्रुतिः ॥

८१. अलङ्घ्यशक्तये -

अलङ्घ्या अनिवार्या - यस्य यस्य यद्यत्कार्यं नियमितं तत्तत्तेन तेनावश्यं कर्तव्यमित्येवमाज्ञा ॥ 'भीषास्माद्वातः पवते' इत्यादिश्रुतेः। सा शक्तिः यस्य सोऽलङ्घ्यशक्तिः ।

वायव्यसंहितायामुपरिभागे श्रीकृष्णोपमन्युसंवादे तृतीयाध्याये-

"अत्याश्चर्यमिदं कृष्ण शम्भोरमितकर्मणः । आज्ञामथ शृणुष्वैतच्छ्रुता श्रुतिमुखे मया" इत्यारभ्य देवासुरसङ्ग्रामे प्राप्ते असुरेषु पराजितेषु अनन्तरं दिक्पालेषु प्रत्येकं "मयैव जिता मयैव जिता" इत्येवं विवदमानेषु अनन्तरं तन्निगृह्यास्माभिरेव जिता इति ब्रह्मविष्ण्वादिषु व्युत्थितेषु तेषां गर्वनिवृत्त्यर्थं परमेश्वरेण तृणे स्थापिते तद्धि (चालना) समर्थेषु विष्ण्वादिषु खिन्नेषु, परमेश्वरे अन्तर्हिते करुणामूर्तिरूपाया वचनम् "सात्त्वी"दित्यारभ्य

"यस्य शक्तिरमोघापि मायाव्याप्तिं वितन्वती ।
मोचयत्येव यच्छक्तिः स युष्माकमगोचरः" इति ॥

८२. इन्द्रध्वंसनिधीशाय –

इन्द्रस्य ध्वंसो येन स इन्द्रध्वंसः। स चासौ निधीशश्च स इन्द्रध्वंसनिधीशः ।

ननु शिवस्येन्द्रध्वंसकत्वमप्रसिद्धं निधीशत्वं च । उच्यते – इन्द्राभिमानध्वंसकरत्वात् । इदं च तलवकारश्रुतिप्रसिद्धम् ।

तथाहि – 'ब्रह्म ह देवेभ्यो विजज्ञे' इत्यारभ्य 'मघवन्नेतज्जानीहि । किमेतद्यक्षमिति तथेति तदभ्यद्रवत्तस्मात्तिरोदधे' इत्यन्तेन ।

तत्र हि देवासुर सङ्ग्रामः । सुराणामीशानुग्रहाज्जयः, तेषां तदज्ञान-मस्माकमेव जय इत्यभिमानस्तन्निवृत्त्यर्थमीशाविर्भावः, तदनु तेन स्थापिततृणदाहनचालनादावसामर्थ्यकथनमाग्निवाय्वोः । अनन्तरं यक्षरूपमीशं प्रति इन्द्रगमनं तत्राग्निवायुभ्यामीशस्य संवादोऽभूदिन्द्रं प्रति तु संवादमकृत्वैवान्तर्दधे परमेश्वरः इति इन्द्रस्याभिमानभङ्गः । किञ्च एतदुपबृंहक ब्रह्मगीतायां 'मिन्द्रोऽतीव विषण्णः' इत्यादिना इन्द्रस्य विषादः प्रपञ्चितः । "सम्भावितस्य चाकीर्तिर्मरणादतिरिच्यते" इति न्यायात् । निधीशत्वं च प्रसिद्धम् । निधीनां हिरण्यप्रधानत्वा-द्धिरण्यस्य परमेश्वरायत्तत्वात् । "नमो हिरण्यबाहवे हिरण्यपतये" इति श्रुतेः ।

किञ्च यक्षराजेऽपि निधीशत्वं परमेश्वरानुग्रहाल्लब्धमिति **काशी-खण्डादौ** प्रसिद्धम् । शिवपुराणेऽपि "तदा शतमखस्यापि सवज्रो दक्षिणः करः । सिसृक्षुरिव तद्गात्रे चित्रे कृत इवाभवत्" इति दक्षाध्वरध्वंसवेलायां इन्द्रस्य हस्तः सवज्रः वीरभद्रेण स्तम्भित इति प्रसिद्धम् । ननु **आदित्यपुराणे** द्विषष्टितमेऽध्याये स्कन्देनेन्द्रस्य गर्वनिरोधः कृत इति प्रसिद्धम् । शरेणैरावतं विद्ध्वेत्यादिना तत्कथम् ? उच्यते । यद्यपि स्कन्दस्य इन्द्रध्वंसकरत्वमस्ति । तथापि निधीशत्वमप्रसिद्धम् । निधीश इत्येव उक्ते कुबेरस्यापि स्यात् । अत उक्तं इन्द्रध्वंसनिधीश इति । इदं च नाम इन्द्रो अपामिन्द्रः

इत्पर्वतानामिन्द्रा वृत्राणि जिघ्नते, इन्द्रोगच्छेति वेति इन्द्रस्यैव स्तुतिः यज्ञसम्बन्धितया बहुधा दृश्यते - अत इन्द्र एवोत्तम इति मदाशङ्कानिवृत्त्यर्थम् ॥

८३. कालहन्त्रे -

कालस्य मृत्योर्हन्ता ।

'मृत्युर्यस्योपसेचनमिति' श्रुतिः ॥

८४. मनस्विने -

भक्तापेक्षितदानशीलः -

'तमीशानं परं देवमिति' श्रुतिः -

८५. विश्वमात्रे -

विश्वस्य माता व्यापी ज्ञाता वा ।

'सर्वज्ञ' इति श्रुतिः ।

८६. जगद्धात्रे -

जगतां धाता कर्ता -

८७. जगन्नेत्रे -

जगन्नियामकः - जगन्नेता ।

'सर्वं तत्प्रज्ञानेत्रमिति' उभयत्र श्रुतिः ।

८८. जटिलाय -

जटा अस्य सन्तीति जटिलः ।

अनेन लोकस्तपःप्रधानो भवेदिति लोकानुग्रहार्थतया तपस्वित्वं स्वीकृतम् । तदनेन नाम्ना सूचितम् ।

"यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः"इति न्यायात् ॥ "कपर्दिने" इत्यत्र श्रुतिरुक्ता ॥

एवमुत्तरत्रापि पूर्वोदाहृता श्रुतिर्न प्रदर्शयिष्यते ॥

८९. विरागाय -

विगतो रागो यस्य विरागः ।

"कथमनेनेदृशेन निश्चिनोती"ति श्रुतिः ।

९०. पवित्राय -

पावनः - परमस्तु पुमान् ध्यातो दृष्टः कीर्तितः श्रुतः पूजितः स्मृतः प्रणतः स सर्वान् पापानुन्मूलयतीति ॥

आदित्यपुराणे "मानवीयसंहितायां" त्रिपञ्चाशेऽध्याये -

"आद्यक्षरं निर्गुणमप्रमेयं
ज्योतिःस्वरूपं प्रवदन्ति सूरयः ।
दूरं गतं देवमनन्तमूर्तिं
नमामि सूक्ष्मं परमं पवित्रमि"ति ॥

"पुष्करमहं पवित्रमहमिति" श्रुतिः ।

९१. मृडाय -

मृडति सुखयति इति मृडः ।

"मृडधूर्तेति" श्रुतिः ॥

९२. निरवद्याय -

निरवद्यः अगर्हणीयः ।

"निरवद्यं निरञ्जनमिति" श्रुतिः ।

९३. पात्राय -

बदरस्य कुण्डमिव जगत आधारभूतत्वात्पात्रत्वमीश्वरस्य - अथवा

"दलं किञ्चित्समादाय चुलुकं जलमेव वा ।
यो दत्ते नियमेनासौ तस्मै दत्तं जगत्त्रयम्" । इति

चुलुकजलैकदलदानमात्रेण महाफलजनकत्वात् । "त्वं देवेषु ब्राह्मण" इति श्रुत्या महाब्राह्मणत्वेनोक्तत्वात् शिवस्य दानपात्रत्वम् । सत्यभामा भामेतिवत् ।

९४. स्तेनानां पतये-

स्तेनाश्चोरास्तेषां पतिः, परिवृढस्तेषां पापनाशको वा ।

"स्तेनानां पतय" इति श्रुतिः ।

९५. नादाय -

नादोऽस्यास्तीति नादः । ब्रह्मविष्ण्वादिविषयस्तोत्ररूपाणां, "नमो ब्रह्मणे नमो अस्त्वग्नये" इत्यारभ्य "नमो विष्णवे बृहते करोमी"त्यन्तानां "नम इन्द्राय नमो वरुणाये"त्येवमादीनां नामादीनां च नमस्कारपूर्वकाणां नादानां श्रुत्या परमेश्वरे अर्पितत्वात् । "स्तोमं वो अद्य रुद्राय शिक्वसे, क्षयद्वीराय नमसा दिदिष्टन" इत्यस्यायमर्थः । हे देवाः!, युष्माकं स्तोमं स्तोत्रं ब्रह्मादिभिः कृतं, अद्य इदानीं, नमसा नमस्कारेण सह रुद्राय शिक्वसे, शिक्षकाय, क्षयद्वीराय क्षयं गच्छन्ति वीरा वीरभद्र-प्रभृतयः यं प्राप्य = क्षयद्वीरः तस्मै क्षयद्वीराय दिदिष्टन प्रयच्छतेति ॥

९६. रविनेत्राय -

रविः सूर्यः सः नेत्रं लोचनं यस्य सः रविनेत्रः । लोक-साक्षिभूताक्षायेति भावः । 'सर्वस्य साक्षीति' श्रुतिः

९७. व्योमकेशाय -

गङ्गाधारणसमये व्योमवद्विशालजटावलयरूपः केशः अस्येति व्योमकेशः ।

९८. चतुर्भोगाय -

चत्वारो भोगाः — जाग्रत्स्वप्नसुषुप्तितुरीयरूपावस्थासु वैश्वानर-तैजसप्राज्ञशुद्धचैतन्यतुरीयस्वरूपेणानुभूयमानस्थूलप्रविविक्तसौषुप्तानन्द-स्वरूपानन्दरूपा यस्य सः चतुर्भोगः ।
"जागरितस्थानो बहिः प्रज्ञ" इत्यादिश्रुतिः ॥

९९. साराय –

पञ्चकोशेष्वन्तःसारत्वेन विद्वद्भिरुपलक्ष्यमाणः परमानन्दरूपः परमेश्वरः सारः ।

"रसो वै सः" । रसँह्येवायं लब्ध्वाऽऽनन्दी भवतीति" श्रुतिः ॥

यथोक्तं शिवगीतायाम् —

"उद्घाट्योद्घाट्यैकमेकं यथैव कदलीतरोः ।
वल्कलानि ततः पश्चाल्लभते सारमुत्तमम् ॥
तथैव पञ्चकोशेषु मनः सङ्क्रामयेत्क्षणात् ।
तेषां मध्ये ततः सारमात्मानमपि विन्दति" इति ॥

१००. योगिने –

योगः बाह्यविषयव्यापारपरित्यागपूर्वकमात्मज्ञानयोगैश्वर्यं सर्वदा-स्यास्तीति योगी ।

क्वेदं वेदमयं नामसहस्रं त्वहमल्पधीः ।
तथापि शम्भोर्नाम्णमाहात्म्यस्य विचेष्टितम् ॥
इदमाद्यशतकव्याख्यानम् ॥

---

१०१. ॐ अनन्तमायिने –

अनन्तमाया अस्य सन्तीति अनन्तमायी । तथाहि— महाप्रळये प्रपञ्चतिरोधानं व्यवहारकाले भूतभौतिकसर्वप्रपञ्चप्रदर्शनम् । तत्रैव स्वर्गनरकाद्यवान्तरभेदप्रदर्शनम् । पुनश्च महाप्रळये सर्वादर्शनम् । किंच, व्यवहारकाल एव जीवानां जाग्रद्दशायां सर्वविषयप्रदर्शनम् । स्वप्नदशायां जाग्रद्विषयतिरोधानमपूर्वप्रपञ्चविभाग्नं पुनश्च सुषुप्तिकाले सर्वाच्छादनमेतत् । सर्वमैन्द्रजालिकवन्मायावीव वा करोति ।

उक्तं च भाष्यकारैः –

बीजस्यान्तरिवाङ्कुरो जगदिदं प्राङ्निर्विकल्पं पुनः
मायाकल्पितदेशकालकलनावैचित्र्यचित्रीकृतम् ।
मायावीव विजृम्भयत्यपि महायोगीव यःस्वेच्छया
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥

"इन्द्रो मायाभिः पुरुरूपमीयत" इति श्रुतिः ।

१०२ धर्मिष्ठाय –

अतिशयितधर्मवान् श्रेष्ठः । धर्माधर्मविहीनोऽपि पुण्यपापकृतां नियमेनोत्कर्षनिकर्षप्रापणरूपमर्यादापालने स्थितत्वात् ।

"एष ह्येव स साधुकर्म कारयती"त्यादि श्रुतिः ।

१०३. वरिष्ठाय –

वरिष्ठः श्रेष्ठः । "परं विज्ञानं यद्वरिष्ठ"मिति श्रुतिः ॥

१०४. पुरत्रयविघातिने –

पुरत्रयं विहन्तीति पुरत्रयविघाती । आदित्यपुराणे द्विसप्ततितमाध्याये–

"अथ रुद्रस्य देवस्य निर्मितो विश्वकर्मणा ।
सर्वलोकमयो दिव्यो रथो यत्नेन सादरम् ॥

इति प्रस्तुत्य सर्वलोकभूतदेववेदमयश्चन्द्रसूर्यमयचक्रद्वयेत्यादिविशिष्टरथनिर्माणानन्तरं रथारूढे परमेश्वरे, मेरौ चापे विष्ण्वादौ बाणरूपे ब्रह्मणा रथे प्रेरिते, अनन्तरं देवानां, अनादिसिद्धतया विद्यमानमेव पशुत्वं पणविनोदेन द्रढीकृते ? तदनु देवैर्विनायके पूजिते, अनन्तरं इन्द्रस्कन्दादिभिश्च परिवृते, तदनु पुरत्रयस्यैकत्र समागमने ऋष्यादिभिश्च सन्तोषपुरःसरं जयशब्दे कृते ब्रह्मणा 'जय' इत्युक्ते

अथ देवो महादेवः सावज्ञं च तदैक्षत । (सवज्ञं तमवैक्षत)

पुरत्रयं विरूपाक्षस्तत्क्षणाद्भस्मसात्कृतम् (तत्क्षणाद्भस्मसाद्व्यधात्)

इत्यादि प्रसिद्धम् ।

उक्तं च सप्तमांशे रहस्ये (शिवरहस्ये)

"रथः क्षोणी यन्ता शतधृतिरगेन्द्रो धनुरथो
रथाङ्गे चन्द्रार्कौ रथचरणपाणिः शर इति ।
दिधक्षोस्ते कोऽयं त्रिपुरतृणमाडम्बरविधि-
र्विधेयैः क्रीडन्तो न खलु परतन्त्राः प्रभुधियः ॥" इति

इदमपि रहस्यान्तरम् —

साङ्ख्यामिषेण वपुषा प्रविराजमानं
दग्धत्रिपुरत्रयतृणाशनमन्दहासम् ।
दैत्यान्दिधक्षुमचलेश्वरचापपाणिं
ध्यायेत्पुरारिममरौघरथाधिरूढम् ॥ इति

श्रुतिस्तु "तेषामसुराणां तिस्र इत्यारभ्य स तिस्रः पुरो भित्त्वैरयेवमन्ता"
इति ॥

१०५. गरिष्ठाय —

गरिष्ठो गुरुतमः ।

"ईशानः सर्वविद्यानामिति" श्रुतिः ।

१०६. गिरीशाय –

गिरेः कैलासस्येशः ।

१०७. वरदाय –

वरदः भक्तानामिष्टप्रदः ।

“वरदं देवमीडय्मिति” श्रुतिः ।

१०८. व्याघ्रचर्माम्बराय –

व्याघ्रचर्म अम्बरं यस्य सः

“तथा पिनाकहस्तः कृत्तिवासा” इति श्रुतिः ।

१०९. दिशावस्त्राय –

दिशा — दिक् ॥ सा वस्त्रं यस्य (सः) तथोक्तः ।

यथा वाचा निशादिशेति स्मरणात् ॥

इदं च दारुकावने मुनिवधूपरीक्षार्थमुपात्ताया मूर्तेर्नाम । एतेन सर्वसम्मोहकत्वमुक्तम् । ईश्वरत्ववृषारूढत्वोमासहायत्वादिरूपाच्छादनेन वेषान्तरस्वीकरात् ।

“कृत्स्नवीताय धावत” इति श्रुतिः ॥

११०. परमप्रेममन्त्राय –

उत्कृष्टप्रेमास्पदो मन्त्रः पञ्चाक्षर्यादिरूपो यस्य सः । तत्रैव 'शिवरहस्ये' ॥

वायवीय संहितायां उपरि भागे द्वादशाध्याये

"मन्त्रे षडक्षरे सूक्ष्मः पञ्चब्रह्मतनुः शिवः ।

वाच्यवाचकभावेन स्थितः साक्षात्स्वभावतः ।

वाच्यः शिवः प्रमेयत्वान्मन्त्रस्तद्वाचकः स्मृतः" इति

'मन्त्रिणे वाणिजाये'ति श्रुतिः

१११. प्रथमाय –

देवानां प्रधानभूत आद्यो वा प्रथमः ।

'प्रथमो दैव्यो भिषक्' इति श्रुतिः ॥

११२. सुचक्षुषे –

शोभनानि चक्षूंषि सूर्यचन्द्रवह्निरूपाणि यस्य सः सुचक्षुः ।

"यथा कप्यासं पुण्डरीकमेवमक्षिणीति" श्रुतिः ॥

ननु विग्रहवेलायामक्षीणीति बहुवचनं प्रदर्शितम् । उदाहृतश्रुतौ अक्षिद्वयं प्रतीयते, नैष दोषः । व्यवहारदशायां नेत्रद्वयेनैव व्यवहारः । न तु वह्निस्वरूपनिटिलनेत्रेण । तेन तु कदाचिदेव मदनदहनादिकाले व्यवहारः । उक्तं चाभियुक्तैः —

दग्धं यदा मदनमेकमनेकधा ते

मुग्धः कटाक्षविधिरङ्कुरयाञ्चकार ।

धत्ते तदाप्रभृति देवि ललाटनेत्रं

सत्यं ह्रियैव मुकुलीकृतमिन्दुमौलेः । इति

अत एव श्रुत्यन्तरे लोचनद्वयस्याभिधानम् ।

'अग्निर्मूर्धा चक्षुषी चन्द्रसूर्यौ' विति ॥

११३. आद्याय –

आदौ भवः आद्यः । सर्वेषामपि कारणमित्यर्थः ।

"आदि स संयोगनिमित्तहेतुरि"ति श्रुतिः ।

११४. शूलहस्ताय –

शूलं हस्ते यस्य सः तथा ।

"अयमेको बिभर्ति हस्त आयुधं शुचिरुग्र" इति श्रुतिः ॥

११५. शितिकण्ठाय -

शितिः श्वेतवर्णेन विशिष्टः कण्ठप्रदेशो यस्यासौ शितिकण्ठः ।

'नीलग्रीवाः शितिकण्ठा' इति श्रुतिः ।

११६. उग्राय

पापरोगादिभिः स्वयमनभिभवनीयः ।

विरोधिनो नाशयितुं क्रोधयुक्तो वा सर्वसंहारसमर्थो वा उग्रः ।

'नम उग्राये'ति श्रुतिः ।

११७. वामदेवाय –

वामः सुन्दरः । 'मङ्गलायतनं देवं युवानमतिसुन्दरमित्यागम-वचनात् ॥ स चासौ देवश्च वामदेवः । वामः वननीयः सम्भजनीयः, स चासौ देव इति वा । मुमुक्षुभिः प्रत्यगात्मत्वेन सेव्य इति यावत् ॥ 'वामदेवाय नमो ज्येष्ठायेति' श्रुतिः ॥

११८. श्रीकण्ठाय –

श्रीः कालकूटजनिता शोभा । तद्वान्कण्ठो यस्य सः ॥ तथा कालकूटजनितमालिन्यमपि शोभैव परमेश्वरस्य ।

'विकारोऽपि श्लाघ्यो भुवनभयभङ्गव्यसनिन' इति न्यायात् । अथवा श्रीः विषमेव, 'श्रीर्वेषरचना शोभा सम्पत्सरलशाखिषु । वाणीलक्ष्मीलवङ्गेषु विषे बिल्वेऽपी'ति नानार्थरत्नमाला । तद्वान्कण्ठो यस्येति ।

११९. विश्वेश्वराय –

विश्वेषामीश्वरो विश्वेश्वरः ।

'पतिं विश्वस्यात्मेश्वरमिति' श्रुतिः ॥

१२०. सूर्याय -

सुवति प्रेरयति कर्मणि लोकानिति सूर्यः । तद्रूपत्वात् ।

तदुक्तं कौर्मे — सूर्यहृदये — 'नमः सूर्याय रुद्राये'ति ।

'कपर्दिने नमो नमः सूर्याये'ति श्रुतिः ॥

१२१. गौरीशाय -

गौरीशोऽम्बिकापतिः ॥

१२२. वराय -

वरः श्रेष्ठः सर्वोत्कृष्टः । सर्वेश्वर इति यावत् ।

"श्रेष्ठोऽहं वरिष्ठोऽहमि"ति श्रुतिः ॥

१२३. मृत्युञ्जयाय -

मृत्युर्मरणं स्वभक्तानां मृत्युं जयति, स्वोपासनादिना परिहरति इति मृत्युञ्जयः ।

"तमेवं विदित्वाऽतिमृत्युमेती"ति श्रुतिः ॥

१२४. वीराय -

* विशिष्टा इरा व्यापारो यस्य सः वीरः ।

विक्रमशालित्वाद्वा परैरनभिभवनीय इति वा ।

अभि नो वीरो अर्वति – अल्यतिक्षमेत – प्रजायेमहि रुद्र प्रजाभिरिति श्रुतिः ।

---

* विशिष्टा इरा, भूमिः, वाक् आनन्दानुभूतिः यस्येति विशिष्टश्चासौ ईरः वायुश्चेति वा । सर्वेश्वरस्य ज्ञान-आनन्दमयत्वात् भूतात्मकत्वाच्च तत्त्वं युज्यते तस्य ॥

१२५. वीरभद्राय -

वीरश्चासौ भद्रश्च वीरभद्रः । वीरभद्रो नाम दक्षक्रतुनिषूदनार्थं रुद्रेण सृष्टो गणेश्वरः । तदुक्तं कल्पभेदेन – क्वचिद्रुद्रस्वेदबिन्दुरूपात् क्वचिद्रुद्रदेहोत्पन्नतेजसः । क्वचित्तद्देहोत्पन्नवह्निना क्वचित्तज्जटायाः क्वचित्तेनैवेति बहुधा स्मर्यते ॥ तथाहि ब्रह्माण्डपुराणे – उत्तरभागे ।

अथ देवो महादेवो ललाटतटसम्भवम् ।
एकं स्वेदपयोबिन्दुं नखाग्रेणाऽऽक्षिपत्क्षितौ ।
तत उत्तस्थिवानेको लोकघस्मरविग्रहः ।
कालाग्निरिव दीप्ताङ्गो वीरभद्रो गणेश्वर" इति ॥

वामनपुराणे –

एतच्छ्रुत्वा वचो रौद्रं रुद्रः कोपान्वितोऽभवत् ।
क्रुद्धस्य सर्वगात्रेभ्यो निश्चेरुः सहसार्चिषः ॥
* सहक्रोधास्त्रिणेतस्य गात्ररोमान्तरोद्भवाः ।
गणाः सङ्ख्यातिगा जाता वीरभद्रपुरोगमाः । इति

काशीकाण्डे –

ततस्तत्क्रोधजाद्वह्नेराविरासीन्महाद्युतिः ।
भद्रस्तु प्रतिभाकारः कालमृत्युप्रकम्पनः इति ।

---

* सक्रोधाश्च त्रिणेत्राश्च गणा रोमान्तरोद्भवाः । इति पाठान्तरम् ।

तत्रैव

महावीरोऽसि हे भद्र मम सर्वगणेष्विह ।

नाम्ना त्वं वीरभद्रेति भव लोकेषु विश्रुतः' । इति ।

'पाद्मे' शिवं प्रति राक्षसः -

'त्वज्जटोद्घाटनेनैव पुरुषः सम्भाविष्यति ।

तेनैव मरणं नान्यैरिदमेव व्रतं शिवम् ॥

शिवः -

'भविष्यत्येवमेवं तदित्युक्त्वान्तरधीयते'ति प्रस्तुत्य राक्षसवधानन्तरं वीरभद्रं प्रति सुराङ्गनास्तुतिः

'निपत्य दण्डवद्भूमौ वीरभद्रमथाब्रुवन्निति ॥

'कौर्मे'

ससर्ज सहसा रुद्रो दक्षयज्ञजिघांसया ।

सहस्रशिरसं क्रुद्धं सहस्राक्षं महाभुजम् ।

सहस्रपाणिं दुर्धर्षं युगान्तानलसन्निभम् ।

दंष्ट्राकरालं दुष्प्रेक्षं शङ्खचक्रगदाधरम् ।

दण्डहस्तं महानादं शार्ङ्गिणं भूतिभूषणम् ।

वीरभद्र इति ख्यातं देवदेवसमन्वितम्'ति ॥

तद्धेतुत्वाद्वीरभद्र इति ॥

श्रुतिस्तु पूर्वनाम्न्युक्ता ॥

१२६. कामनाशाय -

कामो मन्मथः तं नाशयतीति कामनाशः कामनाश-करत्वं च शिवस्य स्मृतीतिहासपुराणादिषु प्रसिद्धम् । तेन च 'ज्ञानं विरागतैश्वर्य'मिति श्लोकोक्तं वैराग्याख्यं द्वितीयमव्ययं सूचितम् । मुमुक्षूणां कामं नाशयतीतिवा ॥

'पाद्मे शिवं प्रस्तुत्य

'कामं दृष्टिनिपातेन त्रैलोक्यविजयार्जितम् ।
निनायानङ्गपदवीं वीक्षमाणेष्वजादिष्विति' ॥

'अकामगं रूपं शोकान्तरमिति' श्रुतिः

१२७. गुरवे -

सर्वेषां ब्रह्मादीनां समस्तविद्यानामुपदेष्टत्वाज्जनकत्वाच्च गुरुः ।

'यो ब्रह्माणं विदधाति पूर्वं
यो वै वेदांश्च प्रहिणोति तस्मै ।
तं ह देवमात्मबुद्धिप्रकाशं
मुमुक्षुर्वै शरणमहं प्रपद्य' इति श्रुतिः

१२८. मुक्तिनाथाय -

मुक्तेः कैवल्यरूपाया नाथः । परमेश्वरप्रसादतज्ज्ञानायत्तत्वा-त्तस्याः ॥

'तमहं प्रत्ययव्याजात्सर्वे मुह्यन्ति जन्तवः ।
तथापि शिवरूपेण विजानन्ति विमोहिताः ।

प्रसादादेव रुद्रस्य श्रुत्युत्पन्नात्मविद्यया ।

बहूनां जन्मनामन्ते जानन्त्येव शिवं बुधाः' । इति

'सूतसंहितायाम्' ॥

'ज्ञात्वा देवं सर्वपाशापहानिरिति' श्रुतिः

१२९. विरूपाक्षाय -

विरूपाणि विरुद्धस्वरूपाणि लोकविरुद्धत्रित्वविशिष्टानि अक्षीणि यस्य सः विरूपाक्षः ।

'वायवीयसंहितायाम्' -

'सर्वकल्याणनिलयः शक्त्या तादृशयान्वितम् ।

ज्ञात्वा देवं विरूपाक्षं ब्रह्मनारायणौ तदेति' ॥

'ऊर्ध्वरेतं विरूपाक्षमिति' श्रुतिः

१३०. सूताय -

जगद्यन्त्रात्मनो रथस्य नियन्ता सूतः ।

'नमः सूतायाहन्त्याये'ति श्रुतिः ।

१३१. वह्निनेत्राय -

वह्निर्नेत्रं ललाटे यस्य सः वह्निनेत्रः ।

अनेन त्रिपुरदाहमदनशोषणब्रह्माण्डोपशामकत्वं शिवस्य सूचितम् ।

तदुक्तमभियुक्तैः -

'पक्ष्मालीपिङ्गलिम्नः कण इव तटितां यस्य कृत्स्नः समूहो
यस्मिन्ब्रह्माण्डमीषद्विघटितमुकुले कालयज्वा जुहाव ।
अर्चिर्निष्टप्तचूडाशशिगलितसुधासारशाखाग्निकोणं
तार्तीयीकं पुरारेस्तदवतु मदनप्लोषणं लोचनं वः' इति

१३२. जलन्धरशिरश्छेत्रे -

जलन्धर इति दुष्टः कश्चनासुरः तस्य शिरश्छेत्ता । 'पाद्मे' त्रयोविंशाध्याये पुत्रं प्रति मृकण्डूपदेशे :—

'जलन्धरं महादर्पं हृतत्रैलोक्यसम्पदम् ।
चरणाङ्गुष्ठरेखोत्थे[थ]जलमध्ये सुदर्शनम् ॥
गुणावस्थाग्निकालात्मा लोकशक्तित्रयात्मकम् ।
शिवः कालात्मकं चक्रं दक्षिणाङ्गुष्ठरेखया ॥
निर्ममे(निर्माया)ऽमोघसङ्कल्पः क्षणकाष्ठाकलात्मकम् ।
तेनासुरं द्विधाकृत्वा ररक्ष भुवनत्रयम् ।' इति ।

'शङ्करसंहितायां' द्विचत्वारिंशाध्याये गर्विष्ठमिन्द्रं प्रति कुपिते परमेश्वरे पुनरप्युपशान्ते, तस्य कोपः समुद्रे निक्षिप्तः स जलन्धरासुरोऽभूत् । स ब्रह्मदत्तवरः शक्रविष्ण्वादीन् जित्वा शिवं प्रति युद्धार्थमागतवान् । तदनु शिववचनम् —

पादेन निर्मितं चक्रं जलन्धर महार्णवे ।

बलवान्यदि चोद्धर्तुं तिष्ठ योद्धुं न चान्यथा ।

इत्युक्त्वा शम्भुना तेन दे:समास्फोटच्च दानवः

(दोषावास्फोट्य दानवः)

'सुदर्शनाख्यं तच्चक्रं तेन हन्तुं गृहीतवान् ।

अतीव दुर्भरं चक्रं कथंचित्तद् द्विजोत्तम ।

स्थापयामास वै स्कन्धे द्विधाभूतश्च तेन सः ।' इति ।

'अहींश्च सर्वाञ्जम्भयन्त्सर्वाश्च यातुधान्यः' इति श्रुतिः

१३३. हविषे -

भोक्तव्यवस्तुजातं हविः, तद्रूपा देवी, तदभेदाच्छिवोऽपि हविः । तदुक्तं 'शिवपुराणे' 'रसजातं महादेवी'ति । ब्रह्मार्पणं ब्रह्म हविरिति भगवद्वचनात् । यद्वा सर्वानन्दकरत्वाद्धविः । परः शिवः । 'आनन्दयति दुःखाढ्यं जीवात्मानं कृपाबलादि'ति ब्रह्मगीतावचनात् ।

'रसो वैसः, रसं ह्येवायं लब्ध्वाऽऽनन्दी भवति' इति श्रुतिः ।

१३४. हितकारिणे -

हितं दुःखनिवृत्तिः सुखरूपं तत्करणशीलः । प्रत्यगात्मतया ज्ञातः सन् हितकारी ।

'तरति शोकमात्मवित् । ब्रह्मवेद ब्रह्मैव भवती'ति श्रुतिः ।

१३५. महाकालाय -

महानुपाध्यनवच्छिन्नः, स चासौ कालश्च ।

तद्रूपत्वान्महाकालः । महाकालाख्ये पुण्यस्थाने स्थितं महाकालं लिङ्गं, तद्रूपत्वाद्वा महाकालः ।

'कालाय नम' इति श्रुतिः ।

१३६. वैद्याय -

वेद्यः, तदधीते तद्वेदेत्यप्रत्ययः । ध्यानमात्रेण रोगोपशमात्सर्वपापोपशमाद्वा अविद्यादिसर्वक्लेशोपशमाद्वा (क्लेशापगमाद्वेति च पाठभेदः) । प्रदर्शितं च **भट्टभास्करेण**

'गजचर्मावृततनुं स्फुरत्प्रहरणोज्ज्वलम् ।
सर्वरोगहरं ध्यायेद्देवं कुञ्जरभेदिनम्' । इति
सर्वपापहरं देवं सर्वाभरणभूषितम् ।
ध्यायेत्सर्वायुधधरं सर्वलोकमहेश्वरम्' इति ॥

भिषक्तमं त्वां भिषजां कृणोमीति श्रुतिः ।

१३७. सङ्घृणेशाय -

सं - समीचीना पूजाद्यपेक्षारहिता घृणा करुणा यस्याः सा सङ्घृणा । सा शिवा करुणामूर्तिः । शिवाऽभिन्ना शिवङ्करीति **ब्रह्मगीतायाम्** । तदभिन्नः शिवोऽपि सङ्घृणः, स चासावीशश्च सङ्घृणेशः ॥ अथवा सङ्घृणायाः करुणामूर्तेः शिवाया ईशः पतिः ।

'अम्बिकापतय' इति श्रुतिः ।

१३८. ओङ्काररूपाय -

ओङ्कारः रूपं स्वरूपं यस्य सः तथा । ओङ्काररूपत्वं च तदभिधानत्वाद्वा, तत्प्रतीकत्वाद्वा । तदभिधानत्वं ओमित्यक्षर-मित्यादिना प्रसिद्धम् । ओङ्कार प्रतीकत्वं तु यःपुनरेतं त्रिमात्रेणेत्या-दिना प्रश्नोपनिषदादौ प्रसिद्धम् ।

'परं चापरं च ब्रह्म यदोङ्कार' इति श्रुतिः ॥

१३९. सोमनाथाय -

उमया सहितः सोमः स चासौ नाथश्च, सोमनाथः ॥ सोमस्य नाथ इति वा, चन्द्रचुडत्वात् (चन्द्रपूजितत्वात्) 'स सोमलोक ॐकार' इति श्रुतिः ।

१४०. रामेश्वराय -

रामस्य ईश्वरः रामेण गोदावर्यादौ बहूनि लिङ्गानि प्रतिष्ठापिता-नीत्युमासंहितायां प्रसिद्धम् ।

किञ्च, 'पाद्मे पुराणे'ऽपि

'अथ रामगिरौ रामः पुण्ये गोदावरीतटे ।

शिवलिङ्गं प्रतिष्ठाप्ये,ति प्रसिद्धम् । शिवलिङ्गप्रतिष्ठातेति

श्रीरामविषयस्तुतिरपि प्रसिद्धा । सेतुबन्धे * रामेश्वरे रामनाथ इति शिवस्य रामेश्वरत्वमिति प्रसिद्धमेव ।

'तव श्रिये मरुतो मर्जयन्त रुद्र यत्ते जनिः चारुचित्र'मिति श्रुतिः ॥

१४१. शुचये -

स्मरतां स्तुवतामर्चयतां पावनाच्छुचिः ।

'अस्पर्शश्च महाञ्छुचि'रिति श्रुतिः ।

१४२. भौमेशाय -

भूम्या स्तुतोऽर्चितो वा भौमः, स चासावीशश्च भौमेशः । भौमस्य ईश इति वा तदुत्पादकत्वात् । तदुक्तं व्यासेन

'महेश्वरस्याननस्वेदबिन्दो-
भूमौ जातं रक्तमाल्याम्बराढ्यम् ।
सुवर्चसं लोहिताङ्गं कुमार-
मङ्गारकं सदा शरणमहं प्रपद्ये' इति ।

भविष्योत्तरपुराणे' नागखण्डे चतुर्विंशाध्याये 'कावेर्या दक्षिणे-तीरे तेजिनीवनस्य वायव्यभागे घटिकाद्वयसमीपे भूम्या लिङ्गं प्रति-

* अत एव 'अत्र पूर्वं महादेवः प्रसादमकरोत्प्रभु'रिति रावणवधानन्तरं पुष्पकमारुह्य सीतया लक्ष्मणेन वानरेन्द्रैश्च सह अयोध्यां प्रति निवर्तमानस्य रामस्य स्वस्थापितशिवलिङ्गं प्रदर्श्य कथनं श्रीमद्रामायणे ॥

धाप्य पूजा कृतेति प्रसिद्धम् । तत्रैव गर्गशापविमोचनार्थं पुरूरवसा राज्ञा कृते स्तोत्रे

'पञ्चाक्षरीजपासक्तभक्तचित्तनिवासिने ।
भूमिपूजितपादाय भवते शम्भवे नमः ।
कुर्वते पञ्चकृत्यानि लीलयैव गुणाश्रयात् ।
भिषजे भवरोगाणां भीमेशाय नमो नम' इति ॥

१४३. त्रियम्बकाय -

त्रीण्यम्बकान्यक्षीणि यस्य सः त्र्यम्बकः ।
अथा त्रित्वसङ्ख्याव्यवच्छिन्नानां ब्रह्मविष्णुरुद्राणामम्बकः पिता ॥
'त्रयाणां जनकं विभुमिति' श्रुतिः ।

१४४. निरीहाय -

ईहा = इच्छा, ईहया निर्गतः निरीहः ।
श्रुतिरुक्ता ॥

१४५. केदाराय -

केदारः पुण्यक्षेत्रत्वेन प्रसिद्धः अस्य अस्तीति केदारः ।
'क्षेत्राणां पतय' इति श्रुतिः ॥

१४६. गङ्गाधराय –

धरतीति धरः । गङ्गाया धरः इति गङ्गाधरः । गङ्गा चात्र हैमवती कुटिलापरनामधेया ब्रह्मशापासादितजलभावा 'वामन-पुराण' प्रसिद्धा, यद्धारणाय भगीरथेन शिवः प्रसादितः ॥ एतेन भक्तजनदश्यत्वमितरासाध्यकर्मकरत्वं च सूचितम् । 'अपाणिपादोऽह-मचिन्त्यशक्ति'रिति श्रुतिः । गङ्गाधारणस्य इतराऽसाध्यत्वं 'चारण्य-पर्वणि' भगीरथं प्रति गङ्गावचनेन दर्शितम् ।

'करिष्यामि महाराज वचस्ते नात्र संशयः ।
वेगं तु मम दुर्धर्षं पतन्त्या गगनाच्च्युतम् ॥
न शक्तस्त्रिषु लोकेषु कश्चिद्धारयितुं नृप ।
अन्यत्र विबुधश्रेष्ठान्नीलकण्ठान्महेश्वरादि'ति ॥

उक्तं चाभियुक्तैः

'गङ्गा धृता न भवता शिव पावनीति,
नास्वादितो मधुर इत्यपि कालकूटः ।
संरक्षणाय जगतां करुणातिरेकात्
कर्मद्वयं कलितमेतदनन्यसाध्यम्' । इति ।

१४७. कवये –

कविः क्रान्तदर्शी, सर्वज्ञ इति यावत् ।
'कविर्मनीषी परिभूरि'ति श्रुतिः ।

१४८. नागनाथाय –

नागस्य तक्षकादेर्नाथः, तेन पूजितः लिङ्गादिषु स नागनाथः ।

तव श्रिये मरुतो मर्जयन्त रुद्र यत्ते जनिम चारु चित्रमिति श्रुतौ 'मरुत' इति शब्देन भोगमोक्षार्थितया ये लिङ्गे पूजां कृतवन्तस्ते सर्वे उपलक्षिताः

१४९. भस्मप्रियाय –

भस्म तावत्प्रसिद्धं श्रौतं स्मार्तं लौकिकं चेति । तद्विप्रादिभिर्यथाधिकारं समन्त्रकममन्त्रकं वा धृतं सर्वपापनिवारकम् ।

'भस्मनोद्धूलनं चैव तथा तिर्यक्त्रिपुण्ड्रकम् ।
महापापविनाशाय विधत्ते वैदिकी श्रुतिः' ।

इत्युक्तत्वात् । तल्ललाटादिषु त्रिपुण्ड्रतया धृतमुद्धूलितं च प्रियं यस्य सः । भस्मशब्देन भस्मधार्यप्युपलक्षितः । सोऽपि प्रियो यस्य स भस्मप्रियः इति च ॥

'त्रिपुण्ड्रं भस्मना करोति यो विद्वानिति प्रस्तुत्य शिवसायुज्यमेति' इति श्रुतिः ॥

१५०. सूद्याय –

सूदः कर्मप्रदेशः । तत्रत्यरूपः सूद्यः ॥

'नमः सूद्याय' चेति श्रुतिः ।

१५१. लक्ष्मीशाय –

लक्ष्मीरणिमादिसम्पत् । सम्पत्तिः श्रीश्चलक्ष्मीश्चे'त्यमरः' । तस्या ईशः । अणिमाद्यष्टैश्वर्यस्य ईश्वराधीनत्वात् ।

'तमीश्वराणां परमं महेश्वरमिति' श्रुतिः ।

१५२. पूर्णाय –

पूर्णो देहेन्द्रियादिपरिच्छेदरहितः । सर्वप्रत्यगात्मरूपः परशिव इत्यर्थः ॥ तदुक्तं 'सूतसंहितायाम्'

'अन्यत्रास्तितया भातं तथा नास्तीति शब्दितम् ।
सर्वं पूर्णं शिवं पश्यन् स्वयं पूर्णः शिवो भवेत्' ॥ इति

'पूर्णमदः पूर्णमिदमिति' श्रुतिः ॥

१५३. भूतपतये –

भूतानां पृथिव्यादीनां चतुर्विधभूतग्रामाणां प्रमथगणानां च पतिः नियन्ता ।

'एष भूताधिपतिरेष भूतपाल' इति श्रुतिः ।

१५४. सर्वज्ञाय –

सर्वश्चासौ ज्ञश्च सर्वज्ञः । सर्वात्मकत्वात्स्वप्रकाशकत्वाच्च ॥

'सर्वं जानातीति' श्रुतिरुक्ता ॥

१५५. दयाळवे –

दयाशीलो दयाळुः । अनेन परमेश्वरस्य या शान्ता तनूः सर्व-ह्लादरूपिणी सा प्रदर्शिता ।

'या ते रुद्र शिवा तनूरि'ति श्रुतिः ।

१५६. धर्माय –

धर्मैराराध्यत इति धर्मः

'तपांसि सर्वाणि च यद्वदन्ति' इति श्रुतिः ।

सर्वेषां धारणाद्वा ॥ 'अणुरेष धर्म' इति श्रुतिः ॥

१५७. धनदेशाय –

धनं ददातीति धनदः कुबेरः । तस्य ईशः । तेन निधीशत्व-सिध्यर्थं लिङ्गादिषु पूजितः धनदेशः । यद्वा स्वर्णादिदानपरस्य ईशः । (दातुः परायणम्—प्राप्यस्थानम्)

'रातिर्दातुः परायणमि'ति श्रुतिः ।

१५८. गजचर्माम्बराय –

गजासुरस्य चर्म कृत्तिरम्बरं वासो यस्य सः गजचर्माम्बरः ॥

श्रुतिरुक्ता ।

१५९. फालनेत्राय –

फाले नेत्रं यस्य सः फालनेत्रः । इदं नाम परमेश्वरस्य सर्वातिशयद्योतनार्थम् ।

१६०. यज्ञाय –

सर्वयज्ञस्वरूपत्वाद्यज्ञः ।

ब्रह्मपुराणे भिक्षाटनसमये शिवं प्रति वरुणः –

'त्वमादिस्त्वमनादिश्च त्वं प्रभुः सर्वतोमुखः ।

त्वमात्मा त्वं महादेवस्त्वं यज्ञस्त्वं सनातन' इति ॥

'त्वं यज्ञस्त्वं विष्णुरिति' श्रुतिः ॥

१६१. श्रीशैलपतये –

श्रीशैलस्य शिवस्थलत्वेन प्रसिद्धस्य, 'कृष्णाया' दक्षिणतीरे विद्यमानस्य पतिः नाथः । तत्र स्थित इति यावत् ॥

'गिरिशे'ति श्रुतिः ॥

१६२. कृशानुरेतसे –

कृशानुना पीतं रेतो यस्य सः । कृशानुवद्दाहकरं कृशानुशरीरप्रविष्टं सत् कृशानुभावं प्राप्तं रेतो यस्य सः । एतत्सर्व'मादित्यपुराणे' प्रसिद्धम् । तथाहि –

परमेश्वरे देव्या बहुकालं कुमारोत्पत्यर्थं सङ्गते तद्वशाद्देवानां भये जाते अनन्तरं तैःस्तुते परमेश्वरे तान्प्रति वरदानार्थमाविर्भूते तैः कुमारोत्पत्तिरुमागर्भद्वारा मास्त्विति प्रार्थिते, परमेश्वरेणानन्तर-मेवमस्त्विति प्रस्तुत्य रेतः पुत्रार्थं चैव युष्माभिः शीघ्रमेवोपभुज्यता-मिति शिवेनोक्ते विष्ण्वादिदेवसमूहे भीत्या तूष्णीं स्थिते सति, तत्राग्निः —

'अथ देवेषु सीदत्सु वह्निर्गोष्विव कर्दमे ।
प्रसार्य चाञ्जलिं शम्भुं रेतो मुञ्चेति चाब्रवीत् ॥
देवेदेवामृतं दिव्यं हस्तयोर्मम शङ्कर ।
शी मेव प्रयच्छ त्वं पिबन्तु सुरपुङ्गवाः ॥
ततो लिङ्गाद्विनिष्क्रान्तं चन्द्रांशुरिव निर्मलम् ।
जाति (त)नीलोत्पलामोदं पाणौ वह्नेर्ददौ शिवः ॥
करयोः पतितं घोरमभवत्पावकस्य तु ।
ततो वह्निस्ततः शुक्लं प्रज्वलद्भास्करप्रभम् ॥
सुधेति मनसा मत्वा प्रहृष्टात्मा मुदान्वितः । (पपौ मुदा)
अथ पीते तदा शुक्ले वह्निना मुनिपुङ्गवाः ॥
रेतःपानेन सन्तर्प्य देयान्वै सुरपूजितः ।
विसृज्य तांस्तु भगवांस्तत्रैवान्तरधीयत ॥
तदा हविर्भुजं देवं विष्णवजेन्द्रपुरोगमाः ।
यथागतं ययुस्तत्र पूजयित्वा दिवौकसः ॥

तेजसा दह्यमानोऽग्निः पातालं सुतलं गतः' इति ॥

"शाश्वतोजोनन्यस् ... तत्रे"ति श्रुतिः ॥

१६३. नीललोहिताय -

कण्ठे नीलोऽन्यत्र लोहित इति नीललोहितः। यद्वा गौरीमिश्रित-देहत्वादर्धनीलं, अर्धलोहितम् ।

तदुक्तं भाष्यकारैः -

'प्रवालप्रवाहप्रभाशोणमर्धं
मरुत्वन्मणिश्रीमहःश्याममर्धमि'ति

'दरिद्रन्नीललोहित'इति श्रुतिः ॥

१६४. अन्धकासुरहन्त्रे -

अन्धकासुरस्य हन्ता - अन्धकासुरहन्ता ।

तदुक्तं 'पाद्मे' त्रयोविंशाध्याये शिवं प्रस्तुत्य-

'अन्धकं स त्रिशूलाग्रे प्रोतं वर्षायुतं दधत् ।
त्रैलोक्यैश्वर्यसम्मूढं शोषयामास भानुने'ति

आदित्यपुराणे त्रिंशत्तमाऽध्याये

'हते हिरण्यकशिपावि'त्यादिना हिरण्यकशिपुवधानन्तरं तत्पुत्रेण प्रह्लादेन पितृव्ये हिरण्याक्षे राज्यं निक्षिप्तम् । हिरण्याक्षस्तु शिव-प्रसादाद्देवान् जित्वाऽन्धकासुरं त्रैलोक्यजयिनं पुत्रं लब्धवान् ।

तदनु वराहरूपिणा विष्णुना हतः । तदनु प्रह्लादो राज्यमकरोत् । तत्समये मोहाद्विष्णुना युद्धम्, तदनु सद्वासनावशात्पितृव्यस्य पुत्रे अन्धकासुरे राज्यं न्यस्य विष्णुं शरणं गतवान् । तदनु शिवः विष्ण्वादिदेवैर्देवरक्षणं कारयित्वा लीलया ब्राह्मणैःसह भिक्षामटितवान् । तस्मिन्समये अन्धकासुरस्य शर्वाण्या आहरणार्थमागमनम्, तदनन्तरं विष्णुना पराजयः । तदनु देवादिभिर्युद्धम् । तदनु तद्वधार्थं विष्णुना शिवप्रार्थनम् । तदनु शिवेन भैरवप्रेरणम् ।

'ततः स भैरवः शम्भोः शिरस्याज्ञां निधाय च ।
आदाय सहसा शूलं ययौ दैत्यस्य सङ्गरम् ॥
शूलाग्रेण विनिर्भिद्य ननन्द स्वात्मलीलया ॥' इति ॥

१६५. पावनाय –

पावयतीति पावनः ।

'भीषास्माद्वातः पवते' इति श्रुतिः ।

१६६. बलाय –

बलमस्यास्तीति बलः । सर्वशत्रुनिबर्हणसमर्थत्वान्महावाक्यजन्यवृत्त्यारूढः सन् सर्वद्वैतनाशनसमर्थत्वाद्वा

'आत्मचैतन्यरूपं बलमवष्टभ्ये'ति श्रुतिः ।

१६७. चैतन्याय –

अवस्थात्रयसाक्षी तत्वंपदलक्ष्यः प्रत्यगभिन्नः परशिव इत्यर्थः ।

'यच्चैतन्यमनुस्यूतं जाग्रत्स्वप्नसुषुप्तिषु ।

तदेव त्वमिदं तत्त्वमितो नास्त्यधिकं पर'मित्यभियुक्तोक्तेः ।

आचार्यैरपि

'चैतन्यं सर्वगं सर्वं सर्वभूतगुहाशयम् ।

यः सर्वविषयातीतस्तस्मै सर्वविदे नम' इति हृदि चैतन्ये तिष्ठतीति श्रुतिः ॥

१६८. त्रिणेत्राय –

त्रीणि सोमसूर्याग्निरूपाणि नेत्राणि यस्य सः त्रिणेत्रः ।

'ऐश्वर्यधर्मासनसंस्थिताय
नमः शिवायात्मभवोद्भवाय ।
सहस्रचन्द्रार्कहुताशमूर्तये
नमोऽग्निचन्द्रार्कविलोचनायेति' ॥

'त्रिणेत्रं त्रिगुणाधार'मिति श्रुतिः ।

१६९. दक्षनाशकराय –

दक्षस्य नाशं करोति इति दक्षनाशकरः ।

'वायव्य संहितायाम्' वीरभद्रं प्रस्तुत्य

'ततश्चन्द्रमसं देवः पादाङ्गुष्ठेन लीलया ।
क्षणात्कृमिवदाक्रम्य घर्षयामास भूतले ॥
शिरश्चिच्छेद दक्षस्य रुद्रः परमशोभन'मिति ॥

'नमः सहमानाय निव्याधिन' इति श्रुतिः ।

१७०. सहस्रशिरसे -

सहस्राण्यनन्तानि शिरांसि अस्यास्तीति (यस्य सः) सहस्रशिराः

'सहस्रशीर्षा पुरुष' इति श्रुतिः ।

१७१. जयरूपाय -

जयः रूपं स्वरूपं यस्य सः जयरूपः ।

सर्वत्र विजयीत्यर्थः ।

'ब्रह्म ह देवेभ्यो विजिग्य' इति श्रुतिः ।

१७२. सहस्रचरणाय –

सहस्राणि चरणानि सर्वप्राणिसम्बन्धीन्यस्य (यस्य सः) इति सहस्रचरणः ।

'सहस्राक्षः सहस्रपादिति' श्रुतिः ।

१७३. योगिहृत्पद्मवासिने -

योगिहृत्कमलवासशीलाय । यद्यपि सर्वप्राणिहृदयपुण्डरीके बाह्यान्तरविषयप्रकाशत्वेन सर्वदा सर्वैरनुभूयत एव परशिवः ।

तदुक्तं भाष्यकारेण

या तिर्यङ्नरदेवताभिरहमित्यन्तःस्फुटा गृह्यते
यद्भासा हृदयाक्षिदेहविषया भान्तिस्वतोऽचेतनाः' इति,

तथापि परशिवः सर्वैः कर्तृत्वादिविशिष्टत्वेनैवानुभूयते, न तु परशिवत्वेन । तदुक्तं 'सूतसंहितायाम्'

'तमहंप्रत्ययव्याजात्सर्वे जानन्ति जन्तवः ।
तथापि शिवरूपेण न विजानन्ति मोहिताः' इति ।

योगिनस्तु अनेकजन्मकृतसुकृतपुञ्जपरिपाकवशादात्मव्यतिरिक्तं सर्वं ब्रह्मलोकादिकमनित्यं सातिशयनश्वरमतएवदुःखात्मकमिति निश्चित्य ऐहिकामुष्मिकभोगविरक्ताः सन्तः शान्तिदान्त्यादिसम्पन्ना जाग्रत्स्वप्न-सुषुप्तिकालेष्वनुस्यूतं स्थूलवासनामयसौषुप्तिविषयसाक्षिभूतं देहेन्द्रिय-प्राणापानादिसर्वान्तरं अशनायादिषड्ूर्मिरहितं अत एव पञ्चकोश-विलक्षणं सच्चिदानन्दरूपं परशिवं बहुजन्माराधितपरमशिव-प्रसादादेव तत्वमस्यादि वाक्यजन्यप्रत्यभिव्यक्तमात्मत्वेन हृदये सन्दधते । तदप्युक्तं 'सूतसंहितायाम्' –

'प्रसादादेव रुद्रस्य प्रत्युत्पन्नात्मविद्यया ।
बहूनां जन्मनामन्ते जानन्त्येव शिवं बुधा' इति ।
'योगिध्येयं परं पदमिति' श्रुतिः ॥

१७४. सद्योजाताय -

यस्मात्परमेश्वराद्देवतिर्यङ्मनुष्याद्याःसद्य एव जाताः सद्योनाममूर्तयः सम्भवन्ति यस्येच्छातस्तेन सद्योऽभिधान इत्यागमे (?) * तादृशः ।

'सद्योजाताय वै नमो नम' इति श्रुतिः ।

१७५. वन्द्याय -

वन्दनयोग्यो वन्द्यः । सकलवन्दनानां 'स्तोमं व' इति मन्त्ररूपया श्रुत्या परमेश्वर अर्पितत्वात् ।

१७६ सर्वदेवमयाय -

सर्वे च ते देवाश्च सर्वदेवाः । मयते प्राप्नोतीति मयः । सर्वदेवानां मयः सर्वदेवमयः । सर्वात्मक इत्यर्थः ।

'उमासहायमिति प्रस्तुत्य स ब्रह्मेत्यादि' श्रुतिः ॥

१७७. आमोदाय -

आसमन्तान्मोदयतीत्यामोदः ।

'एष ह्येवानन्दयातीति' श्रुतिः ॥

---

* दुःसङ्ग दुश्चिन्तनदुर्वचनदुराचारदूषितस्यापि पुरुषस्य केनापि पुण्यविशेषेण सद्योविकसितहृदयकमले यःसच्चिदानन्दमयः अतर्कितं जायत आविर्भवति तादृशो वा । वल्मीकजन्माद्योऽत्र प्रमाणम् ॥

१७८. प्रगल्भाय -

प्रकर्षेण धृष्टः प्रगल्भः परानभिभवनीयः । सर्वजगद्रक्षण-समर्थो वा ।

'नमोऽधृष्णवे च प्रमृशायचे'ति श्रुतिः ॥

१७९. गायत्रीवल्लभाय -

गायत्र्या वल्लभो गायत्रीवल्लभः । गायत्रीप्रतिपाद्य इत्यर्थः ।
तदुक्तं सूतसंहितायाम् यज्ञवैभवखण्डे षष्ठाध्याये –

योनोऽस्माकं धियश्चित्तमन्तर्यामिस्वरूपतः ।
प्रचोदयात्प्रेरयेच्च तस्य देवस्य सुव्रताः ॥
दीप्तस्य सर्वजन्तूनां प्रत्यक्षस्य स्वभावतः ।
सवितुः स्वात्मभूतं तु वरेण्यं सर्वजन्तुभिः ॥
भजनीयं द्विजैर्भर्गस्तेजश्चैतस्य लक्षणम् ।
तच्छब्दवाच्यं सर्वज्ञं जगत्सर्गादिकारणम् ॥
स्वमायाशक्तिसम्पन्नं शिवरुद्रादिसंज्ञितम् ।
नीलग्रीवं विरूपाक्षं मन्त्रमूर्त्युपलक्षितम् ॥
आदित्यदेवतायास्तु प्रेरकं परमेश्वरम् ।
आदित्येनाऽपरिज्ञातं वयं धीमह्युपास्महे ' ॥ इति ।

१८०. व्योमाकाराय -

व्योम्नः आकारः रूपं इव आकारो यस्य सः तथा ।

'आकाशवत्सर्वगतश्च नित्य' इति श्रुतिः ॥

१८१. विप्राय -

विशेषेण व्याप्तो विप्रः ।

'विप्रा विप्रस्य बृहतो विपश्चित' इति श्रुतिः ॥

१८२. विप्रप्रियाय -

विप्राणां ब्राह्मणानां प्रियः ।

'घ्नन्तं शपन्तं परुषं वदन्तं
यो ब्राह्मणं न प्रणमेद्यथार्हम् ।
स पापकृद्ब्रह्मभवाग्निदग्धो
वध्यश्च दण्ड्यश्च न चास्मदीय' इति भगवद्वचनात् ।

'त्वं देवेषु ब्राह्मण' इति श्रुतिः'

१८३. अघोराय -

अघोरः क्रौर्यादिरहितः शशिबिम्बमिवाह्लादकरः परमानन्द-रूपत्वात् ।

'या ते रुद्र शिवा तनूरघोरापापकाशिनी'ति श्रुतिः ॥

१८४. सुवेषाय -

शोभनवेषधरः सुवेषः

मूले कल्पद्रुमस्य द्रुतकनकनिभं चारु सिह्मासनस्थं
वामाङ्कारूढगौरीनिबिडकुचतटाभोगगाढोपगूढम् ।
सर्वालङ्कारदीप्तं परशुमृगवराभीतिहस्तं प्रसन्नं
वन्दे बालेन्दुमौलिं गजवदनगुहाश्लिष्टपार्श्वं महेशम् ।

'नमो हिरण्यबाहवे हिरण्यवर्णाय हिरण्यरूपायेत्यादि' श्रुतिः

१८५. श्वेतरूपाय -

श्वेतं रूपं यस्य सः तथा ।

बिभ्रद्दोर्भिः कुठारं मृगमभयवरौ सुप्रसन्नो महेशः
सर्वालङ्कारदीप्तः सरसिजनिलयो व्याघ्रचर्मात्तवासाः ।
ध्येयो मुक्तापरागामृतरसकलिताद्रिप्रभः पञ्चवक्त्रः
त्र्यक्षः कोटीरकोटीघटिततुहिनरोचिष्कलोत्तुङ्गमौलिः ॥

'शितिकण्ठाय चे'ति श्रुतिः ॥

१८६. विद्वत्तमाय -

निरस्तातिशयज्ञानं सर्वदा सर्वगोचरमस्यातीति (स्ति) नेतरेषामिति विद्वत्तमः ।

'ब्रह्मणा विपश्चितेति' इति श्रुतिः ।

१८७. चित्राय -

अनेकैरनेकधा विभाव्यमानश्चित्रः ।

तदुक्तं ज्ञान(योग)वासिष्ठे –

'यच्छून्यवादिनां शून्यं ब्रह्म ब्रह्मविदां च यत् ।
शिवः शैवागमस्थानां कालः कालैकवादिनाम् ॥
पुरुषः साङ्ख्यदृष्टीनामीश्वरो योगवादिनाम्' ॥ इत्यादि
'एष सुविज्ञेयो बहुधा चिन्त्यमान' इति श्रुतिः ॥

१८८. विश्वग्रासाय -

विश्वं ग्रसतीति विश्वग्रासः ।

'महाग्रासाय वै नमो नमः' इति श्रुतिः ।

१८९. नन्दिने -

परमानन्दविग्रहो नन्दी ।

'विज्ञानमानन्दं ब्रह्मेति' श्रुतिः

नन्दः आनन्दः । भावे घञ् । सोऽस्यास्तीति नन्दी । निरन्तरं परमानन्दरूपशिवध्यानरूढत्वान्नन्दी तण्डुः । 'तण्डुनन्दिनौ नन्दिकेश्वरे' इति नैघण्टुकाः । तद्रूपो वा नन्दी ॥

'बालेन्दुमकुटं देवं तरुणादित्यविग्रहम् ।
ध्यायेन्नन्दीश्वराकारं गणेश्वरसमावृतमि'ति ।
'नमो गणेभ्यो गणपतिभ्यश्च वो नम' इति श्रुतिः ।

१९० अधर्मशत्रुरूपाय -

धर्मो विहितानुष्ठानजन्यमपूर्वं, तद्विरुद्धस्त्वधर्मः निषिद्धाचरण-जन्यं अपूर्वम् ।

तथाचोक्तम् –

'विहितक्रियया साध्यो धर्मः पुंसो गुणो मतः ।
प्रतिषिद्धक्रियासाध्यः पुंगुणोऽधर्मः उच्यत ' इति ।

तस्य शत्रुः तद्रूपः । कालत्रयेऽप्यधर्मासंस्पृष्टत्वाद्वा परमेश्वरोऽधर्मासङ्गीति ध्यायिनामधर्मनाशकत्वाद्वा तदिति नाम ।

'स एष सर्वेभ्यः पाप्मभ्य उदित उदेति ह वै स सर्वेभ्यः पाप्मभ्यः य एवं वेदे'ति श्रुतिः ॥

१९१. दुन्दुभेर्मर्दनाय –

दुन्दुभेर्वाद्यविशेषस्य मर्दनो मर्दनस्वरूपः सर्वात्मकत्वात् ॥

'नमो दुन्दुभ्याय चे'ति श्रुतिः ॥

१९२. अजातशत्रवे –

शातयन्तीति शत्रवः । अजाताः अविद्यमानाः शत्रवो बाह्या आभ्यन्तराश्च विद्वेषिणो यस्य स तथा । आप्तकामत्वादान्तर-शत्रुराहित्यं, सर्वभूतान्तरात्मकत्वाद् बाह्यशत्रुराहित्यं च ।

१९३. जगत्प्राणाय –

जगतां प्राण उज्जीवकः जगत्प्राणः ।

'न प्राणेनाप्यपानेन मर्त्यो जीवति कश्चन ।
इतरेण, तु जीवन्ति यस्मिन्नेतावुपाश्रितौ' इति श्रुतिः ॥

१८४. ब्रह्मशिरश्छेत्रे –

ब्रह्मणो हिरण्यगर्भस्य यत्पञ्चमं शिरस्तस्य छेत्ता ॥ 'ब्रह्माण्ड-पुराणे' भिक्षाटने प्रथमाध्याये भृगुः –

'पितामह जगत्सर्गस्थितिसंहारकारक ।
ब्रूहि भिक्षाटनं शम्भुः कृतवान्केन हेतुना' ।

इति प्रस्तुत्य ब्रह्मविष्णू स्वाङ्गात्सृष्ट्वा सृष्टिस्थितिकार्ये तौ नियुज्या-न्तर्हिते परशिवे ब्रह्मणः सृष्टिप्रतिभानार्थं तेन ध्यातःसन् तल्ललाटा-न्नीललोहितरुद्ररूपेणाविर्भूयानन्तरं –

'चतुरशीति लक्षोक्ता योनयः प्रतिभान्तु ते ।
इति मां चोदयित्वा तु प्राहिणोद्भगवान्हरः ।
अहं भृत्यो महेशस्य त्वं ललाटसमुद्भवः ।
त्वदुक्तं कर्तुमीशेन नियुक्तोऽसि नियुङ्क्ष्व माम्

इत्युक्त्वा स्थितवति नीललोहिते रुद्रे उभावहं च विष्णुश्च 'अह-मेवेश्वरो नान्य' इत्यन्योन्यं ब्रुवाणयोः [विवदमानौ स्थितौ] इत्यनन्तरं [अनन्तरं]

कुपितो नीललोहितो 'युवां दण्ड्यावित्युक्तवान् । तत्र विष्णुरन्तर्हितः । तदनु तं प्रती (प्रति) को त [म] दन्य ईश्वर इति ब्रह्मणे [मयो]क्तम् ।

'मम पुत्रो मया शास्यो विस्मृतो मां भवानि'ति ।

'उत्पथं प्रतिपन्नस्य कार्यं भवति शासन'मिति

न्यायोक्तिपुरःसरं रुद्रेण भैरवे प्रेषिते

'शिवद्रोहस्य वक्तासौ हन्तव्यो यद्यपि क्षणात्
तथापि वक्तृवदनमेकं छिन्धि स्वपञ्चमम् ।
मुञ्च हरहरेत्युच्चैर्वचनं कालभैरवः ।
क्रोशतो मम मामेति शिवः पञ्चममच्छिनत् ।
छिन्ने शिरसि मे ज्ञानमुत्पन्नं दृढमीश्वरे ।
मुखैश्चतुर्भिरस्तौषमीश्वरं वैदिकैः स्तवैः' इति ।

'निधाधिन' इति श्रुतिः ।

१९५. पञ्चवक्त्राय –

पञ्चसङ्ख्याकानि वक्त्राणि मुखानि नानारूपाणि यस्य स तथा । तदुक्तमभियुक्तैः -

'शिवरहस्ये' प्रथमांशे त्रिंशेऽध्याये

प्रालेयामलमिन्दुकुन्दधवलं गोक्षीरफेनप्रभं
भस्माभ्यङ्ग[क्त]मनङ्गदेहदहनज्वालावलीलोचनम् ।

विष्णुब्रह्ममरुद्गणार्चितपदं ऋग्वेदनादोदयं
वन्देऽहं सकलं कलङ्करहितं स्थाणोर्मुखं पश्चिमम् ॥
गौरं कुङ्कुमपङ्किलं सुतिलकं व्यापाण्डुगण्डस्थलं
भ्रूविक्षेपकटाक्षवीक्षणलसत्संसक्तकर्णोत्पलम् ।
स्निग्धं बिम्बफलाधरं प्रहसितं नीलालकालङ्कृतम्
वन्दे याजुषवेदघोषजनकं वक्त्रं हरस्योत्तरम् ॥
बालार्काम्बितटित्प्रतप्तकनकप्रस्पर्धितेजोऽरुणं
गम्भीरध्वनिसामवेदजनकं ताम्राधरं सुन्दरम् ।
अर्धेन्दुद्युतिलोलपिङ्गलजटाभारप्रबद्धोदकं
वन्दे सिद्धसुरासुरेन्द्रनमितं पूर्वं मुखं शूलिनः ।
कालाभ्रभ्रमराञ्जनद्युतिनिभं व्यावृत्तपिङ्गेक्षणं
कर्णोद्भासितभोगिमस्तकमणिप्रोद्भिन्नदंष्ट्राङ्कुरम् ।
सर्पप्रोतकपालशुक्तिशकलव्याकीर्णमाशेखरं
वन्दे दक्षिणमीश्वरस्य वदनं चाथर्वनादोदयम् ।

व्यक्ताव्यक्तनिरूपितं च परमं षट्त्रिंशतत्त्वाधिकं
तस्मादुत्तरतत्त्वमक्षरमिति ध्येयं सदा योगिभिः ।
ओङ्कारादिसमस्तमन्त्रजनकं सूक्ष्मातिसूक्ष्मं परं
वन्दे पञ्चममीश्वरस्य वदनं खव्यापितेजोमयम् ॥' इति ।

'शिवो मे अस्तु सदा शिवोमि'ति श्रुतिः ॥

१९६. खड्गिने –

खण्डति भिनत्तीति खड्ग: निस्त्रिंश: । सोऽस्यास्तीति खड्गी ।

'नम: स्वायुधाये'ति श्रुतिः ।

१९७. हरिकेशाय –

हरिकेशः नीलालकमूर्धजः पलितरहितः, नित्ययुवेति यावत् ॥

'हरिकेशायोपवीतिन' इति श्रुतिः ।

१९८. पञ्चवर्णाय –

पञ्चसङ्ख्याका वर्णाः रूपाणि यस्य सः तथा ।

श्रुतिरुक्ता ॥

१९९. वज्रिणे –

वज्रोऽस्यास्तीति वज्री ।

'नमस्ते वज्रहस्ताय दिग्वस्त्राय नमो नमः' इति कौर्मे ॥

'उग्राय वज्रिण' इति श्रुतिः ॥

२००. पञ्चाक्षराय –

पञ्चसङ्ख्याकान्यक्षराणि स्वसम्बन्धित्वेन प्रसिद्धानि यस्य सः तथा ॥

'अगस्त्यरामादिभिराहृतत्वा-
दमुष्य मन्त्रस्य च वैदिकत्वात् ।
परस्य तत्वस्य च वाचकत्वा-
न्नमः शिवायेति सदा जपध्वम्' इति पुराणे ॥

इति द्वितीयशतकस्य विवरणम् ॥

---

२०१. गोवर्धनधराय –

गोवर्धन इति पर्वतविशेषः । तं धरतीति गोवर्धनधरः । कृष्णरूपत्वात् ।

'नमः कृष्णाय पिङ्गलाये'ति श्रुतिः ॥

२०२. सर्वलोकानां प्रभवे –

भूरादिचतुर्दशभुवनानां पतिः ।

'एष लोकाधिपतिरि'ति श्रुतिः ॥

२०३. कालकूटविषादिने –

हालाहलविषपानकर्ता कालकूटविषादी । '**स्कान्दे**' '**सनत्कुमारसंहितायां**' काशिकावनमाहात्म्ये विष्ण्वादिना समुद्र-मथनं, तदानीं वासुकिमुखात्कालविषोत्पादनं तेन ग्लानिः तदनु तैर्विषनिग्रहार्थं शिवं प्रति प्रार्थना, तदनु शिवप्रेरितेन ....

नाम्ना हस्तेन विषमाहृत्य च शिवहस्ते जम्बूफलवत्समर्पणं, तदनु–

'गृहीत्वा भुक्तवाञ्छम्भुः कण्ठे नीलोऽभवत्तदा ।
तदाप्रभृति तत्स्थानं हालाशनमिति स्मृतम् ।
शिवोऽभूत्कालभुङ्नाम्ना कालकण्ठा (कर्णा)ख्यकोऽभवदि'ति

२०४. सिद्धेश्वराय –

सिद्धैर्लिङ्गरूपेण प्रतिष्ठितः ईश्वरः सिद्धेश्वरः ।

२०५. सिद्धाय –

स्वप्रकाशत्वात्सिद्धः

२०६. सहस्रवदनाय –

सहस्रमुखः सहस्रवदनः

२०७. सहस्रहस्ताय –

स्पष्टम्

२०८. सहस्रनयनाय –

व्याख्यातम्

२०९. सहस्रमूर्तये –

सहस्रसङ्ख्याता अनेकमूर्तयः, सर्वात्मकत्वात्,

अस्य सन्तीति सहस्रमूर्तिः 'महाभारते'

'यस्मिन्सर्वं यतः सर्वं यः सर्वं सर्वतश्च यः ।
यश्च सर्वमयो देवस्तस्मै सर्वात्मने नमः' इति ॥

'यत्परं ब्रह्म सर्वात्मे'ति श्रुतिः ।

२१०. जिष्णवे –

जयतीति जिष्णुः ।

२११. जितशत्रवे -

जिताः शत्रवो येन स जितशत्रुः ॥

'जेतारमपराजितमिति' श्रुतिः ॥

२१२. काशीनाथाय -

काश्या अविमुक्तक्षेत्रस्य नाथः ।

'क्षेत्राणां पतये नमः' इति श्रुतिः ।

२१३. गेह्याय -

गेहे प्रासादे भवो गेह्यः ।

'तल्प्याय च गेह्याय चेति' श्रुतिः ।

२१४. विश्वसाक्षिणे -

विश्वस्य सर्वस्य साक्षी प्रकाशकः

'सर्वस्य साक्षीति' श्रुतिः ॥

२१५. [हितवे सर्वभूतानाम्] (सर्वभूतानां) हेतवे -

सर्वभूतानां निमित्तभूतो हेतुः ।

२१६. [सर्वजीवानां] पालकाय -

सर्वजीवानां स्थितिहेतुः पालकः ।

२१७. जगत्संहारकाय –

जगतां संहारहेतुः जगत्संहारकः

'यतो वा इमानि भूतानि जायन्त इत्यादिश्रुतिः ॥

२१८. त्रिधावस्थाय -

सृष्टिस्थितिसंहारकालेषु जाग्रत्स्वप्नसुषुप्तिकालेषु च ब्रह्मविष्णुरुद्ररूपेण, विश्वतैजसप्राज्ञरूपेण च त्रिधाऽवस्थाः यस्य सः त्रिधावस्थः

२१९. एकादशस्वरूपाय -

एकादशसङ्ख्याका रुद्राः स्वरूपं यस्य सः तथा ।

'दधानमेकादशधा विभक्तं
देहं विशुद्धस्फटिकप्रकाशम् ।
तेजोमयं शूलिनमिन्दुमौलिं
विचिन्तयेत्तत्र सदैव रुद्र'मिति ॥

'अहं रुद्रैर्वसुभिश्चरा'मीति श्रुतिः ।

२२०. वह्निमूर्तये -

वह्निर्धनञ्जयो मूर्तिर्यस्य सः, तथा ।

आदित्यपुराणे वह्निं प्रति देवाः

कृष्णहेता कृष्णवर्त्मन् स्वर्गमार्गप्रदर्शक ।

यज्ञाहुतिहुताधार यज्ञाधार हराकृते' इति

आवो राजानमध्वरस्य रुद्रं होतारं सत्ययजं रोदस्योः ।

अग्नि पुरातनयित्नो रचिताद्धिरण्य रूपमवसे कृणुध्वमिति श्रुतिः ।

२२१. नरसिंहमहादर्पघातिने -

नरसिंहस्य यो महादर्पः अतिगर्वः तं हन्तीति (तस्मै) नरसिंह-महादर्पघातिने । लिङ्गपुराणे श्रीहरिणा नृसिंहरूपेण हिरण्यकशिपु-निग्रहः, अनन्तरं तेनैव लोकानां भयोत्पत्तिः । तदनु तन्निवारणार्थं देवानां शिवंप्रतिप्रार्थनम् । तदनु शिवस्मारितेन वीरभद्रेण नृसिंहं प्रति सान्त्ववादनम् । पुनश्च तस्य कोपाधिक्यं, तदनु वीरभद्रेण नृसिंहभर्त्सनम् (स्तम्भनम्)

इत्युक्तो वीरभद्रेण नृसिंहः क्रोधमूर्च्छितः ।

निनद्योत्प्लुत्य वेगेन तं गृहीतुं प्रचक्रमे ।

अत्रान्तरे महाघोरं विपक्षक्षयकारणम्

गगनव्यापि दुर्दर्शं शार्वं तेजः समुद्बभौ ।

वीरभद्रस्य तद्रूपं क्षणादेव न दृश्यते ।
न तद्धिरण्मयं रूपं न सौरं नाग्निसन्निभम् ।
न तटिच्चन्द्रसङ्काशमभूतोपममैश्वरम् ।
अधश्चतुष्पादुपरि चतुष्पाच्चक्रवद्भृशम् ।
तदा तेजांसि सर्वाणि तस्मिन् लीनानि शङ्करे ।
नृसिंहवक्त्रनेत्रेभ्यः सूक्ष्मं तेजो विजृम्भितम् ।
रवौ हुतवहस्येव क्षणाल्लीनं शिवात्मके ।
तदव्यक्तं महातेजो व्यक्तं समभवत्तदा ।
रुद्रासाधारणैश्चिह्नैश्चिह्नितं विकृताकृति ।
ततः शरभरूपेण सुव्यक्तः परमेश्वरः ।
पश्यतां सर्वदेवानां जयशब्दादिमङ्गलैः ।
सहस्रबाहुर्जटिलश्चन्द्रार्धकृतशेखरः ।
मृगस्त्वर्धशरीरेण पक्षाभ्यां चञ्चुना द्विजः ।
अतितीक्ष्णमहादंष्ट्रो वज्रतुल्यनखायुधः ।
कण्ठेकालो महापुच्छश्चतुष्पाद्वह्निसन्निभः ।
युगान्तोद्यतजीमूतभीमगम्भीरनिःस्वनः ।
समसुप्तप्रसुप्तातिनिवृत्तनयनत्रयः ।
स्पष्टदंष्ट्राधरोष्ठश्च हुङ्कारमुखरो हरः ।
हरिस्तद्दर्शनादेव विनष्टबलविक्रमः ।
बभूवोद्यत्सहस्रांशोरधः खद्योतवद्भृशम् ।
अथ प्रहृत्य पक्षाभ्यां नाभौ पद्भ्यां व्यदारयत् ।

पादावाबध्य पुच्छेन बाहुभिर्बाहुमण्डलम् ।
भिन्दन्नुरसि बाहुभ्यां तं जग्राह हरो हरिम् ।
ततो जगाम गगनं देवैः सह महर्षिभिः ।
सहसैव हरो विष्णुं हरिं श्येन इवोरगम् ।
उत्क्षिप्योत्क्षिप्य गृह्णाति निपत्य च निपत्य च ।
उड्डीयोड्डीय भगवान् पक्षाभ्यां तैर्विमोहितम् ।
हरिं हरन्तं वृषभं विश्वस्येशानमीश्वरम् ।
अनुयान्ति सुराः सर्वे नमोवाकैरभिष्टुतम् इति ।
वृषभं मतीनामिति श्रुतिः ॥

२२२. शरभाय -

अष्टपादयुक्तः शरभः। स एव 'साळुवनामक मृगलक्षणेन पक्षिराजलक्षणेन च मिश्रितः। तदुक्तं मन्त्रशास्त्रे'

चन्द्रार्काग्नित्रिदृष्टिः कुलिशवरनखश्चञ्चलात्युग्रजिह्वः
काली दुर्गा च पक्षौ हृदयजठरगो भैरवो बाडवाग्निः ।
ऊरुस्थौ व्याधिमृत्यू शरभवरखगश्चण्डवातातिवेगः
संहर्ता सर्वशत्रून् (त्रोः) स जयति शरभः साळुवः
पक्षिराजः ॥

२२३. भस्माभ्यक्ताय -

भस्मना अभ्यक्तो लेपितः भस्माभ्यक्तः ।

" बृहज्जाबालोपनिषदि "

> विभूतिर्भसितं भस्म क्षारं रक्षेति भस्मनः ।
> भवन्ति पञ्चनामानि पञ्चभिर्नामभि (हेतुभि) र्भृशम् ॥
> ऐश्वर्यकारणाद्भूतिर्भस्म सर्वाघभक्षणात् ।
> भासनाद्भसितं प्रोक्तं रक्षणात्क्षारमापदाम् ॥
> भूतप्रेतपिशाचब्रह्मराक्षसापस्मारसंसारभयभीतिभ्यो-
> रक्षणाद्रक्षेति

ननु इमानि पञ्चप्रयोजनानि परमेश्वरे न सम्भवन्ति, निरतिशय-ऐश्वर्यशालित्वात्, सर्वपापोद्गतत्वात्, नित्यापरोक्षज्ञानत्वात्, सर्वापदुद्धारकत्वात् भूतप्रेतादिसेवितत्वाच्च किमर्थं भस्मधारणम्? (इति चेत्) लोकानुग्रहार्थमिति ब्रूमः । तथाहि –

कालग्निरुद्राथर्वशिरश्वेतरकैवल्यबृहज्जाबालादिषु श्रुतिषु बोधायनादिषु स्मृतिषु, स्कान्दकौर्मवासिष्ठलैङ्गादिपुराणेषु (च) भस्मधारणस्य नित्यत्वेन चात एव भोगमोक्षसाधनत्वेन प्रपञ्चितमिति अस्मत्कृतशिवगीतातात्पर्यप्रकाशिकायां बहु प्रतिपादितम् । '**अथर्वशिरसि**' अग्निरित्यादिना भस्म गृहीत्वा विमृज्याङ्गानि संस्पृशेत्, 'व्रतमेतत्पाशुपतं पशुपाशविमोक्षाये'ति ॥ इदमेव व्रतं श्रुत्यन्तरे शिरोव्रतादिशब्दैः प्रसिद्धम् । तदुक्तं **सूतसंहितायाम्** –

> 'उद्धूलनं त्रिपुण्ड्रं च ज्ञानाङ्गत्वेन सादरम् ।
> आमनन्ति मुनिश्रेष्ठाः श्वेताश्वतरशाखिनः ॥

अयमत्याश्रमो धर्मो यैः समाचरितं मुदा ।

तेषामेव शिवज्ञानं संसारच्छेदकारणमि'ति

तथा चेदं व्रतं सर्वैरनुष्ठेयमिति शिवेनानुष्ठितम् ।

कुबेरं प्रत्युपदिष्टं यथोक्त'मुत्तररामायणे'

मया चैतद्व्रतं चीर्णं त्वयाचेदं(चैतत्) नरा इव (धनाधिप) ।

तृतीयः पुरुषो नास्ति यश्चरेद्व्रतमीदृशम् ।

व्रतं सुदुश्चरं चैतन्मयैवोत्पादितं पुरा ।

तत्सखित्वं मया सौम्य रोचय त्वं धनेश्वरेति ।

'एष ह्येव साधुकर्म कारयतीति' श्रुतिः ।

२२४. तीर्थाय -

यथा प्रयागादि स्नानपानादिना पावयति एवं स्मृति (त) मात्रेण सर्वान्पावयतीत्यर्थः ।

'पुण्या भागीरथी लोके पुण्या वाराणसी पुरी ।

पुण्या वेदाः शिवः पुण्य' इति पुराणे ॥

२२५. जाह्नवीजनकाय -

जह्नुतनयात्वेन प्रसिद्धा जाह्नवी गङ्गा, तस्या जनकः । जटावलये बिन्दुरूपेण लीनाया पुनरविच्छिन्नप्रवाहरूपेणभिव्यक्तिकरत्वात् ।

'वनानां पतय इति' श्रुतिः ॥

२२६. देवदानवदैत्यानां गुरवे-

सुरासुरराक्षसानां गुरुः । उपदेष्टुरुपलक्षणमेतत् - सर्वगुरुत्वात् । उक्तं च पतञ्जलिना ('योगसूत्रे) 'स पूर्वेषामपि गुरुः कालेनानवच्छेदात्' इति ॥

२२७. दलिताञ्जनभासाय -

दलितस्य भिन्नस्याञ्जनस्याञ्जनाद्रेर्भास इव भासो यस्य सः तथा । मरुत्वन्नामासुरनिग्रहार्थं प्रवृत्तमघोरं प्रस्तुत्य

'रक्ताम्बरधरः श्रीमान्भिन्नाञ्जनचयोपमः ।
स्पष्टदष्टाधरोष्ठश्च तीक्ष्णदंष्ट्राद्वयान्वितः ॥' इति पुराणे ॥
'नमः कृष्णाय पिङ्गलाये'ति श्रुतिः ॥

२२८. वायुस्वरूपिणे -

वायूत्पत्त्यनन्तरं वायुभावापन्नत्वादम्न्यादिसर्वकार्याणां च वायुभावापन्नस्यैव हेतुत्वात् वायुरूपी ॥

अथवा, परशम्भुरेव वायुरूपी सन् समस्तं समुद्रादिकं जगच्छोषयामासेति प्रसिद्धम् ॥

ब्रह्माण्डपुराणे '

'सप्तस्कन्दमहावायुमयमात्मानमातनोत्
पराशक्त्यम्बिका चास्य क्रियाशक्तिः किलाभवत् ।

यतथा प्रबला युक्तः श्रीमहाशम्भुनायकः ।
वायुरूपं समास्थाय दुनोति स्म जगत्त्रयमि'ति ॥

'आकाशाद्वायुः । वायोरग्निरि'ति श्रुतिः ॥

२२९. स्वेच्छामन्त्रस्वरूपाय -

मन्त्राः 'सद्योजात'मित्यादि पञ्चब्रह्मरूपाः स्वरूपं यस्य सः मन्त्रस्वरूपः । यथा हरिहरपुत्रादीनां तत्तन्मन्त्रजपादिना परवश्यता, परमेश्वरस्यापि मन्त्रात्मकत्वेन तथा स्यादिति शङ्कानिवृत्त्यर्थं स्वेच्छेति विशेषणम् । तथा च स्वेच्छयैव मन्त्रस्वरूपः स्वेच्छामन्त्रस्वरूपः ॥ तथा च स्वतन्त्र इत्युक्तं भवति ॥ एतच्च दारुकावने भिक्षाटनवेलायां शिवे प्रसिद्धं पञ्चब्रह्मतनुत्वम् ॥

वायवीयसंहितायामुक्तम् -

'ईशानमुकुटं देवं पुरुषास्यं पुरातनम् ।
अघोरहृदयं तद्वत् विद्यागुह्यं महेश्वरः ।
सद्यः पादं च तन्मूर्तिमष्टत्रिंशत्कलामयमि'ति ॥

अथवा यथेन्द्रादीनां ब्रह्मादिना साकं मन्त्रालोचनपुरःसरं कार्यारम्भस्तद्वन्नेति वक्तुमिदं नाम ॥ स्वेच्छामन्त्रस्वरूपं - मन्त्रालोचनं, नत्वितरैः साकं पर्यालोचनं यस्य सः तथा ॥

'मन्त्रिणे वाणिजाये'ति श्रुतिः ॥

२३०. प्रसिद्धाय -

प्रकर्षेण मानं विना, सिद्धः प्रसिद्धः ।

'अत्रायं पुरुषः स्वयं ज्योति'रिति श्रुतेः ।

सर्वदा वा सिद्धः प्रसिद्धः । 'सर्वसाक्षी'ति श्रुतेः ॥

२३१. वृषध्वजाय -

वृषाङ्कचिह्नितध्वजवान् वृषध्वजः ॥

शिवस्य वृषध्वजत्वं वृषवाहनत्वं च महाभारते प्रसिद्धम् ।

शिवः -

'श्वेतोऽयं वृषभो देवि सर्वसंस्कारसंयुतः ।
वाहनत्वे ध्वजत्वे च तदाप्रभृति योजितः ।
तस्मान्मे गोपतित्वं च देवैर्गोभिश्च कल्पितम्' इति ॥

'विद्माहित्वा गोपतिं शूरगोना'मिति श्रुतिः ।

२३२. गोष्ठ्याय -

गवां स्थानं गोष्ठं, तत्र भवो गोष्ठ्यः ।

'नमो गोष्ठ्याय चे'ति श्रुतिः ।

२३३. जगद्यन्त्रप्रवर्तिने -

जगद्रूपस्य यन्त्रस्य प्रवर्तकः जगद्यन्त्रप्रवर्ती । जगतो यन्त्र (यन्तृ) त्वमीश्वरस्य श्रामित्वात् । तदुक्तम् भगवता -

ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति ।
भ्रामयन् सर्वभूतानि यन्त्रारूढानि माययेति ॥
'सूतायाहन्त्यायेति' श्रुतिः ॥

२३४ अनाथाय –

न विद्यते नाथो यस्य सः अनाथः ।

तस्यापि नाथत्वे (नाथान्तरसत्वे) अनवस्था स्यात् । अतः स-एव सर्वेषां नाथः । 'तमीश्वराणां प्रथमं महेश्वर'मिति श्रुतिः ॥

२३५ प्रदेशाय –

प्रकृष्टो देशः कैलासादिः काश्यादिर्वा यस्य सः तथा ॥

२३६ विष्णुगर्वहराय –

विष्णोर्गर्वं हरतीति विष्णुगर्वहरः ।
लैङ्गे शिवं प्रति ब्रह्मा -
प्रबोधकोऽसि मे विष्णोरवलेपहरो हर ।
शुकवत्तव विश्वेश क्रीडार्थं केवलं वयम् ।

२३७. हरेर्विधातुःकलहनाशाय -

हरिविधिकलहनाशकत्वं च शिवस्य स्कान्दे, उपरिभागे, प्रथमाध्याये महालिङ्गप्रादुर्भावे प्रसिद्धम् । तत्र हि सर्वपाप-निवृत्तिपूर्वक—शिवलोकप्रापकोपायः ऋषिभिः सूतं प्रति आदौ पृष्टः शिवरात्रिव्रतमेव उपाय इति सूतेनोक्तम् । पुनः कथमिति तैः पृष्टः सूत आह -

'ब्रह्मणो रजनीशेषे तोयमग्नां महीं हरिः ।
वाराहं रूपमास्थाय सशैलवनकाननाम् ।
उद्धृत्य स्थापयामास यथापूर्वं गदाधर' इति ।

तदनु अहमेव जगत्कर्तेति विस्मयं गतो हरिः । तदनु ब्रह्माऽवान्तरप्रलयावसाने यथापूर्वं जगत् कल्पयित्वा अहमेव जगत्कर्तेति विस्मयं गतः ।

सुषुप्तं (?) सुप्तं हरिमुत्थाप्य त्वं क इति पृष्टवान् । तेन 'अहं जगन्नाथ इत्युक्तः 'जगत्स्रष्टरि मयि स्थिते त्वं कथमेवंभूत' इत्यन्योन्यं बाणखड्गमुसलास्त्रप्रयोगपर्यन्तं युद्धमभूत् । तदस्त्रज्वालया त्रैलोक्यं दग्धं, तावपि दीनौ भवतः (स्म) । तदनु

करुणाविष्टः सर्गजनकः परमशिवः
तद्युद्धशमनार्थाय तयोः संरक्षणाय च ।
माघकृष्णचतुर्दश्यां तयोर्मध्ये महानिशि ।
आत्मानं दर्शयामास लिङ्गरूपी सदाशिवः ।
कोटिसूर्यप्रतीकाशो मध्येलिङ्गमुपस्थितः ।
तल्लिङ्गमध्ये संलीनं तयोरस्त्रद्वयं तदा ।

तदनु महालिङ्गावधिज्ञानार्थं उभावपि हंसवराहरूपिणौ, तदूर्ध्वाधः प्रदेशं गतौ, तदवधिमज्ञात्वाऽऽत्मनः कारणं शिवं मत्वा तं स्तोतुं समुद्यतौ, स्तुत्यनन्तरं शिवः प्रादुर्भूतः सन्नुवाच

'शृणु पद्मज मद्वाक्यं त्वं विष्णो गरुडध्वज ।
अहमेव जगत्कर्ता युवयोः कारणं त्वहम् ।

मत्प्रसादात् पदं ब्रह्मन् विष्णोः प्राप्तं त्वयापि च ।

परस्परास्त्रतेजोभिर्दग्धमण्डं तदा दयोः ।

शिवरात्रव्रतं नाम युवाभ्यां सुकृतं त्विदम् ।

तस्मात्प्रीतः पदं दास्ये युवयोर्लोक पूजितम् ।। इति ।

'तया नस्तनुवा शन्तमये'ति श्रुतिः ।।

२३८ दशहस्ताय –

दश हस्ता यस्य सः दशहस्तः ।

शान्तं पद्मासनस्थं शशधरमकुटं पञ्चवक्त्रं त्रिणेत्रं

शूलं वज्रं च खड्गं परशुमभयदं दक्षभागे वहन्तम् ।

नागं पाशं च घण्टां प्रलयहुतवहं सा(चा)ङ्कुशं वामभागे

नानालङ्कारदीप्तस्फटिकमणिनिभं पार्वतीशं नमामि ।।

'सदाशिवोमिति' श्रुतिः

२३९ गगनाय –

गगनवत्सर्वव्यापी गगनः ।

'आकाशवत्सर्वगतश्च नित्य' इति श्रुतिः ।

२४० कैवल्यफलदात्रे –

कैवल्यफलस्य मोक्षफलस्य दाता कैवल्यफलदाता ।

तत्त्वमस्यादिमहावाक्यजन्यवृत्त्यारूढः सन् ।।

'तस्मादेवं विदित्वैनं कैवल्यं फलमश्नुते' इति श्रुतिः ।।

२४१. परमाय –

निरतिशयज्ञानानन्दस्वरूपः परमः ।

'एषोऽस्य परमानन्द' इति श्रुतिः ॥

२४२. ज्ञानाय –

अनित्यत्वादिदोषरहितः सर्वप्रकाशकः परशिवः ज्ञानशब्देनोच्यते ।

'सत्यं ज्ञानमनन्तं ब्रह्मे' ति श्रुतिः ॥

२४३. ज्ञानगम्याय –

ज्ञानेन महावाक्यजन्यवृत्तिरूपेण गम्यः प्राप्यः ।

'ब्रह्म वेद ब्रह्मैव भवतीति' श्रुतिः ॥

२४४. घण्टारावप्रियाय –

हन्यते ताड्यत इति घण्टा, तस्या आरावः शब्दः, तस्य (सः) (तस्मिन्) प्रियः यस्य सः तथा । अनेन शिवः पूज्य इत्युक्तं भवति । तदुक्तं पुराणे—

'यावन्नायाति मरणं यावन्नाक्रमते जरा ।
यावन्नेन्द्रियवैकल्यं तावत्पूजय शङ्करम्' इति ॥

'आवोराजानमिति' श्रुतिः प्रदर्शिता ।

२४५. पद्मासनाय –

पद्मं आसनं यस्य सः पद्मासनः । अनेन हृदयकमलादौ ध्येयत्वमुक्तम् ॥

तदुक्तं 'कैवल्योपनिषदि'

हृत्पुण्डरीकं विशदं विशुद्धं
विचिन्त्य मध्ये विशदं विशोकम् ।
अचिन्त्यमव्यक्तमनन्तरूपं
शिवं प्रशान्तममृतं ब्रह्मयोनिम् ॥
तथादिमध्यान्तविहीनमेकं
विभुं चिदानन्दमरूपमद्भुतम् ।
उमासहायं परमेश्वरं प्रभुं
त्रिलोचनं नीलकण्ठं प्रशान्तम् ॥
ध्यात्वा मुनिर्गच्छति भूतयोनिं
समस्तसाक्षिं तमसः परस्तादिति ॥

२४६. पुष्टाय -

सर्वज्ञत्वाद्यङ्गैर्ज्ञानवैराग्याद्यैश्वर्यैश्च सम्पूर्णत्वात्पुष्टः ।
'पुष्टानां पतये नम' इति श्रुतिः

२४७. निर्वाणाय -

सर्वदुःखोपशमकरणपरमानन्दलक्षणं निर्वाणम् ।
'परं ब्रह्म विभाति निर्वाणमि'ति श्रुतिः ॥

२४८. अयोनये -

न विद्यते योनिः यस्य सोऽयोनिः ।

'नचास्य कश्चिज्जनिते'ति श्रुतिः ।

यद्वा परमार्थतः सर्वप्रपञ्चकल्पकत्वरहितः ।

'पुरस्तादयोनिस्त्वात्मस्थ'मिति श्रुतिः ।

२४९. सुदेहाय -

शोभनो देहो यस्य स सुदेहः ।

'मङ्गलायतनं देवं युवानमतिसुन्दरम् ।

ध्यायेत्कल्पतरोर्मूले सुखासीनं सहोमया' । इति ॥

'शिवान्ये'ति श्रुतिः ॥

२५०. उत्तमाय -

विष्णुब्रह्माद्यपेक्षया उत्कृष्टः उत्तमः । अक्षिस्वप्नसुषुप्ताद्यपेक्षया स्वेन रूपेणाभिनिष्पद्यते ।

'स उत्तमः पुरुष' इति श्रुतिः ॥

२५१. अन्तकालाधिपतये -

अन्तकालस्य सर्वोपसंहारकालस्याधिपतिर्नियन्ता, उत्पादक इति यावत्, सर्वप्रपञ्चमुपसंहृत्य तस्मिन्काले स्वयमेव स्थितत्वात् ।

'तस्मा उपसंहर्त्रे महाग्रासाय वै नमो नम' इति श्रुतिः ॥

२५२. विशालाक्षाय -

विशालान्यक्षीणि यस्य स विशालाक्षः

२५३. कुबेरबन्धवे -

कुबेरः वैश्रवणः बन्धुः स्वसन्त्यागासहनः सर्वदा स्वसन्निधौ विद्यमानो यस्य सः तथा ।

'सन्त्यागासहनो बन्धुः, सहैकानुमतिः सुहृत् ।

समक्रियं तु तन्मित्रं सप्राणः स (समप्राणः) सखा मतः' इति ॥

अनेन भक्ताह्लादकरत्वमुक्तं, शङ्करत्वात् ।

२५४. सोमाय -

उमया ब्रह्मविद्यास्वरूपिण्या कात्यायन्या सह वर्तमानः सोमः ।

'नमः सोमाय चे'ति श्रुतिः ॥

२५५. सुखदायिने -

सुखं दातुं शीलमस्येति सुखदायी ।

'एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्तीति' श्रुतिः ॥

२५६. अमृतेश्वररूपाय -

अमृतैर्देवैः स्वभुक्तिमुक्त्यर्थतया लिङ्गरूपेण स्थापित ईश्वरः अमृतेश्वरः ।

तद्रूपः अमृतेश्वररूपः ।

२५७ कौबेराय –

कुत्सितं बेरं यस्य स कुबेरः, कुबेरस्य सम्बन्धी, तद्रक्षकत्वात्कौबेरः, परशिवः। कुबेरस्य सम्बन्धी कौबेरः वैश्रवणो वा। तद्रूपः शिवः

'कौबेरायायं बलि'रिति श्रुतिः।

२५८ प्रियंवदसमर्थाय -

प्रियं साधकैरीप्सितं ब्रह्मात्मतत्त्वज्ञानं वदन्त्युपदिशन्ति साधकेभ्य इति प्रियंवदाः ब्रह्मादयः, तेषु समर्थः प्रियंवदसमर्थः। सर्वगुरुरित्यर्थः।

'ईशानः सर्वविद्याना'मिति श्रुतिः॥

२५९ धन्विने -

प्रकृष्टं धनुः पिनाकः रत्नसानुर्वा, ओङ्कारो वा, अस्यास्तीति धन्वी।

'रत्नसानुशरासनं रजताद्रिशृङ्गनिकेतनं
शिञ्जिनीकृतपन्नगेश्वरमच्युतानलसायकम्।'

इति स्तुतः। धनुरोङ्कारः(:)स वासुकिः ज्या इति प्रसिद्धम्।

'नमः स्वायुधाय च सुधन्वने'चेति श्रुतिः।

२६० विभवे -

विभुर्व्यापकः परिपूर्ण इति यावत्॥

'महान्तं विभुमात्मानमिति' श्रुतिः।

२६१ गिरिशाय –

गिरौ कैलासे शेते तिष्ठति इति गिरिशः ।

'गिरिशाच्छावदामसी'ति श्रुतिः ॥

२६२ गिरित्राय –

गिरौ कैलासे मेघे वेदे वा स्थित्वा भक्तांस्त्रायत इति गिरित्रः ।

'शिवाङ्गिरित्रतामि'ति श्रुतिः ।

२६३ गिरिशन्ताय –

गिरौ कैलासे आविर्भूतः प्राणिनां शं तनोतीति गिरिशन्तः । यद्वा गिरिर्मेघः तत्र स्थितः पर्जन्यरूपेण शं तनोतीति, गिरिर्वेदः तत्र स्थित्वा वेदार्थरूपेण शं तनोति इति वा ॥

'गिरिशन्ताभिचाकशीही'ति श्रुतिः

२६४ पारिजाताय –

पारमस्यास्तीति पारि, (री) समुद्रः, तस्माज्जातः पारिजातः देववृक्षः, तद्रूपत्वाद्देवोऽपि पारिजातः, भक्तजनेष्टद इत्यर्थः । अथवा कृष्णेनार्चितो 'बिल्वोदकेश्वर' नामा सन्नमुष्य पारिजात-लाभसाधक इति वा पारिजातः । लाङ्गलंजीवनमितिवदयं प्रयोगः । अयमर्थो 'हरिवंशे' पारिजातहरणे प्रपञ्चितः ।

२६५ पञ्चयज्ञाय –

पञ्चयज्ञा देवपितृमनुष्यब्रह्माणः विशेषेण यस्य आराधनभूताः स पञ्चयज्ञः । 'स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः' इति

भगवत्स्मरणात् । 'तमेतं वेदानुवचनेन ब्रह्मणा विविदिषन्ति । यज्ञेन दानेन तपसाऽनाशकेने'ति श्रुतिः ॥

२६६ तरुणाय –

तरुणः नित्ययुवा

मङ्गलायतनं देवं युवानमतिसुन्दरम् ।

ध्यायेद्वनचराकारमागच्छन्तं पिनाकिनम् । इति रहस्यम् ॥

'श्रुतं गर्त सदं युवान'मिति श्रुतिः ।

२६७ विशिष्टाय –

सर्वमतिशेते यतः अतो विशिष्टः

'विश्वतः परमान्नित्य'मिति श्रुतिः ।

यद्वा विशेषेण शिष्टः (आचारवान्) विशिष्टः, देवब्राह्मणत्वात् ।

'त्वं देवेषु ब्राह्मण' इति श्रुतिः ॥

२६८ बालरूपधराय –

बालस्य रूपमिव रूपं यस्य सः (धरतीति) बालरूपधरः ।

पाद्मे शिवराघवसंवादे द्वितीयाध्याये भस्ममाहात्म्यप्रतिपादके कदाचित्सृष्टिप्रतिभानार्थं भस्मधारणभस्मभक्षणसम्पन्नेन विष्णुना शिवध्याने कृते तस्मिन् काले –

'पुनर्ध्यानपरो भूत्वा दीपमध्ये तु पूरुषम् ।

शुद्धस्फटिकसङ्काशं त्रिणेत्रं द्विभुजं शिवम् ।

वरदं दक्षिणे हस्ते वामे चाभयदं विभुम् ।

पञ्चवर्षीयवयसं शरच्चन्द्रायुतद्युतिम् ।

माणिक्यकुण्डलोपेतं हेमदामविभूषितम् ।
रत्नाङ्गुलीयसुभगं बाहुकोष्ठविभूषणम् ।

तनुरक्तोष्ठमाकर्णदीर्घायतविलोचनम् ।
कन्दर्पं कार्मुकभ्रान्तिजनकभ्रुवमीश्वरम् ।

स्निग्धोन्नतलसन्नासासमस्वच्छकपोलकम् ।
मन्दस्मितप्रसन्नास्यं बालेन्दुदशनद्युतिम् ।

विज्ञानरत्ननयनं वेदकल्पितनूपुरम् ।
वेदाङ्गुलीयमध्यस्थमणिप्रणवमव्ययम् ।
दृष्ट्वा तथाविधं विष्णुः कृतकृत्योऽभवत्तदा इति ॥

उक्तं च सूत्रकारैः अभिव्यक्तेः .... ॥ विवृतं च भाष्यकारैः अतिमात्रस्यापि परमेश्वरस्य प्रादेशमात्रत्वं अभिव्यक्तिनिमित्तं स्याद्, अभिव्यज्यते किल 'प्रादेशपरिमाणः परमेश्वर उपासकानां कृते' इति ॥ 'नमो ह्रस्वाय च वामनाय च' इति श्रुतिः ।

२६९ जीवितेशाय –

जीवितं जीवनं सर्वप्राणिनां प्राणधारणम् । भावे क्तः । तस्य ईश्वरः प्रभुः जीवितेश्वरः ।

'प्राणेश्वरः कृत्तिवासाः पिनाकीति' श्रुतिः ॥

२७० तुष्टाय -

भक्त्या तुष्यतीति तुष्टः परमानन्दरूपत्वेन वा अवाप्तसकल कामत्वाद्वा

'विज्ञानमानन्दं ब्रह्मे'ति श्रुतिः ॥

२७१ पुष्टानां पतये –

पुष्टियुक्ताः पुष्टाः तेषां पतिः प्रभुः

पुष्टानां पतिः। वाक्पुष्टिः, ज्ञानपुष्टिः, शरीरपुष्टिः, इन्द्रियपुष्टिः, ग्रहपुष्टिः, प्रजापुष्टिः, पशुपुष्टिः, ग्रामपुष्टिः, धनपुष्टिः, धर्मपुष्टिरिति दशपुष्टयः।

'पुष्टानां पतये' इति श्रुतिः ॥

२७२ भवहेत्यै –

भवः संसारः, तस्य हेतिरायुधं संसारच्छेत्ता।

'भवस्य हेत्यै जगतां पतय' इति श्रुतिः ॥

२७३ हिरण्याय –

हिरण्यसदृशसर्वाङ्गो हिरण्यः

'आप्रणखात्सर्व एव सुवर्ण' इति श्रुतिः ॥

२७४ कनिष्ठाय –

युवतमाय बालतमाय वा।

'नमो ज्येष्ठाय च कनिष्ठाय चे'ति श्रुतिः ॥

२७५ मध्यमाय –

मध्यकाले देवतिर्यगादिरूपेण उत्पन्नः मध्यमः। मध्यकाले वसन्वा मध्यमः।

'नमो मध्यमायच' इति श्रुतिः।

२७६. विधात्रे –

श्रेयःकर्ता निर्माता वा विधाता

'सूतसंहितायां' शिवं प्रति –

'अनेनेदं जगत्सर्वं विना न भवति क्वचित् ।

एष धाता विधाता च सर्वदा सर्वदेहिनाम् ॥

'स नो बन्धुर्जनिता सविधाते'ति श्रुतिः ।

२७७. शूराय –

युद्धे धैर्यवान् शूरः, प्रळयकाले सर्वसंहारसमर्थो वा ।

'नमः शूराय चे'ति श्रुतिः ।

२७८. सुभगाय –

शोभनो भगः श्रीः देयत्वेन यस्य सः

'सम्पदः परमेश्वरं सम्बन्धित्वे'ति श्रुतिः ॥

'श्रेष्ठो जातस्य रुद्रश्रियासि तवस्तमस्तवसां वज्रबाहो, इति श्रुतिः । एतदर्थस्तु वज्रबाहो वज्रबाहुरूपमास्थाय जातस्य व्यत्ययेन प्रथमार्थे षष्ठी–जातः रुद्रः रुद्ररूपेण प्रादुर्भूतः तप(व)सां तप(व)स्तमः स्तुत्यानां स्तुत्यतमः त्वं श्रिया सम्पदा श्रेष्ठोऽसि इति ।

२७९. आदित्यतापनाय –

आदित्यं तपनसमधर्मं करोतीत्यादित्यतापनः

'येन सूर्यस्तपति तेजसेद्ध' इति श्रुतिः ।

२८०. रुद्रमन्यवे –

रुद्रः सर्वशत्रुरोदनकरः, मन्युः यस्य सः तस्मै रुद्रमन्यवे

'तस्यैते तनुवौ घोरान्ये'ति श्रुतिः ॥

२८१. महाह्रदाय -

सर्वानन्दमहासमुद्ररूपत्वान्महाह्रदः ।

ज्ञानिनस्तदानन्दमवगाह्य विश्रम्य सुखमासत इति वा महाह्रदः ।

'आनन्दं ब्रह्मणो विद्वान्न बिभेति' इतिः श्रुतिः ॥

२८२. ह्रस्वाय –

शरीरे अल्पप्रमाणवान् – ह्रस्वः ।

२८३. वामनाय -

अङ्गुल्याद्यवयवेषु अल्पप्रमाणवान्–वामनः ॥

नमो ह्रस्वाय च वामनाय चेति श्रुतिः ।

अनेन यः कश्चिदपि जनो नोपेक्षणीयः । किन्तु परमेश्वरत्वेनैव विभाव्यः इत्युक्तं भवति ।

२८४. तत्पुरुषाय -

तिरोधानशक्त्युपाधिकं चिन्मात्रमेव तत्पुरुषः । सर्वस्य चेतनस्य वपुःपुर्यामुषति विशति इति वा ॥

'तत्पुरुषाय विद्महे' इति श्रुतिः ।

२८५. चतुर्हस्ताय -

चत्वारो हस्ता यस्य स चतुर्हस्तः ।

'एकवक्त्रं त्रिणयनं शुद्धस्फटिकसन्निभम् ।

अधःकराब्जद्वितये बिभ्राणमभयं वरम् ।

ऊर्ध्वहस्ताब्जयुगले शूलं परशुकं क्रमात्' इति । शिवागमे ॥

२८६. धूर्जटये –

धूः गङ्गा जटासु यस्य सः धूर्जटिः ।

'नमः कपर्दिने च पुलस्तये चे'ति श्रुतिः ॥

२८७. जगदीशाय –

जगतामीशो जगदीशः ॥

'एष लोकेश' इति श्रुतिः ।

२८८. जगन्नाथस्वरूपाय –

जगतां नाथा जगन्नाथा ब्रह्मादयः, तेषां स्वरूपं (यस्य सः) प्रत्यगात्मत्वाद्ब्रह्मणस्तज्जगन्नाथस्वरूपं यस्येति वा जगन्नाथस्वरूपः ।

'यो वै रुद्रः स भगवान्यश्च ब्रह्मे'त्यादि श्रुतिः ।

२८९. लीलाविग्रहरूपिणे –

लीलया स्वीकृतं विग्रहरूपं उमासहायादि मस्यास्तीति लीला-विग्रहरूपी ।

२९०. अनघाय –

दोषरहितोऽनघः ।

'य आत्माऽपहतपाप्मे'त्यादि श्रुतिः ।

२९१. अमराय –

न म्रियत इत्यमरः ।

'अजरोऽमर' इति श्रुतिः ।

२९२. अमृताय –

अमृतः अविनाशस्वभावः सच्चिदानन्दस्वरूपः परशिवः

'अमृताऽभयो ब्रह्मे'ति श्रुतिः ।

२९३. अच्छात्राय –

कस्यापि छात्रः शिष्यो न भवतीत्यच्छात्रः । स्वस्यैव सर्वगुरुत्वात् ।

तदुक्तं सूतसंहितायाम् –

'अतिवर्णाश्रमी प्रोक्तो गुरुः सर्वाधिकारिणाम् ।
न कस्यापि भवेच्छिष्यो यथाहं पुरुषोत्तमः' इति ।

'ईशानः सर्वविद्याना'मिति श्रुतिः ।

तत्रैव — 'सर्वेषामात्मभूतोऽहमेव संसारमोचकः ।
मामृते साम्बमीशानं मोचकोऽन्यो न विद्यते ॥
अहमप्राप्तसंसारः सर्वज्ञश्च स्वभावतः ।
मदन्येत्वात्मविज्ञानविहीना मायथाऽऽवृताः' इति

२९४. लोकाध्यक्षाय –

लोकानां जनानामधिष्ठाता पालयिता अध्यक्षः ।
'एष लोकाधिपतिरि'ति श्रुतिः ॥

२९५. अनादिनिधनाय -

उत्पत्तिनाशरहितः अनादिनिधनः ।
'तथादिमध्यान्तविहीनमि'ति श्रुतिः ॥

२९६. व्यक्तेतराय -

व्यक्तं सर्वकार्यरूपं तस्मादितरः व्यक्तेतरः । कारणस्वरूपः इति यावत् ।

'अचिन्त्यमव्यक्त'मिति श्रुतिः ।

२९७. व्यक्ताय –

सर्वकार्यरूपो व्यक्तः । विश्वात्मक इति यावत् ।
'विश्वरूपाय वै नमो नमः ॥' इति श्रुतिः ॥

२९८. परमाणवे -

परमः सूक्ष्मः अणुः परमाणुः – दुर्विज्ञेय इति यावत् ।
'अणीयान्ह्यतर्क्यमि'ति श्रुतिः ॥

२९९. लघुस्थूलस्वरूपाय –

लघु परमाण्वादिकं, स्थूलं हिरण्यगर्भादि आकाशादिकं च तदात्मकः लघुस्थूलस्वरूपः विचित्रप्रपञ्चात्मकः इति यावत् ।

'अणोरणीयानहमेव तद्वन्महानहं विश्वमिदं विचित्रम्' इति श्रुतिः ।

३००. परशुधारिणे -

परशुः आयुधविशेषः तं धरतीति परशुधारी ।

'नमः स्वायुधाय चे'ति श्रुतिः ॥

॥ इति तृतीयं शतकम् ॥

---

३०१. खट्वाङ्गहस्ताय –

खट्वाया मञ्चस्य अङ्गं पादः हस्ते यस्य सः तथा । खट्वाङ्गायुधत्वं च शिवस्य प्रसिद्धम् ॥

'कामिकागमे'

'पिङ्गलाभजटाजूटं दशदोर्दण्डमण्डितम् ।
अभयं च प्रसादं च तथा शक्तित्रिशूलकम् ।
खट्वाङ्गं दक्षभागस्थैर्वहन्तं करपल्लवैः ।
भुजगं चाक्षमालां च डमरुं नीलपङ्कजम् ।
बीजपूरं च वामस्थैर्वहन्तं सुप्रसन्नकमिति ॥
इच्छाज्ञानक्रियारूपास्त्रिशूलं शक्तयो मताः ।

उक्तास्त एव खट्वाङ्गं शुद्धसत्वप्रवर्तक' इति शिवागमवचनेन खट्वाङ्गस्य सत्वप्रवर्तकेच्छादिशक्तित्रयात्मकतया शुद्धसत्वप्रवर्तकत्वं योगदण्डधरत्वं सूचितम् ।

'प्रभुर्वै पुरुषः सत्वस्यैष प्रवर्तकः' इति श्रुतिः ॥

३०२. नागहस्ताय -

नागो हस्ते यस्य सः नागहस्तः ।

३०३. वरदाभयहस्ताय -

वरदाभयमुद्राद्वययुक्तौ हस्तौ यस्य सः वरदाभयहस्तः । अनेन सर्वरक्षकत्वं सर्वाभीष्टप्रदत्वं च सूचितम् ।

'स्वस्तिदा अभयङ्कर' इति श्रुतिः ।

३०४. घण्टाहस्ताय -

घण्टा हस्ते यस्य सः घण्टाहस्तः ।

३०५. घस्मराय -

सर्वभक्षको घस्मरः ।

'महाग्रासाय वै नम' इति श्रुतिः ।

३०६. अजिताय -

कैश्चिदपि बाह्यैरसुरादिभिराभ्यन्तरैश्च कामादिभिर्न जितोऽजितः ।

'जेतारमपराजितमिति' श्रुतिः ।

३०७. अणिमादिगुणेशाय –

अणिमाद्यष्टैश्वर्यगुणानामीशः अणिमादिगुणेशः । निरतिशयैश्वर्यशालीति यावत् ।

'एष सर्वेश्वर एष सर्वज्ञ' इति श्रुतिः ।

३०८. पञ्चब्रह्ममयाय –

ईशानादिपञ्चब्रह्मतन्मात्रकः — पञ्चब्रह्ममयः ॥

तथाहि — परशिवः कूटस्थनित्य एक एव सन् स्वशक्त्या अवस्थाभेदेन ईशानाद्यात्मना पञ्चधाऽवस्थित । सर्वशक्तिसामान्यरूपा या पराशक्तिः सापि सृष्टिस्थितिसंहारतिरोभावानुग्रहलक्षणैः शक्त्यविशेषैर्निरूप्यमाणा स्वयमपि सर्जनादिविशेषशक्त्यात्मना पञ्चधा विभक्ता भवति । तत्र सर्जनशक्त्युपाधिकं परशिवस्वरूपं चिन्मात्रमेव ॥ सद्योजातः पालनशक्त्युपाधिकः, वामदेवः संहारशक्त्युपाधिकः, अघोरः तिरोभावशक्त्युपाधिकः, तत्पुरुषः अनुग्रहशक्त्युपाधिकः चिन्मात्रमीशानः । एवं एक एव परशिवः पञ्चभिरुपाधिभिः पञ्चधा विभज्य स्थितः ॥ तदुक्तमागमे —

सानादिमुक्त एको विज्ञेयः, पञ्चमन्त्रतनुः, पञ्चविधं तत्कृत्यं सृष्टिस्थितिसंहारतिरोभावानुग्रहाः, तत्कारणम् ।

'मन्त्रिणे वाणिजायेति' श्रुतिः ॥

३०९. पुरातनाय –

चिरन्तनाय ॥

'पुरातनोऽहं पुरुषोऽहमिति' श्रुतिः ॥

३१०. शुद्धाय -

कालत्रयेऽपि परमार्थतो मायाऽविद्यादिसम्बन्धरहितः शुद्धः

' शुद्धमपापविद्धम् ' इति श्रुतिः ॥

३११. बलप्रमथनाय -

बलानि प्रमथनीयानि लोडयितव्यानि परिभवितव्यानि यस्य सः बलप्रमथनः । सर्वप्राणिबलतिरोधायक इति यावत् ।

'बलप्रमथनाय नमः' इति श्रुतिः ।

३१२. पुण्योदयाय -

पुण्यस्य उदयो येन (यस्मात्) सः पुण्योदयः ।

'एष एव साधुकर्म कारयति' इति श्रुतिः ॥

यद्वा स्वनाममात्रमुच्चरतां संसारतारकत्वात्पुण्योदयत्वम् ॥

'शिवेति नाम विमलं येनोच्चरितमादरात् । तेन भूयो न संसारसागरः समवाप्यते' इति ।

३१३. पद्माय -

पद्मवदाह्लादकरः पद्मः ।

'एष ह्येवानन्दयाति' इति श्रुतिः ॥

३१४. विरक्ताय -

विषयेच्छाविनिर्मुक्तो विरक्तः । स्वस्यैव परमानन्दरूपत्वात् ।

'अनिच्छोऽलेपोऽव्यग्रः' इति श्रुतिः ।

२१५. उदाराय -

भक्ताऽभीष्टद: सर्वोत्कृष्ट उदार: ।

'आप्ततममुत्कृष्टतममिति' श्रुति: ॥

२१६. विचित्राय -

आश्चर्यकरो विचित्र: । आश्चर्यकरत्वं च साधनरहित: सन् आकाशादिकं सृजति, अपाद: सन् सर्वगत:, अपाणि: सन् सर्व-क्रियाकर्ता, अचक्षु: सन् सर्वं पश्यति, अकर्ण: सन् सर्वं शृणोति, असङ्ग: सन् सर्वान्तर्याम्येक एव सन्ननेकरूप इति ।

'सदसस्पतिमद्भुतमि'ति श्रुति: ॥

२१७. विचित्रगतये -

विचित्रा आश्चर्यरूपा: परस्परविरुद्धा गतय: क्रिया यस्य स: तथा ।

तदेजति तन्नैजति तद्दूरे तद्वद(तत्व)न्तिके तदन्तरस्य सर्वस्यास्य बाह्यत इत्यादि श्रुते: ॥

२१८. वाग्विशुद्धाय -

वाचो वाण्यो विशुद्धा ऋग्वेदादयो यस्य स: वाग्विशुद्ध: ।

'अस्य महतो भूतस्य निश्वसितमेतद्यदृग्वेदो यजुर्वेद' इत्यादि श्रुति: ॥

उक्तं च सूत्रकारेण-शास्त्रयोनित्वादिति । विवृतं च भाष्य-कारेण महत: ऋग्वेदादे: शास्त्रस्य योनि: कारणमिति ॥

३१९. चितये -

स्वयं प्रकाशमाना सर्वचेतनरूपा स्वाध्यस्ते सर्वस्मिन् दृश्येऽप्यानुस्यूता चितिः ।

वासिष्ठे —

चिदिहास्तीह चिन्मात्रमिदं चिन्मयमेव च ।

चित्त्वं चिदहमेतेति लोकश्चिदिति सङ्ग्रहः' ॥ इति ॥

'चिद्धीदं सर्वं काशत' इति श्रुतिः ॥

३२०. निर्गुणाय -

गुणरहितो निर्गुणः

'**शिवपुराणे**' शक्रं प्रत्युपमन्युः

'स एव निर्गुणः सर्वे सगुणाश्च सुरासुरा' इति ।

'देहिनो निष्कलः शम्भुः कथं स गुणवान्भवेत्' इति ।

'**ईश्वरगीतायाम्**'

'अव्यक्तं कारणं यत्तदक्षरं परमं पदम् ।

निर्गुणं शुद्धविज्ञानं सदा पश्यन्ति सूरय' इति ।

'केवलो निर्गुणश्चे'ति श्रुतिः ॥

३२१. परमेशाय -

उत्कृष्टः, ब्रह्मादिनियन्ता परमेशः ।

'शिवधर्मे'

'अनन्तकान्तिसम्पन्न अनन्तासनसंस्थित ।
अनन्तशक्तिसम्भोग परमेश नमोऽस्तु ते ।

निरञ्जन निराधार स्वाधार निरुपद्रव (प्लव) ।
प्रसन्न परमेशाय योगीन्द्राय नमोऽस्तु ते ॥

'कूर्मपुराणे'

आरुरुक्षुस्तु सगुणं पूजयेत्परमेश्वरम् ।
पिनाकिनं त्रिणयनं जटिलं कृत्तिवाससम् ॥

'पद्मासनस्थं रुक्मा ङ्ग(भं) चिन्तयेद्वे'ति श्रुतिः ।

'उमासहायं परमेश्वरमि'ति श्रुतिः ।

३२२. शेषाय -

शिष्यत इति शेषः । एक एव परिशिष्यते समाधिकाले अनादिमायया सुप्तो यदा जीवः प्रबुध्यते ।

'अजमनिद्रमस्वप्नमद्वैतं बुध्यते तदेति' श्रुतिः ॥

यद्वा महाप्रलये एक एवावशिष्यते । तदुक्तं

वासिष्ठे —

'ब्रह्मार्कविष्णुहरशक्रसदाशिवादि-
शान्तौ शिवं परममेतदिहैकमास्ते ।
सर्वोप(ा)धिव्ययवशादविकल्परूपं
चैतन्यमात्रमयमुज्झितविश्वसङ्गमि'ति

'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमि'ति श्रुतिः ॥

३२३. पद्मवराय -

पद्मशब्देन पद्मासनपद्मनाभावुच्येते ।

ताभ्यां वरः श्रेष्ठः, तत्कारणत्वात्तत्पूज्यत्वाच्च पद्मवरः । यद्वा पद्मानां हृदयकमलादीनां वरः । सहस्रकमलं ध्यानाधारत्वेन यस्य ॥

महीं मूलाधारे कमपि मणिपूरे हुतवहं
स्थितं स्वाधिष्ठाने हृदि मरुतमाकाशमुपरि ।
मनोऽपि भ्रूमध्ये सकलमपि भित्त्वाकुलपथं
सहस्रारे पद्मे सह रहसि पत्या विहरसे ।'

इत्यभियुक्तोक्तेः ।

अकारं ब्रह्माणं नाभौ, उकारं, विष्णुं हृदये मकारं रुद्रं भ्रूमध्ये, 'ओङ्कारं सर्वेश्वरं द्वादशान्त' इति श्रुतिः ॥

३२४ महेन्द्राय -

महांश्चासाविन्द्रश्च महेन्द्रः । परमैश्वर्यशालित्वादिन्द्रः, महान्वृत्र-वधादिना उत्कृष्टः ।

'महान्वायमभूद्यो वृत्रमवधीदिति तन्महेन्द्रस्य महेन्द्रत्व'मिति श्रुतेः ।

एतादृशमहेन्द्ररूपत्वान्महेन्द्रः । यद्वा महेश्वरत्वान्महेन्द्रः ।

'तमीश्वराणां परमं महेश्वरमि'ति श्रुतेः ॥

३२५. सुशीलाय -

शोभनं शीलं यस्य सः सुशीलः । अतीव सद्वृत्त इति यावत् । सद्वृत्तत्वं परमशिवस्य प्रदर्शितं सूतसंहितायां, मुक्तिखण्डे,

चतुर्थाध्याये — 'अथातः सम्प्रवक्ष्यामि मोचकं पुरुषोत्तमम्' इति प्रस्तुत्य, कश्चिद् द्विजश्रेष्ठः संसारावृतानितरान्

"परित्यज्य विचारेण भगवन्तं त्रिलोचनम् ।
प्रलम्बितजटाबद्धं चन्द्ररेखावतंसकम् ।

नीलग्रीवं शरच्चन्द्रचन्द्रिकावद्विराजितम् ।
गाक्षीरधवलाकारं चन्द्रबिम्बसमाननम् ।

सुस्मितं सुप्रसन्नं च स्वात्मतत्त्वैकसंस्थितम् ।
गङ्गाधरं शिवं शान्तं लसत्केयूरमण्डितम् ।

सर्वाभरणसंयुक्तं सर्वलक्षणसंयुतम् ।
वीरासने समासीनं व्याळयज्ञोपवीतिनम् ।

भस्मधाराभिरामं तं नानाभरणभूषितम् ।
व्याघ्रचर्मावृतं शुद्धं योगपट्टावृतं शुभम् ।

सर्वेषां प्राणिनामात्माज्ञानापस्मारपृष्ठतः ।
विन्यस्तचरणं सम्यज्ज्ञानामृतधरं हरम् ।

सर्वविज्ञानरत्नानां कोशभूतं सुपुस्तकम् ।
दधानं सर्वतत्त्वार्थमालिकां कुण्डिकामपि ।

स्वात्मभूतपरानन्द परशक्त्यर्धविग्रहम् ।
धर्मरूपवृषोपेतं धार्मिकैर्वेदपारगैः ।

मुनिभिः संवृतं मायावटमूलाश्रितं शुभम् ।
ईशानं सर्वविद्यानामीश्वरेश्वरमव्ययम् ।

उत्पत्यादिविनिर्मुक्तं ओङ्कारममलासनम् ।
स्वात्मविद्याप्रदानेन सतां संसारमोचकम् ।

रुद्रं परमकारुण्यात्सर्वप्राणिहिते रतम् ।
उपासकानां सर्वेषामभीष्टसकलप्रदम् ।
दक्षिणामूर्तिदेवाख्यं जगत्सर्गादिकारणमिति ॥

अत्र श्रुतिः — 'अजात इत्येवं कश्चिद्गुरुः प्रपद्यते रुद्र यत्ते दक्षिणं मुखं तेन मां पाहि नित्यमिति परमानन्दस्वभावत्वं वा सुशीलत्वम् । विज्ञानमानन्दं ब्रह्मे'ति (श्रुतिः)

३२६. करवीरप्रियाय -

करवीरप्रियत्वं शिवस्य पुराणादिषु प्रसिद्धम् ॥ —

एकेन करवीरेण सितेनाप्यसितेन वा ।
हरिं हरं वा सम्पूज्य ब्रह्मभूयाय कल्पते । इति ।

अनेन शिवपूजायां सौलभ्यमुक्तम् । शिवः पूजनीय इति च ॥

उक्तं च 'शिवगीतायाम्'

'चन्दनं बिल्वकाष्ठस्य पुष्पाणि वनजान्यपि ।
फलानि तादृशान्येव यस्य प्रीतिकराणि वै ।
दुष्करं तस्य सेवायां किमस्ति भुवनत्रये' इति ।
'दलं किञ्चित्समादाय चुलुकं जलमेव च ।
यो दत्ते नियमेनासौ तस्मै दत्तं जगत्त्रयम् ।' इति च

'यक्षवामहे सौमनसाये'ति श्रुतिः ॥

३२७. महापराक्रमाय -

महान् – परानभिभवनीयः सर्वभयङ्करः पराक्रमो यस्य सः तथा ।
'रुद्रो वै क्रूर' इति श्रुतिः ॥

३२८. कालरूपिणे -

सर्वभूतानां परिणामहेतुः कालः, तदात्मकः कालरूपी ॥

'यो वै रुद्रः स भगवान्यश्च कालस्तस्मै वै नमो नमः' इति श्रुतिः ॥

३२९. विष्टरश्रवसे -

विष्टरं व्यापनशीलं श्रवः कीर्तिः यस्य सः विष्टरश्रवाः । सर्वेषामात्मभूतत्वेन प्रसिद्धत्वात् ।

'सर्वव्यापी सर्वभूतान्तरात्मे' श्रुतिः ॥

यद्वा विष्टर इव श्रवसी कर्णौ यस्य सः विष्टरश्रवाः विष्णुः, तद्रूपत्वाच्छिवस्य ॥ उक्तं च कौर्मे —

'न मे नारायणाद्भेदो विद्यते हि विचारतः ।
तन्महत्परमं ब्रह्म स विष्णुः परमेश्वरः ।' इति ॥

उमासहायं परमेश्वरमिति प्रस्तुत्य

'स एव विष्णुः स प्राण' इति श्रुतिः ॥

३३०. लोकचूडारत्नाय -

चूड्यते धार्यत इति चूडा, शिखा, तत्रत्यरत्नं चूडारत्नम् । लोक्यन्त इति लोकाः सर्वे जनाः । भुवनानि च । तेषां चूडारत्नं शिरोरत्नमिति लोकचूडारत्नम् । अनेन सर्वोत्कृष्टतमः शिवः इत्युक्तं भवति ॥

'आप्तममुत्कृष्टतममि'ति श्रुतिः ॥

३३१. साम्राज्यकल्पवृक्षाय –

सम्राजां भावः साम्राज्यं, तस्य कल्पवृक्षः, यद्वा सम्राजां ब्रह्मादीनां कल्पवृक्षस्तद्वत्सर्वाभीष्टप्रदातेति यावत् ॥

'ब्रह्मणः सृष्टिकर्तृत्वं विष्णोर्दानवमर्दनम् ।
स्वर्गाधिपत्यमिन्द्रस्य शिवपूजाविधेःफलम् '

इत्यादिपुराणवचनम्

'शिव एकोऽध्येयः शिवङ्कर' इति श्रुतिः ।

३३२. त्विषीमते –

महातेजस्त्विषीमान्

'सस्पिञ्जराय त्विषीमत' इति श्रुतिः ॥

३३३. वरेण्याय –

वरेण्यः वरणीयः प्रार्थनीयः, सर्वप्राणिभिरात्मत्वेन सेव्य इति यावत् ।

'यदेतज्जनथसदसद्वरेण्यमि'ति श्रुतिः ॥

३३४. वज्ररूपाय –

वज्रं कुलिशं तद्वद्भयङ्करं रूपं यस्य सः वज्ररूपः ।

भयङ्करत्वं च 'भीषास्माद्वातः पवत' इत्यादि श्रुतिसिद्धम् । 'महद्भयं वज्रमुद्यतमि'ति श्रुतिः ॥

३३५. परमज्योतिषे –

आदित्याद्यपेक्षया—उत्कृष्टप्रकाशस्वरूपः ।

'परशिवः परमं ज्योतिरुपसम्पद्यत' इति श्रुतिः ॥

३३६. पद्मगर्भाय –

पद्मस्य हृदयाख्यस्य मध्ये उपास्यत्वात्पद्मगर्भः । उक्तं च पुराणे —

सुखास्तरे समासीनः स्वस्तिकाद्यासनाश्रितः ।
ऋजुः स्वस्थमना भूत्वा नासाग्रन्यस्तलोचनः ॥

नीलकण्ठं हृदि ध्यायेद्वक्ष्यमाणप्रकारतः ।
हृत्पद्ममष्टपत्रं चाप्यूर्ध्वनालमधोमुखम् ॥

तदूर्ध्वीकृत्य विप्रर्षे प्राणायामेन चैव हि ।
उत्फुल्लं भावयित्वाऽन्तर्वर्तिसूर्येन्दुमण्डलम् ॥

उपर्युपरि सञ्चिन्त्य चन्द्रमण्डलमध्यगम् ।
ध्यायेत्सदाशिवं साम्बं नीलकण्ठं चतुर्भुजम् ॥

चन्द्रकोटिप्रतीकाशं पूर्णचन्द्रनिभाननम् ।
बिम्बाधरं विशालाक्षं चन्द्रालङ्कृतमस्तकम् ।

सुधासंसक्तसर्वाङ्गं प्लावयन्तं सुधां सदा ॥
अक्षमालाम्बुजधरं वरदं चाभयप्रदम् ।

महाहिकुण्डलधरं हारालङ्कृतवक्षसम् ।
भस्मोद्धूलितसर्वाङ्गं फालनेत्रविराजितम् ।

व्याघ्रचर्माम्बरधरं व्यालयज्ञोपवीतिनम् ।
कटिसूत्रेण हेमेन नूपुराद्यैरलङ्कृतम् ।
शान्तं संसारशमनमेवं ध्यायेत्सदा हृदि ।
मासमेकं द्विजाभस्य मृत्युं जह्यादवान्तरम्' इति ।

'दहरं विपाप्मं परमेश्मभूतं (परवेश्मभूतं)
यत्पुण्डरीकं पुरमध्यसंस्थम् ।
तत्रापि दहरं गगनं विशोक-
स्तस्मिन् यदन्तस्तदुपासितव्यम् ।
यद्वेदादौ स्वरः प्रोक्तो
वेदान्ते च प्रतिष्ठितः ।
तस्य प्रकृतिलीनस्य
यः परः स महेश्वरः' ॥ इति श्रुतिः ॥

३३७. सलिलाय –

सलिलवत्स्वच्छः
'सलिल एको द्रष्टा' इति श्रुतिः ॥

३३८. तत्वाधिकाय –

तत्वं प्रकृत्यात्मिका माया, तत्कार्यभूतं पाशस्वरूपम् । पाशबद्धं च जीवस्वरूपमेतत्सर्वम् । षट्त्रिंशत्तत्वरूपमतिक्रम्य स्थित इति तत्वाधिकः । तदुक्तं सूतगीतायाम् —

'आकाशादीनि भूतानि पञ्चैतेषां प्रकीर्तिताः ।
गुणाः शब्दादयः पञ्च पञ्चकर्मेन्द्रियाणि च ।

ज्ञानेन्द्रियाणि पञ्चैव प्राणाद्या दशवायवः ।
मनोबुद्धिरहङ्कारश्चित्तं चेति चतुष्टयम् ।

तेषां कारणभूतैका विद्या षट्त्रिंशकः पशुः ।
विश्वस्य जगतः कर्ता पशोरन्यः परःशिवः ।

उक्तं च भाष्यकारैः —

शिवेशानतत्पुरुषाघोरवामादि-
भिर्ब्रह्मभिर्हृन्मुखैष्षड्भिरङ्गैः ।
अनूपम्य षट्त्रिंशतत्त्वाख्य-विद्या-
'मतीतं परं त्वां कथं वेत्ति को वा' इति

'विश्वाधिको रुद्रो महर्षिः' इति श्रुतिः ।

२३९. सर्गाय –

सृज्यत इति सर्गः सर्वप्रपञ्चात्मकत्वात् ।
'सर्वं खल्विदं ब्रह्मे'ति श्रुतिः ।

२४०. दीर्घाय –

उत्कृष्टत्वात् दीर्घः ।
'एष ह्येवोत्कृष्ट' इति श्रुतिः ॥
यद्वा ब्रह्मत्वाद्दीर्घः ॥
'नमो बृहते चे'ति श्रुतिः ॥

२४१. स्रग्विणे –

ब्रह्मकपालमालाधरः स्रग्वी ।

'पाद्मे' षट्पञ्चाशेऽध्याये —

श्मशानमालयं तस्य भिक्षावृत्तिर्दिगम्बरः ।
कपालानि च माल्यानि कपर्दी मुकुटं तथा ॥ इति ॥

श्मशानालयत्वकपालमाल्यत्वाभ्यां ब्रह्माद्यपेक्षया (शिवस्य) नित्यत्वं द्योतितम् ॥

तथा च श्रुतिः – 'नित्यो नित्यानामि'ति ॥

३४२. पाण्डराङ्गाय –

पाण्डराणि श्वेतानि अङ्गान्यवयवा यस्य सः पाण्डराङ्गः ।

शरच्चन्द्र प्रकाशेन वपुषा शीतलद्युतिम् ।
ध्यायेत्सिंहासनासीनमुमया सहितं शिवमिति ॥

अनेन सत्वोपाधिकत्वं द्योतितम् ।

'सत्वस्यैष प्रवर्तक' इति श्रुतेः ॥

३४३. घोराय –

निग्राहको घोरः

'तस्यैते तनुवौ घोरान्ये'ति श्रुतिः ॥

३४४. ब्रह्मरूपिणे –

हिरण्यगर्भरूपो ब्रह्मरूपः । यथोक्तं ब्रह्माण्डपुराणे —

'रजोगुणात्मने तुभ्यं विश्वसृष्टिविधायिने ।
हिरण्यगर्भरूपाय हराय जगदादये' इति ।

हिरण्यगर्भवेषधरो वा । तपस्यन्तं पतञ्जलिमुद्दिश्यानुग्रहकाले—

तस्य जिज्ञासमानोऽथ भावं देवस्तपस्यतः ।
तमुद्देशमुपागच्छद्ब्रह्मरूपधरो हरः।' इति 'शैवे' ।

'यो वै रुद्रः सः भगवान्यश्च ब्रह्मा तस्मै वै नमो नम' इति श्रुतिः ।

३४५. निष्कलाय —

प्राणादिकलारहितः परशिवो निष्कलः ॥

'विरजं ब्रह्म निष्कलमि'ति श्रुतिः ।

३४६. प्रपथ्याय —

बहुभिः सेवितो मार्गः प्रपथः, तत्र भवः प्रपथ्यः ।

'नम इरिण्याय च प्रपथ्याय चे'ति श्रुतिः ।

३४७. जयाय —

जयतीति जयः, सर्वोत्कृष्टः । सर्वोत्कृष्टत्वं च बाह्यशत्रुभिस्त्रिपुरजलन्धरादिभिरान्तरशत्रुभिः कामादिभिरनाद्यविद्यया चानभिभवनीयत्वात् ।

'एष ह्येवोत्कृष्ट' इति श्रुतिः ॥

३४८. क्षेत्राय —

काशी पुण्डरीकपुरादिकं क्षेत्रम् । तद्रूपः ।

शिवरहस्ये सप्तमांशे षष्ठाध्याये —

पुरा ब्रह्मादिभिः सार्धं विष्णुः काशीदिदृक्षया ।
समाययौ ततो दृष्ट्वा दूरात्काशीं मनोहराम् ॥

प्रणम्य दण्डवद्भूमौ भूयो भूयः कृताञ्जलिः ।
अवाप परमानन्दं दृष्ट्वा काशीति सादरम् ॥
इदमक्षियुगं धन्यं पुण्डरीकनिभं मम ।
यतः शिवस्वरूपेयं काशी दृष्टा मयाधुनेति ॥

'सोऽविमुक्त उपास्यो य एषोऽव्यक्तोऽनन्त आत्मे'ति श्रुतिः ॥

३४९. क्षेत्राणां पतये –

क्षेत्राणां शरीराणां पतिः रक्षकः । श्रूयेत हि सदा रुद्रो जनानां हृदये सन्निविष्टः इति ॥

'क्षेत्राणां पतय' इति श्रुतिः ॥

३५०. कलाधराय –

कलायाश्चन्द्रकलाया धारयिता ।
'नमश्चन्द्रललाटाये'ति श्रुतिः ।
चतुष्षष्टिकलानां वा धारयिता ।
'यः सर्वज्ञ' इति श्रुतिः ॥

३५१. पूताय –

पूतः अविद्यादिदोषरहितः, शुद्धः ।
'पूतः शून्य' इति श्रुतिः ॥

३५२. पञ्चभूतात्मने –

पञ्चसङ्ख्याकानि भूतानि आकाशादीनि आत्मस्वरूपं यस्य ॥

'तत्सृष्ट्वा तदेवानुप्राविशत् । तदनु प्रविश्य । सच्चत्यच्चा भवत्' इति श्रुतेः ॥

स पञ्चभूतात्मा

शैवे – शिवं प्रति ऋषयः —

त्वंभूस्त्वमापस्त्वं वह्निस्त्वं वायुस्त्वं पुनर्वियत् ।
त्वं सूर्यस्त्वं लोकनाथस्त्वं आत्मा त्वं न किं प्रभो' इति ॥

३५३. अनिर्विण्णाय –

अवाप्तसमस्तकामत्वान्निर्वेदोऽस्य न विद्यत इत्यनिर्विण्णः ॥

'एषोऽस्य परम आनन्द' इति श्रुतेः ।

'योऽशनायापिपासे शोकं मोहं जरामृत्युमत्युति' इति श्रुतिः ।

३५५. तथ्याय –

अवितथस्वरूपस्तथ्यः ।

'ऋतं सत्यं परं ब्रह्मे'ति श्रुतिः ॥

३५५. पापनाशकराय –

लौकिकवैदिकनामभिः कीर्तितः, तथा लौकिकवैदिकैः स्तोत्रैस्तुतस्तथा पञ्चाक्षरादिभिर्जप्तः पूजितश्च उमासहायत्वादिरूपेण स्मृतो ध्यानेन वा पापनाशकरः —

" शङ्करसंहितायाम् "

उच्चरन्तीह ये मर्त्याः शिवनामामृतोपमम् ।
ज्ञानतोऽज्ञानतो वापि नास्ति तेषामघं ध्रुवमिति ॥

आदरेण यथा स्तौति धनवन्तं धनेच्छया ।
तथा चेद्विश्वकर्तारं को न मुच्येत बन्धनात् ॥ इति

महाभारते —

'कृत्वा सर्वाणि पापानि हत्वा च भुवनत्रयम् ।
सकृत्पञ्चाक्षरं जप्त्वा सर्वपापैः प्रमुच्यते ॥' इति ॥

स्कन्दे वायव्यसंहितायाम् —

'कृत्वापि सुमहत्पापं भक्त्या पञ्चाक्षरेण वै ।
पूजयेद्यदि देवेशं तस्मात्पापात्प्रमुच्यते ॥ इति ॥

हत्वा भित्त्वा च भूतानि भुक्त्वा चाऽन्यायतोऽपि वा ।
शिवमेकं सदा स्मृत्वा सर्वपापैः प्रमुच्यत' इति ॥

' ब्रह्माण्डपुराणे '

'यच्चिन्तयति पुण्यात्मा तव पादाब्जमव्ययम् ।
ब्रह्महत्याकृतं चापि पापं जह्यान्नसंशय' इति ॥

अपि वा यश्चण्डालः शिव इति वाचं वदेत्तेन सह संवदेत्तेन सह संवसेत्तेन सह भुञ्जीत इति । अथ हैनं ब्रह्मचारिण ऊचुः किञ्जप्येनामृतत्वं ब्रूहीति । स होवाच याज्ञवल्क्यः शतरुद्रीयेणेति । यः शतरुद्रीयमधीते सोऽग्निपूतो भवति । सुरापानात्पूतो भवति । ब्रह्महत्यात्पूतो भवति । कृत्याकृत्यात्पूतो भवति । इति श्रुतिः ॥

३५६. विश्वतश्चक्षुषे —

विश्वतः विश्वत्रयस्य सर्वप्राणिषु ब्रह्मादिपिपीलिकान्तेषु विद्यमानानि चक्षूंषि यस्य सः विश्वतश्चक्षुः ।

'विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतो हस्त' इति श्रुतिः ।

३५७. मन्त्रिणे -

मन्त्राः प्रणवप्रासादादयः अस्य वाचकत्वेन सन्तीति मन्त्री —

उक्तं च योगसूत्रे ईश्वरं प्रस्तुत्य -

'तस्य वाचकः प्रणव' इति ॥

उक्तं च सूतसंहितायाम् —

आकाशादिपदार्थानां वाचकः प्रणवः स्मृतः ।
सर्वावभासकत्वेन ब्रह्मणासदृशः स्मृतः ।
सर्वावभासकं मन्त्रमिमं जपति यो नरः (द्विजः) ।
सर्वमन्त्रजपस्योक्तं फलं स लभतेऽचिरात् ।
अतः सर्वान्परित्यज्य सदा मन्त्रमिमं जपेत् ।
ऋषिर्ब्रह्मास्य मन्त्रस्य गायत्री छन्द उच्यते ।
परमात्माभिधः शम्भुर्देवता परिकीर्तिता । इति ॥

'मन्त्रिणे वाणिजायेति' श्रुतिः ॥

३५८. अनन्तरूपिणे -

अनन्तं कालतो देशतो वस्तुतः परिच्छेदरहितं रूपं अस्य अस्तीति अनन्तरूपी ॥ 'सत्यं ज्ञानमनन्तं ब्रह्मेति' श्रुतिः ॥

यद्वा - आकाशाद्यसङ्ख्याकपदार्थरूपमस्यास्तीति ॥

'ब्रह्मैवेदं विश्वमि'ति श्रुतिः ॥

३५९. सिद्धसाधकरूपाय -

अविशेषेण सर्वात्मत्वेन यः पश्यति स सिद्धः -

तदुक्तं ब्रह्मगीतायाम् —

अविशेषेण सर्वं तु यः पश्यति महेश्वरम् ।
स एव साक्षाद्विज्ञानी स शिवः स तु दुर्लभः । इति ॥

साधकः मुमुक्षुः सर्वदा श्रवणमननादिव्यापारपरः तावुभावपि रूपं यस्य सः सिद्धसाधकरूपः ।

'यमेवैष वृणुते तेन लभ्य' इति श्रुतेः ।

३६०. मेदिनीरूपिणे –

मेदिनी पृथिवी, सा रूपं – 'स्वरूपं' अस्य अस्तीति मेदिनीरूपी ॥
'यो वै रुद्रस्स भगवान् या च भूस्तस्मै वै नमो नमः' ॥ इति श्रुतिः ॥

३६१. अगण्याय प्रतापाय –

इदं पदद्वयं सविशेषणकमेकं नाम ।

प्रकृष्टस्तापः प्रतापः, पराभिभवसामर्थ्यं – अगण्यं अपरिमितं । तथा च अपरिमितसामर्थ्यरूपः परशिव इत्यर्थः । परमेश्वर-प्रतापस्य – अनितरसाधारणत्वात्तस्यैव धर्मस्य प्राधान्येन स्तुतिः ।

'नमस्ते रुद्र मन्यवे' इति श्रुतिः ॥ 'जेतारमपराजितमि'ति श्रुतिः ।

३६२. सुधाहस्ताय -

अमृतकलशहस्तः सुधाहस्तः ॥

स्फटिकरजतवर्णं मौक्तिकीमक्षमाला-
ममृतकलशविद्यां ज्ञानमुद्रां कराब्जैः ।

दधतमुरगकक्षं चन्द्रचूडं त्रिणेत्रं
विधृतविविधभूषं दक्षिणामूर्तिमीडे

'रुद्र यत्ते दक्षिणं मुखं तेन मां पाहि नित्यमि'ति श्रुतिः ॥

३६३. श्रीवल्लभाय -

श्रियाः कमलाया वल्लभः श्रीवल्लभः, तद्रूपत्वाच्छिवस्य ॥

तदुक्तं 'कौर्मे'

मार्कण्डेयं प्रति श्रीकृष्णः –

सदा लिङ्गे हितार्थैषां लोकानां पूजयेच्छिवम् ।
योऽहं तल्लिङ्गमित्याहुर्वेदवादविदो जनाः ।
ततोऽहं देवमीशानं पूजयाम्यात्मनैव तु ।
तस्याहं परमामूर्तिस्तन्मयोऽहं न संशयः इति ॥

'यथा शिवमयो विष्णुरेवं विष्णुमयःशिवः' इति श्रुतिः ॥

३६४. इध्रियाय -

इध्रं निर्मलरूपत्वेन दीप्यमानं, तत्र भवः इध्र्यः ॥

'नम इध्रियाय चे'ति श्रुतिः ॥

३६५. मधुराय -

परमानन्दस्वरूपत्वान्मधुरः ।

'रसो वै सः, रसं ह्येवायं लब्ध्वानन्दी भवति' इति श्रुतिः ॥

३६६. उपाधिरहिताय -

परमार्थतो माया - अविद्यादिसम्बन्धरहितः उपाधिरहितः ।

यथोक्तं ज्ञानवासिष्ठे —

'सिद्धान्तोऽध्यात्मशास्त्राणां सर्वापह्नव एव हि ।
नाविद्याऽस्तीह नो माया शान्तं ब्रह्मेदमक्लमम्' इति ॥

'निरवद्यं निरञ्जनमि'ति श्रुतिः ॥

३६७. सुकृतराशये —

सुकृतानां पुण्यानां राशिः समूहः सुकृतराशिः ।

यथा सुकृतराशेः सुखप्रदत्वमेवं परमेश्वरोऽप्यानन्दकरत्वात्सुकृतराशिः ॥

'यद्वै तत्सुकृतम् । रसो वै सः' इति श्रुतिः ॥

३६८. मुनीश्वराय -

मुनीनां सनकादीनां ईश्वरः विद्योपदेष्टा मुनीश्वरः ॥

'ईशानः सर्वविद्याना'मिति श्रुतिः ॥

३६९. शिवानन्दाय -

शिवया ब्रह्मविद्यारूपया उमाख्याय स्वाभिन्नया कटाक्षवीक्षणसँल्लापादिना अभिव्यक्त आनन्दो यस्य सः शिवानन्दः ॥

तदुक्तं ब्रह्मगीतायाम् –

'सा शिवा करुणामूर्तिर्जगन्माता त्रयीमयी ।
शिवाभिन्ना परानन्दा शङ्करस्यापि शङ्करी' इति ॥

'उमा सहायं परमेश्वरमि'ति श्रुतिः ।

३७०. रिपुघ्नाय –

सुर-रिपून् हन्तीति रिपुघ्नः ।

'अहींश्च सर्वाञ्जम्भयन् सर्वाश्च यातुधान्य' इति श्रुतिः ॥

३७१. तेजोराशये –

तेजसां राशिः तेजोराशिः । अघोरमूर्तिः ॥

'स्कान्दे शङ्करसंहितायाम्' —

मरुत्वन्नामकासुरबाधया द्विजरूपं प्राप्य श्वेतारण्ये श्वेतवननाथमुपासितवान्(?) देवानामुपद्रवार्थं आगतवन्तं मरुत्वन्तं प्रति निग्रहार्थं परमेश्वरस्य दक्षिणमुखादाविर्भूतमघोरास्त्रं (मघोरं) प्रति

'अत्रान्तरे महाघोरं भ्रातृव्यक्षयकारकम् ।
आकाशव्यापि दुर्धर्षमैशं तेजः समुद्बभौ ।
कोटिसूर्यप्रतीकाशं नेत्रस्तम्भकरं महत् ।
तेजांसि सर्वाणि तदा लीनान्यासंस्तदात्मनि ।
तदव्यक्तं महातेजो व्यक्तं समभवत्क्षणात् ।
रुद्रासाधारणैश्चिह्नैश्चिह्नितं विकृताकृतिम् ।
ततो ह्यघोररूपेण सुव्यक्तः परमेश्वरः' । इति ॥

'अघोरेभ्योऽथ घोरेभ्य' इति श्रुतिः ॥

३७२. अनुत्तमाय -

न विद्यते उत्तमो यस्मात्सोऽनुत्तमः । सर्वोत्कृष्ट इति यावत् ॥

'महतः परमव्यक्तमव्यक्तात्पुरुषः परः ।
पुरुषान्न परं किञ्चित्सा काष्ठा सा परा गतिः' इति श्रुतिः ॥

३७३. चतुर्मूर्तिवपुःस्थाय -

चतुर्षु वपुःसु युक्ता मूर्तयः चतुर्मूर्तयः । ब्रह्मविष्णुरुद्रसर्वेश्वरात्मिकाः ।

तासामधिष्ठानभूतानि यानि वपूंषि, राजसस्थूलविराड्रूप, सात्विकसूक्ष्महिरण्यगर्भरूप, तामससौषुप्ताऽज्ञानरूप, गुणसाम्यव्याकृताव्याकृतरूपाणि तेषु सदात्मकविश्ववैश्वानररूप सर्वसृष्टिकर्तृब्रह्मरूपेण, चिदात्मकतैजससूत्ररूपसर्वपालक विष्णुरूपेण, आनन्दात्मक प्राज्ञेश्वररूप सर्वसंहर्तृरुद्ररूपेण, सच्चिदानन्दात्मकसर्वेश्वररूपेण च तिष्ठतीति चतुर्मूर्तिवपुःस्थः ।

'अकारं ब्रह्माणं नाभावुकारं विष्णुं हृदये मकारं रुद्रं भ्रूमध्ये ओङ्कारं सर्वेश्वरं द्वादशान्त' इति श्रुतिः ॥

३७४. बुद्धीन्द्रियात्मने -

बुद्धेर्वृत्तिरूपज्ञानस्य साधनानीन्द्रियाणि बुद्धीन्द्रियाणि तेषामात्मा सत्तास्फूर्तिप्रदत्वेनाधिष्ठानभूतो बुद्धीन्द्रियात्मा ।

'एतस्माज्जायते प्राणो मनःसर्वेन्द्रियाणि च'ति श्रुतिः ॥

३७५. उपद्रवहराय -

उपप्लव उपद्रवः । दुष्टदैत्यकर्तृकः लोकस्य तन्निग्रहपूर्वकं तं हरतीत्युपद्रवहरः ।

'नमः सहमानाय निव्याधिन' इति श्रुतिः ।

३७६. प्रियसन्दर्शनाय -

प्रियं सन्दर्शनं यस्य सः । सन्दर्शनशब्देन सम्यक्ज्ञानं अप्रतिबद्धापरोक्षरूपमुच्युते । तेन स्वविषयेण अविद्या-तत्कार्यनिवृत्त्या-ऽऽनन्दाविर्भावरूपप्रियकरत्वात्प्रियसन्दर्शनः ।

'ईशं तं ज्ञात्वाऽमृता भवन्ती'ति श्रुतिः ॥

३७७ भूतनाथाय -

भूतानां चतुर्विधभूतग्रामाणां (नाथः) नियन्ता भूतनाथः ।

'एष भूताधिपतिरि'ति श्रुतिः ॥

३७८. मूलाय-

अव्यक्तादिस्थावरान्तस्य संसारवृक्षस्य मूलं कारणं, ब्रह्मेति यावत् ।

'उर्ध्वमूलमवाक्शाखमि'ति श्रुतिः ॥

३७९. वीतरागाय -

वीतो रागो यस्य स तथा ।

'अनिच्छोऽलेपोऽव्यग्र' इति श्रुतिः ।

३८०. नैष्कर्म्याय -

कैवल्यं नैष्कर्म्यं, तद्रूपत्वात्परशिवस्य ।

'केवलो निर्गुण'श्चेति श्रुतिः ॥

३८१. विरूपाय -

विगतं रूपं यस्य सः विरूपः ।

'अशब्दमस्पर्शमरूपमव्यय'मिति श्रुतिः ॥

३२८. षट्चक्राय -

षट्सङ्ख्याकानि चक्राणि मूलाधारादीनि । उपासनास्थानत्वेन विद्यमानानि यस्य सः षट्चक्रः ॥ मूलाधारे(रं) चतुर्दलपद्माकारः(रं) षड्दलपद्माकारं स्वाधिष्ठानम् । दशदलपद्माकारं मणिपूरकं, अनाहतं द्वादशदलपद्मात्मकं, आज्ञात्मकं द्विदलपद्मात्मकम् ।

तदुक्तं —

'आधारे लिङ्गनाभौ हृदयसरसिजे, तालुमूले, ललाटे
द्वे पत्रे षोडशारे द्विदशदशदले द्वादशार्धे चतुष्के' । इति ॥

उक्तं च **ललितोपाख्याने** —

'तटिल्लतासमरुचिः षट्चक्रोपरि संस्थिता ।' इति ।

उक्तं **चाम्बास्तवे** —

'मूलालवालकुहरादुदिता भवानी'
निर्भिद्य षट्सरसिजानि तटिल्लतेव' इति ॥

'मूलाम्ना [न्ता] (धारे) वह्निरूपं प्रणवं सन्दध्यात् । सप्तात्मानं चतुरात्मानं अकारं ब्रह्माणं नाभौ विद्यादिति (इत्यादि)' श्रुतिः ।

३८३. विशुद्धये -

विशेषेण शुद्धिः यस्य स विशुद्धिः ।

'अस्थाविरं शुद्धमपापविद्धमि'ति श्रुतिः ॥

३८४. कुलेशाय -

कुलस्य देहस्य ईशः कुलेशः ।

देहेगृहे जनपदे .... ऽन्वये कुलमिति रत्नमालायाम् । देहेशत्वं शिवस्य जीवनियन्तृत्वेन देहे सर्वदा विद्यमानत्वात् ॥

'समानं वृक्षं परिषस्वजाते तयोरन्यः पिप्पलं स्वाद्वत्ति अनश्नन्नन्यो अभिचाकशीति' इति श्रुतिः ॥

३८५. अवनिभर्त्रे -

शेषरूपेणावनिं भूमिं बिभर्तीति अवनिभर्ता ।

'तीक्ष्णाय तीक्ष्णरूपिणे' इति श्रुतिः ॥

३८६. भुवनेशाय -

भुवनानां चतुर्दशभुवनानां ईशः स्वामी ।

'एष लोकेश' इति श्रुतिः ॥

३८७. हिरण्यबाहवे -

हिरण्यनिर्मितानि आभरणानि बाह्वोर्यस्य सः हिरण्यबाहुः। यद्वा हिरण्यसदृशौ बाहू यस्य सः। उपलक्षणमेतत्।

'आप्रणखात्सर्व एव सुवर्ण' इति श्रुतिः॥

'नमो हिरण्यबाहवे' इति (च) श्रुतिः॥

३८८. जीववरदाय -

जीवस्य बृहस्पतेः वरं तत्पृष्टं ज्ञानयोगं आश्रमधर्मसहितं विस्तरेण प्रतिवचनरूपेण ददातीति जीववरदः। 'तदुक्तं सूतसंहितायाम्' ज्ञानखण्डे —

'भवता कथितं सर्वं सङ्क्षेपाद्विस्तरेण च।
इदानीं श्रोतुमिच्छामो ज्ञानयोगं सहेतुक'मिति

सूतं प्रति ऋषीणां प्रश्नं प्रस्तुत्य —

एतदेवपुराऽपृच्छद्गिरां नाथो महेश्वरम्।
देवोऽपि देवीमालोक्य करुणाविष्टचेतसा॥
प्राह गम्भीरया वाचा गुरवे मुनिपुङ्गवाः।

इत्यादिना आश्रमधर्माः, पापानां प्रायश्चित्तं, दानधर्मफलं, पापकर्मफलं, देहोत्पत्तिप्रकारः, नाडीचक्रं, नाडीशुद्धिः, अनन्तरमष्टाङ्गयोगः, एतत्सर्वं बृहस्पतिं प्रत्युक्तं शिवेन। बृहस्पतिस्तावत्सुराणां गुरुः। तं प्रत्यपि एतत्सर्वं परमेश्वरेणोपदिष्टमिति शिवस्य सर्वगुरुत्वमनेन नाम्ना स्पष्टीकृतम्।

'ईशानः सर्वविद्यानामि'ति श्रुतिः॥

३८९. आदिदेवाय -

आदिः ब्रह्मादीनां कारणं स चासौ देवश्च आदिदेवः ।

'यो ब्रह्माणं विदधाति पूर्वमि'ति श्रुतिः ॥

३९०. भाग्याय -

भाग्यस्य यथा सुखकरत्वं एवं परमेश्वरोऽपि सुखकरत्वात् भाग्यम् ।

'नमः शङ्करायेति' श्रुतिः ।

३९१. चन्द्रसञ्जीवनाय –

चन्द्रस्य सञ्जीवनः (वयिता) चन्द्रसञ्जीवनः । सुरैर्निष्पीतं निखिलं चन्द्रमाप्याययन् सञ्जीवयिता आदित्यः । यमादित्या अंशुमाप्याययन्तीति श्रुतेः । तद्रूपत्वाच्चन्द्रसञ्जीवनः ।

'घृणिने कपर्दिने' इति श्रुतिः ॥

३९२. हराय -

स्वविषयज्ञानेनाविद्यादेर्हरणाद्धरः ।

" वायवीयसंहितायाम् "

'प्रसङ्गात्कौतुकाल्लोभात् भयादज्ञानतोऽपि वा ।
हर इत्युच्चरन्मर्त्यः सर्वपापैः प्रमुच्यते ॥' इति ॥

'अमृताक्षरं हर' इति श्रुतिः ॥

३९३. बहुरूपाय -

ब्रह्मादि स्थावरान्ताकारेण बहुरूपः । तस्मै ।

'इन्द्रो मायाभिः पुरुरूप' इति श्रुतिः ॥

३९४. प्रसन्नाय -

प्रसन्नः स्वच्छः केवल इति यावत् ।

अतः शिवः सर्वजगद्विभासकः स्वयंप्रकाशः स्वयमेव केवल इति स्कान्दे ।

'साक्षीचेता केवल' इति श्रुतिः ॥

३९५. आनन्दपूरिताय -

आनन्देन पूरितः आनन्दपूरितः । आनन्दपूर्ण इति यावत् ।

'सच्चिदानन्दपूर्णात्मानं परमात्मानमि'ति श्रुतिः ॥

३९६. कूटस्थाय -

कूटवद्विकाररहिततया तिष्ठतीति कूटस्थः ।

अनेन, जायते, अस्ति, वर्धते, परिणमते, उपक्षीयते नश्यतीति षडपि भावविकाराः प्रतिषिद्धाः ।

'न जायते म्रियते वेति' श्रुतिः ॥

३९७. मोक्षफलाय –

मोक्षरूपं फलं येन स मोक्षफलः । तद्विज्ञानादमृतत्वप्राप्तेः ।

'ब्रह्म वेद ब्रह्मैव भवती'ति श्रुतिः ॥

३९८. शाश्वताय –

सर्वेषु कालेषु एकरूपतया भवतीति शाश्वतः ।

तदुक्तं लैङ्गवासिष्ठे —

न जायते म्रियते वापि नात्मा
नायं भूत्वा भविता वापि भूयः ।
अजो नित्यः शाश्वतोऽयं पुराण-
स्वभावतो विमलो ब्रह्मभूतः ॥ इति ॥

'शाश्वतोऽयं पुराण' इति श्रुतिः ॥

३९९. विरागिणे –

विगतो रागः विरागः, सोऽस्यास्तीति विरागी अवाप्तसमस्तकामत्वात् ॥

श्रुतिरुक्ता

४००. यज्ञभोक्त्रे –

यज्ञस्य भोक्ता यज्ञभोक्ता । परमेश्वरप्रीत्यर्थत्वात् ।

शिवपुराणे —

'अन्तर्यामी स विश्वेशः, सर्वेषमेव देहिनाम् ।
भोक्तापि सर्वयज्ञानां शङ्करः परमार्थतः'

'आवोराजानमध्वरस्ये'ति श्रुतिः ॥

॥ इति चतुर्थं शतकं विवृतम् ॥

४०१. सुषेणाय –

शोभना सेना गणात्मिका यस्य सः सुषेणः ।
'नमो हिरण्यबाहवे सेनान्य' इति श्रुतिः ॥

४०२. दक्षयज्ञविघातिने –

दक्षाध्वरध्वंसको – दक्षयज्ञविघाती ।
द्रोणपर्वण्यर्जुनं प्रति व्यासः —
'कर्माणि चैव घोराणि महादेवस्य धन्विनः ।
तानि ते कीर्तयिष्यामि यथादृष्टं यथाश्रुतम् ॥
नासुरा नामरा लोके गन्धर्वा न च राक्षसाः ।
सुखमेधन्ति कुपिते तस्मिन्नपि शुभागताः ।
विव्याध कुपितो यज्ञं निर्भयस्तु भवस्तदा' इति ।
'जेतारमपराजितमिति' श्रुतिः ॥

४०३. सर्वात्मने –

सर्वान्नन्यः सर्वात्मा –
तदुक्तं सूतसंहितायाम् –
महादेवस्तु सर्वात्मा सर्ववस्त्ववभासकः ।
सर्वानन्दकरः पूर्णः सर्वदेवोत्तमोत्तमः इति ।
' महाभारते '
'यस्मिन्सर्वं यतःसर्वं यः सर्वं सर्वतश्च यः ।
यश्च सर्वमयो देवस्तस्मै सर्वात्मने नमः ॥' इतिः ॥
'यत्परं ब्रह्म सर्वात्मे'ति श्रुतिः ॥

४०४. विश्वपालाय –

विश्वरक्षको विश्वपालः ॥

'सर्वाधिपः सर्वभूतेषु गूढ' इति श्रुतिः ॥

४०५. विश्वगर्भाय –

विश्वः प्रपञ्चः गर्भे अनभिव्यक्तः (अनभिव्यक्तप्रपञ्चकुक्षिः) यस्य स: तथा ॥

'सदेव सौम्येदमग्र आसीदिति' श्रुतिः ॥

४०६. गर्भाय –

सूक्ष्मकारणभूतोऽनभिव्यक्तो गर्भः ।

'तद्धेदं तर्ह्यव्याकृतमासीदि'ति श्रुतिः ॥

४०७. देवगर्भाय –

देवा अग्निवाय्वादय इन्द्रियाभिमानिनो गर्भाः सूक्ष्मभूता यस्य सः तथा (देवगर्भः) ।

'स ईक्षतेमाँल्लोकान् लोकपालान् सृजा इति, सोऽद्भ्य एव पूरुषं समुद्धृत्यामूर्च्छयत्तमभ्यतपत्तस्य मुखन्निरभिद्यत यथाण्डं मुखाद्वाग्वाचोऽग्नि रित्यादि श्रुतिः ।

४०८. संसारार्णवमग्नानां समुद्धरणहेतवे –

संसारः जननमरणादिसमूहः स एवार्णवः, समुद्रः अपारत्वात्, तत्र मग्नानां सर्वदा दुःखानुभवितॄणां, दुःखनाशकरप्लवादिरहितानां

समुद्धरणे, तेषां दुःखनाशने हेतुः कारणं वेदान्तमहावाक्यजन्यवृत्त्यारूढः सन् संसारपाशविच्छेदकरत्वात् ॥

'ज्ञात्वा देवं सर्वपाशापहानिरिति' श्रुतिः ।

४०९. मुनिप्रियाय –

मुनीनां मननशीलानां योगिनां श्रवणमननपुरःसरं सदा ध्येयत्वात् मुनिप्रियः ।

'योगिध्येयं परं पदमि'ति श्रुतिः ॥

४१०. खल्लाय (खल्याय) –

खलं धान्यादिशोधनस्थानं तत्र भवः खल्लः । (खल्यः) ॥

'नम उर्वर्याय च खल्याय चे'ति श्रुतिः ।

४११. मूलप्रकृतये –

मूलभूता प्रकृतिः मूलप्रकृतिः, जगदादिकारणं, तन्निमित्तोपादानात्मकं ब्रह्मेत्यर्थः ।

'तदैक्षत, बहुस्यां प्रजायेयेति' इति श्रुतिः ॥

ऐक्षतेति ईक्षणकर्तृत्वान्निमित्तकारणत्वं, बहुस्यामिति बहुभवनहेतुत्वादुपादानत्वम् ॥

४१२. समस्तसिद्धये –

समस्तसिद्धयोऽणिमाद्याः (दयः) सम्भूता यस्य सः समस्तसिद्धिः, निरतिशयैश्वर्यशालित्वात्तस्य ।

'तमीश्वराणां परमं महेश्वरमि'ति श्रुतिः ॥

४१३. तेजोमूर्तये —

तेजः एव मूर्तिः स्वरूपं यस्य सः तेजोमूर्तिः । स्वयंप्रकाश इति यावत् ॥

'प्राणो ब्रह्मैव तेज एवे'ति श्रुतिः ॥

४१४. आश्रमस्थापनाय —

ब्रह्मचारिगृहस्थवानप्रस्थसन्यासाश्रमाणामष्टवर्षं ब्राह्मणमुपनयीत, तमध्यापयीतेत्यादिस्ववाक्यभूतश्रुतिस्मृतिद्वारा स्थापकः — आश्रमस्थापनः

'अभिमन्ता जीवो नियन्तेश्वर' इति श्रुतिः ॥

४१५. वर्णिने —

वर्णी ब्रह्मचारी ।

'पाद्मे, उमायास्तीव्रतपश्चरणकाले ब्रह्मचारिरूपेण शिवो वरदानार्थमाविर्बभूवेति प्रसिद्धम् —

'अथास्थाय महादेवः प्रथमाश्रमिणो वपुः ।
प्रगल्भवागुमायाश्च तपोवनमुपागमत् ।
आषाढमजिनं मौञ्जीं कौपीनमुपवीतकम् ।
अक्षमालां जटामेकां भस्मधारां च धारयन् ।
प्रथमाश्रमधर्मं तं मूर्तिमन्तमुपागतम् ' इत्यादिना ।

'उत्तमपुरुषाय ब्रह्मचारिण' इति श्रुतिः ॥

४१६. सुन्दराय –

द्वात्रिंशल्लक्षणोपेतः सुन्दरः

'कामाय कामरूपिण' इति श्रुतिः ॥

४१७. मृगबाणार्पणाय –

प्रजापतिः किल सुन्दरीं काञ्चित्सृष्ट्वा तां प्रति मोहितः। सा तदभिप्रायं ज्ञात्वा मृगीरूपेण दुद्राव। सोऽपि मृगरूपेण तां रन्तुमनुगतवान् ॥ एवं भूते, तस्मिन् मृगे बाणस्यार्पणं येन सः मृगबाणार्पणः ।

अयमर्थः स्पष्टीकृतः –

'प्रजानाथं नाथं प्रसभमभिकं स्वां दुहितरं
गतं रोहिद्भूतां रिरमयिषुमृश्यस्य वपुषा ।
धनुष्पाणेर्यातं दिवमपि स पत्राकृतममुं
त्रसन्तं तेऽद्यापि त्यजति न मृगव्याधरभस' इति ॥

'प्रजापतिः स्वां दुहितरमभ्यध्यायदित्यारभ्य तमभ्यायत्याविध्यदि'ति श्रुतिः ॥

४१८. शारदावल्लभाय -

शारदाया वाग्रूपाया श्रुतिस्मृतीतिहासपुराणात्मिकाया वल्लभः पतिः सर्वस्यापि शब्दप्रपञ्चस्य तदधीनत्वात् ।

'अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदः' इति श्रुतिः ॥

यद्वा शारदायाः सरस्वत्याः पुस्तकादिचिह्निताया वल्लभः नायकः। तद्रूपत्वाच्छिवस्य ।

'यो वै रुद्रः स भगवान्यश्च ब्रह्मा तस्मै वै नमो नम' इति श्रुतेः ।

४१९. विचित्रमायिने -

विचित्रा आश्चर्यकरी माया यस्य सः विचित्रमायी । विचित्रमायित्वं च विचित्रजगन्निर्माणेनोन्नेयम् । तदुक्तं 'भाष्यकारेण'- 'जन्मादि' सूत्रे अस्य जगतो नामरूपाभ्यां व्याकृतस्यानेककर्तृभोक्तृसंयुक्तस्य प्रतिनियतदेशकालनिमित्तक्रियाफलाश्रयस्य मनसाऽप्यचिन्त्यरचनारूपस्य जन्म स्थितिभङ्गं यतः सर्वशक्तेः सम्भवति इति तद्ब्रह्मेति ।

'मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्' इति श्रुतिः ॥

४२०. अलङ्करिष्णवे -

स्वात्मानं भक्तजनानप्यलङ्कर्तुं शीलमस्यास्तीति अलङ्करिष्णुः । दिव्यरूपलावण्यसौन्दर्यालङ्कारयुक्तकामेश्वरीरूपेण देव्या आविर्भावानन्तरं तदनुरूपतया त्वयाऽऽविर्भवितव्यमिति देवैः प्रार्थितः दिव्यरूपालङ्कारयुक्तश्रीकामेश्वररूपेण परमेश्वरोऽपि प्रादुर्बभूवेति प्रसिद्धं ललितोपाख्याने । तदुक्तं भाष्यकारैः – श्रीचक्रवर्णनानन्तरं सर्वानन्दमयनामके बिन्दौ पञ्चब्रह्मात्मकं हंसतूलिकातल्पयुक्तं मञ्चमुपवर्ण्य तदनन्तरं

तस्योपरि निवसन्तं
तारुण्यश्रीनिषेवितं सततम् ।
आवर्तफुल्लहल्लक-
मरीचिकापुञ्जमञ्जुलच्छायम् ।

सिन्दूरशोणवसनं
शीतांशुस्तबकचुम्बितकिरीटम् ।

कुङ्कुमतिलकमनोहर-

कुटिलालकहसितकुमुदबन्धुशिशुम् ।

पूर्णेन्दुबिम्बवदनं

फुल्लसरोजातलोचनत्रितयम् ।

तरलाऽपाङ्गतरङ्गित-

शफराङ्कशास्त्रसम्प्रदायार्थम् ॥

मणिमयकुण्डलपुष्य-

न्मरीचिकल्लोलमांसलकपोलम् ।

विद्रुमसहोदराधर-

विसृत्वरस्मितकिशोरसञ्चारम् ॥

आमोदितकुसुमशेखर-

मानीलभ्रूलतायुगमनोज्ञम् ॥

वीटीसौरभवीची-

द्विगुणितवक्त्रारविन्दसौरस्यम् ॥

पाशाङ्कुशेक्षुचाप-

प्रसवशरस्फुरितकोमलकराब्जम् ॥

काश्मीरपङ्किलाङ्गं

कामेशं मनसि कुर्महे सततमिति ॥

गौरीविवाहार्थं गमनसमये आभरणपेटिकामानीय तैराभरणालङ्कारः कर्तव्य इति देवैः प्रार्थितः परशिवः सङ्कल्पमात्रेण सर्वाभरणभूषित-स्तैस्तानेवालङ्कारयामासेति प्रसिद्धम् शङ्करसंहितायाम् ॥

'नमो हिरण्यबाहव' इति श्रुतिः ॥

४२१. बहिर्मुखमहादर्पमथनाय -

बहिर्मुखा विषयलम्पटास्तेषां ये महादर्पाः अपरिमितगर्वास्तान्मथ्नाति । लोडयति, नाशयति इति बहिर्मुखमहादर्पमथनः । इदं च दुष्टनिग्रहत्वं परमेश्वरस्य श्रुतिपुराणादिषु प्रसिद्धम् ।

'सहमानाय निव्याधिन' इति श्रुतिः ॥

४२२. अष्टमूर्तये -

अष्टौ मूर्तयो यस्येत्यष्टमूर्तिः ।

'भूतार्कचन्द्रयज्वानो मूर्तयोऽष्टौ प्रकीर्तिताः ॥'

इत्यागमे -

'भूरम्भांस्यनलोऽनिलोऽम्बरमहर्नाथो हिमांशुः पुमा-
नित्याभाति चराचरात्मकमिदं यस्यैव मूर्त्यष्टकम् ॥'

इत्याचार्याः -

'तदेवाग्निस्तद्वारी'त्यादि श्रुतिः ॥

४२३. निष्कलङ्काय -

स्वाभाविकागन्तुकदोषरूपाद्, अविद्या-तत्कार्य-रूपाद्वा निष्क्रान्तो निष्कलङ्कः ॥

'सद्योज्ज्वलोऽविद्याकार्यहीन' इति श्रुतिः ॥

४२४. हव्याय भोज्याय -

इदं पदद्वयं सविशेषणमेकं नाम ॥ देवानुद्दिश्य दीयमानं द्रव्यं हव्यं, भोज्यं भोजनयोग्यं—अन्नादि ॥ हव्यायेत्युक्ते कृष्णलादिकं भोजनायोग्यमपि प्राप्तम् । भोज्यायेत्युक्ते, कुत्सितमशास्त्रियं च प्राप्तम् । तन्निवृत्त्यर्थं पदद्वयम् । अनेनेहलोकपरलोकसुख-करमन्नं उक्तं भवति ॥ परमेश्वरस्यापि लोकद्वयसुखकरत्वादेतन्ना-माभिधेयत्वम् ॥

'शङ्कराय मयस्करायें'ति श्रुतिः ॥

४२५. यज्ञनाथाय -

यज्ञानां नाथः यज्ञनाथः । यज्ञैः पूजितः फलं ददतीति यावत् ॥ फलमत उपपत्तेरिति न्यायात् ॥

ब्रह्माण्डपुराणे -

'शिवो हि यज्ञपुरुषो यज्ञकर्मफलप्रदः ॥
अनादृत्य शिवं यष्टुर्विनिपातो भवत्यलमि'ति ॥

'स वा एष महानज आत्मान्नादो वसुदान इति श्रुतिः ॥

४२६. मेध्याय -

परिशुद्धो मेध्यः ॥

'शुद्धमपापविद्ध'मिति श्रुतिः ॥

४२७. मुख्याय –

श्रेष्ठो मुख्यः, अग्रच इति यावत् ।

'नम अग्रियाय चे'ति श्रुतिः ॥

४२८. विशिष्टाय –

अतिशेते सर्वमित्यतो विशिष्टः । यद्वा विशेषेण प्रपञ्चापेक्षया नित्यतया शिष्टः । परिशिष्ट इति यावत् ।

'विश्वतः परमं नित्यमि'ति श्रुतिः ॥

४२९. अम्बिकापतये –

पार्वत्याः प्रियः अम्बिकापतिः ।

'हिरण्यपतयेऽम्बिकापतय' इति श्रुतिः ॥

४३०. महादान्ताय –

महान्तो ब्रह्मपुत्राः दान्ता निगृहीतेन्द्रियग्रामाः सनकादयश्शिष्यत्वेन यस्य सः, महादान्तः । सर्वविद्यागुरुत्वात्परशिवस्य । महांश्चासौ दान्तश्च' इति वा । पूर्णत्वान्महत्त्वम् । परमानन्दरूपत्वाद्दान्तत्वम् ॥

४३१. सत्यप्रियाय –

सत्यं ब्रह्म प्रियं यस्य सः, सत्यप्रियः ।

'सत्यं ज्ञानमनन्तं ब्रह्मे'ति श्रुतिः ॥

४३२. सत्याय –

कालत्रयाबाध्यं सत्यम्

४३३. प्रियनित्याय –

प्रियश्चासौ नित्यश्च प्रियनित्यः । आनन्दरूपत्वात्प्रियः, नाशरहितत्वान्नित्यः ।

'आनन्दो ब्रह्मेति व्यजानात्' इति श्रुतिः ॥

४३४. नित्यतृप्ताय –

सदा तृप्तो नित्यतृप्तः । लोको हि विषयलाभादिना तत्काल एव तृप्तः । अयं तु परशिवः निर्मृष्टनिखिलशोकमोहादिपरमानन्दरूपत्वात् नित्यतृप्तः ॥

४३५. वेदित्रे –

सामान्यतो विशेषतश्च सर्वं वेत्तीति वेदिता ॥

'यः सर्वज्ञः स सर्वविदि'ति श्रुतिः ॥

४३६. मृदुहस्ताय —

ईषत्प्रयत्नसाध्यस्वल्पद्रव्यदातुरति (रपि) प्रयत्नसाध्यमहद्द्रव्यदातृत्वान्मृदुहस्तः ॥

तदुक्तं शिवगीतायाम् —

'दलं किञ्चित्समादाय चुलुकं जलमेव च ।
यो दत्ते नियमेनासौ तस्मै दत्तं जगत्त्रयम्' इति ॥

अतिसुलभोद्धरणपण्डिते शिवे मोहमुह्यमानः प्राणिसमूहः संसार-कूपे पतितो वर्तत इति अतिकरुणया प्रवृत्तमिदं नाम ॥

तदुक्तमभियुक्तैः —

'अर्कद्रोणप्रभृतिकुसुमैरर्चनं ते विधेयं
प्राप्यं तेन स्मरहर फलं मोक्षसाम्राज्यलक्ष्मीः ।
एतज्जानन्नपि शिव शिव व्यर्थयन्कालमात्म-
न्नात्मद्रोही करणविवशो भूयसाधःपतामि ॥

'तमीशानं वरदं देवमि'ति श्रुतिः ॥

४३७. अर्धनारीश्वराय –

नार्या अर्धं अर्धनारी, अर्धनारीमिलित ईश्वरः अर्धनारीश्वरः । नार्यंशोऽर्धमीश्वरांशश्चार्धमित्यर्थः । तदुक्तमाचार्यैः —

प्रवालप्रवाहप्रभाशोणमर्धं
मरुत्वन्मणिश्रीमहश्श्याममर्धम् ॥
गुणस्यूतमेकं वपुःशैवमन्तः
स्मरामि स्मरापत्तिसम्पत्तिहेतु' इति ॥

'पुरुषं कृष्णपिङ्गलमि'ति श्रुतिः ॥

४३८. कुठारायुधपाणये –

कुठारनामकमायुधं पाणौ यस्य सः कुठारायुधपाणिः ॥

'नमः स्वायुधाय चे'ति श्रुतिः ॥

४३९. वराहभेदिने –

वराहं भिनत्तीति वराहभेदी ॥ तदुक्तं 'लैङ्गे' नृसिंहमुद्दृत्तं प्रति वीरभद्रः —

'अद्यापि तव पश्य त्वं कपालं कूर्मरूपिणः ।
शिवहारलतामध्ये क्षिप्तं कस्मान्न बुध्यसे ।
विस्मृतं किं तदंशेन दंष्ट्रोत्पाटनपिण्डनम् ।
वराहविग्रहे तेऽद्य-त्वाक्रोशस्तारकारिणे'ति ॥

श्रुतिरुक्ता –

४४०. कङ्कालधारिणे –

कङ्कालं शरीरास्थि । स्याच्छरीरास्थि कङ्कालमित्यमरः । तस्य धारयिता कङ्कालधारी । अनेन परमेश्वरस्य नित्यत्वं ब्रह्मादीनामनित्यत्वं च सूचितम् ॥

'नित्यो नित्याना'मिति श्रुतिः ॥

४४१. महार्थाय –

महांश्चासावर्थश्च महार्थः परमपुरुषार्थमोक्षस्वरूपं ब्रह्मेत्यर्थः ।

'सत्यं ज्ञानमनन्तं ब्रह्मे'ति श्रुतिः ॥

४४२. सुसत्त्वाय –

शोभनं सत्वं सत्त्वरूपो गुणोऽधिष्ठेयत्वेन यस्य सः सुसत्त्वः ।

'महान् प्रभुर्वै पुरुषः सत्वस्यैष प्रवर्तकः' इति श्रुतिः ॥ यद्वा शोभनं सत्वं ज्ञानवैराग्यैश्वर्यादिकं यस्येति ।

'एष सर्वेश्वरः, एष सर्वज्ञः' इति श्रुतिः ॥

४४३. कीर्तिस्तम्भाय –

एष सर्वेश्वरः, एष सर्वज्ञः, एषोऽन्तर्याम्येष योनिः । एष लोकाधिपतिरेष लोकपाल एष लोकेशः, तमीशानं वरदं देवमीडचं, जेतारमपराजितमित्येवमादि श्रुतिप्रथिता कीर्तिःख्यातिरेव स्तम्भः, न तु पाषाणादिमयो यस्य स कीर्तिस्तम्भः ।

४४४. कृतागमाय –

कृता रचिता मुखपञ्चकाद्विनिर्गता आगमाः प्रणवादिमहामन्त्राः, ऋग्वादिसर्ववेदाः प्रोद्गीथा(ता)दि अष्टाविंशतिसङ्ख्याका आगमाश्च यस्य सः कृतागमः । तथाहि परमेश्वरस्योर्ध्वमुखप्रणवादिमन्त्राः, प्रोद्गीतललितस्कन्धसन्तानकशार्वपरमेश्वरकिरणवातुलाख्याद्यागमाश्च, पूर्वमुखात्सामवेदो, रौरवविमलमकुटचन्द्रज्ञानबिम्बाख्यपञ्चागमाश्च, दक्षिणमुखादथर्ववेदः, विजयनिःश्वासस्वायम्भुवानलवीराख्यपञ्चागमाश्च, उत्तरमुखाद्यजुर्वेदो, दीप्तसूक्ष्मसहस्रांशुसुप्रभेदाख्यपञ्चागमाश्च, पश्चिमवदनादृग्वेदः कामिकयोगजचिन्त्य कारणाजिताख्यपञ्चागमाश्च विनिर्गता इति शिवागमे प्रसिद्धम् ।

'अस्य महतो भूतस्य निःश्वसितमेतदृग्वेदः इत्यादि' श्रुतिः ॥

४४५. वेदान्तपठिताय –

विश्वाधिको रुद्रो महर्षिः तमीश्वराणां परमं महेश्वरम्, शिव एको ध्येयः, शिवङ्करः, शिवमद्वैतम् चतुर्थं मन्यन्ते प्रपञ्चोपशमं, शिवोऽद्वैतः इत्यादि वेदान्तेषु पठितः वेदान्तपठितः ।

४४६. अश्रोत्राय -

श्रोत्रेन्द्रियरहितोऽश्रोत्रः ॥

'अचक्षुष्कमश्रोत्रमि'ति श्रुतिः ॥

४४७. श्रुतिमते -

श्रोत्रेन्द्रियजन्यवृत्तिः श्रुतिः सा ज्ञेयत्वेन अस्यास्तीति श्रुतिमान् ।

'एष हि द्रष्टा श्रोते'ति श्रुतिः ॥

४४८. बहुश्रुतिधराय –

बहुश्रुतयः श्रोत्राणि सर्वप्राणिसम्बन्धीनि धरतीति बहुश्रुतिधरः ॥

'सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठति' इति श्रुतिः ॥

४४९. अघ्राणाय –

घ्राणेन्द्रियरहितोऽघ्राणः ॥

'सर्वेन्द्रियविवर्जितमि'ति श्रुतिः ॥

४५०. गन्धावघ्राणकारिणे –

गन्धस्य अवघ्राणं वायुसहितेन घ्राणेद्रियेण ग्रहणम् । तत्करोतीति गन्धावघ्राणकारी ।

'अथ यो वेदेदं जिघ्राणीति, स आत्मा गन्धावघ्राणमि'ति श्रुतिः ।

४५१. पादहीनाय –

पादरहितः पादहीनः ।

'अपाणिपाद' इति श्रुतिः ॥

४५२. बोढ्रे –

वहतीति वोढा ॥ सर्वाधारकः, सकलप्रपञ्चकल्पनाया अधिष्ठानभूतः ।

'आधारमानन्दमखण्डबोधमि'ति श्रुतिः ।

४५३. सर्वत्रगतये –

सर्वत्र गतिरवगतिः ज्ञानं यस्य सः सर्वत्रगतिः ॥ सर्वज्ञ इति यावत् । सर्वत्र गमनं यस्येति वा । सर्वगत इत्यर्थः ।

'आकाशवत्सर्वगतश्च नित्य' इति श्रुतिः ॥

४५४. व्यक्षाय –

विगतान्यक्षाणि इन्द्रियाणि यस्य सः व्यक्षः ।

'अनिन्द्रियमविषयमि'ति श्रुतिः ॥

४५५. जननेत्राय –

जनानां सम्बन्धीनि नेत्राणि यस्य सः जननेत्रः ॥ सर्वात्मकत्वात् ।

'विश्वतश्चक्षुरुत विश्वतोमुख' इति श्रुतिः ॥

४५६. चिदात्मने –

चित् – चैतन्यम् – आत्मस्वरूपं यस्य सः चिदात्मा ॥

'चिदेकरसो ह्ययमात्मा चिद्रूप एवे'ति श्रुतिः ॥

४५७. रसज्ञाय –

रसं (रसान्) जानातीति रसज्ञः, मधुरादिरसविषयवृत्तिप्रतिफलितचैतन्यरूप इत्यर्थः ।

'न हि रसयितृ......विपरिलोपो विद्यत' इति श्रुतिः ॥

४५८. रसनारहिताय –

रसनेन्द्रिय रहितो रसनारहितः ।

अनिन्द्रियमविषयमि'ति श्रुतिः ।

४५९. अमूर्ताय –

सर्वमूर्तिवर्जितोऽमूर्तः ।

'दिव्यो ह्यमूर्त' इति श्रुतिः ॥

४६०. मूर्ताय –

पारमार्थिकसर्वमूर्तिरहितत्वेऽपि व्यावहारिकसर्वमूर्त्यात्मत्वात् मुक्तः ॥

'सर्वाननशिरोग्रीव' इति श्रुतिः ॥

उमासहायादिमूर्त्यात्मको वा ॥

४६१. सदसस्पतये –

सीदन्त्यस्मिन् सर्वे विकारा इति सदः । प्रेयसीस्थानीया सर्वविकारहेतुः परा प्रकृतिः तस्याः पतिः पाता, नित्यं संश्लिष्टो भर्ता परमेश्वर इत्यर्थः ॥

'सदसस्पतिमद्भुतमि'ति श्रुतिः ॥

४६२. जितेन्द्रियाय -

जितानि निगृहीतानि इन्द्रियाणि येन स जितेन्द्रियः, परमानन्दरूपत्वात् स्वरूपानन्द एव । विषयसुखानि परित्यज्य सर्वदा तिष्ठामीति अर्धोन्मीलितनासाग्रन्यस्तलोचनतया चिन्मुद्राभिनयेन अतिविरक्तसनकादिशिष्यपरिवृतत्वेन प्रदर्शितत्वाच्च ।

'या ते रुद्र शिवा तनूरिति' श्रुतिः ॥

४६३. परञ्ज्योतिःस्वरूपिणे -

अपरिच्छिन्नप्रकाशरूपी परञ्ज्योतिःस्वरूपी ॥

'परञ्ज्योतिरूपं सम्पद्यते' इति श्रुतिः ॥

४६४. सर्वमर्त्यानामादिकर्त्रे -

सर्वमर्त्यानां नाशयोग्यानां सर्वकार्याणामितियावत् । आदिकर्ता मूलकारणभूतः सर्वजगदुत्पादक इति यावत् ॥

'सोऽकामयतेति प्रस्तुत्य इदं सर्वमसृजते'ति श्रुतिः ॥

४६५. भुवन्तये -

भुवं तनोतीति भुवन्तिः । भवन्ति विश्वमस्मिन्निति वा ।

'भुवन्तये वारिवस्कृताये'ति श्रुतिः ॥

४६६. सर्गस्थितिविनाशानां कर्त्रे -

सृष्टिस्थितिलयानां कर्ता ॥

'यतो वा इमानि भूतानि जायन्ते' इति श्रुतिः ॥

४६७. प्रेरकाय -

सर्वप्रवर्तक: प्रेरक: । तदुक्तं कौर्मे —

'विधूय मोहकलिलं य या (ये यां) पश्यन्ति तत्परम् ।
साऽविद्यापि महेशस्य नियोगवशवर्तिनी ।

बहुनात्र किमुक्तेन मम शक्त्यात्मकं जगत् ।
मयैव प्रेर्यते विश्वं मयैव प्रलयं व्रजेत् ॥

'पृथगात्मानं प्रेरितारं च मत्वे'ति श्रुतिः ॥

४६८. अन्तर्यामिणे -

अन्तः प्रविश्य सर्वेषां भूतानां यमयिता अन्तर्यामी ॥

आदित्यपुराणे —

अन्तर्यामी स विश्वेशः सर्वेषामेव देहिनाम् ।
भोक्ता हि सर्वयज्ञानां शङ्करः परमार्थतः ॥ इति ॥

४६९. सर्वहृदिस्थाय -

सर्वेषां हृदि तिष्ठतीति सर्वहृदिस्थः ।

'सर्वभूतगुहाशय' इति श्रुतिः ॥

४७०. चक्रभ्रमणकर्त्रे -

संसारचक्रभ्रमणस्य जरामरणदुःखमोहपौनःपुन्यस्य कर्ता । तत्तत्कर्मानुरोधेनोत्पादयिता ॥ शैवे —

येनेदं भ्राम्यते चक्रं संसाराख्यं चराचरम् ।
तेनादौ क्रियते विश्वं तेन संह्रियते पुनः ॥
न तस्य नियमः कश्चित् तेन सर्वं नियम्यते ॥

"पाद्मे"

मृतिबीजं भवेज्जन्म जन्मबीजं भवेन्मृतिः ॥
घटीयन्त्रवदश्रान्तः बम्भ्रमीत्यनिशं नरः । इति ॥

सर्वाजीवे सर्वसंस्थे बृहन्ते
तस्मिन्हंसो भ्राम्यते ब्रह्मचक्रे ।
'पृथगात्मानं प्रेरितारं च मत्वेति' श्रुतिः ॥

अस्यायमर्थः — सर्वेषां आजीवनमस्मिन्निति सर्वाजीवे, सर्वेषां संस्था–समाप्तिः, प्रलयः अस्मिन्निति सर्वसंस्थे बृहन्ते पूर्णे अस्मिन् हंसः जीवः हन्ति गच्छत्यध्वानमिति भ्राम्यते । अनात्मभूतदेहादिं आत्मभूतं मन्यमानः सुरनरतिर्यगादिभेदभिन्ननानायोनिषु ब्रह्मचक्रे कार्यकारणात्मके एवं स भ्राम्यमाणः परिवर्तत इत्यर्थः ॥

केन हेतुना नानायोनिषु प्रवर्तते ? इति तत्राह पृथगात्मानं प्रेरितारं च मत्वेति – आत्मानं जीवात्मानं प्रेरितारं च ईश्वरपृथग्भेदेन मत्वा ज्ञात्वा अन्योऽसौ अन्योऽहमस्मीति जीवेश्वरयोर्भेददर्शनेन संसारे परिवर्तते इत्यर्थः इति ॥

४७१. पुराणाय -

पुराणः पुरातन इति यावत् ।

'स एव शुद्धः स च बन्धकर्ता
स एव पाशः पशवः स एव ॥

स वेद सर्वं न च तस्य वेत्ता

तमाहुराद्यं पुरुषं पुराणम्' इति ॥

'अजो नित्यः शाश्वतोऽयं पुराणः' इति श्रुतिः ॥

४७२. वामदक्षिणहस्तोत्थलोकेशहरिशालिने —

वामदक्षिणाभ्यां हस्ताभ्यां उत्थितौ लोकेशहरी ब्रह्मविष्णू अस्यस्त इति वामदक्षिणहस्तोत्थलोकेशहरिशाली ॥ 'लैङ्गे' शिवं प्रति ब्रह्मा 'स्रष्टा त्वं सर्वलोकानां' इति प्रस्तुत्य

तवाहं दक्षिणाद्धस्तात् पूर्वं सर्वपुरातन ।

वामहस्तान्महाबाहो देवो नारायणः प्रभुः' ॥ इति ॥

'पाद्मे' शिवं प्रति ब्रह्मा —

ब्रह्मविष्णुरुद्रेन्द्रास्ते संप्रसूयन्त इति प्रस्तुत्य

'दक्षिणाङ्गभवोऽहं ते हरिर्वामाङ्गसम्भवः ।

ततो दक्षिणहस्तोऽहं वामहस्तो हरिस्तव' इति ॥

'ध्येयः सर्वैश्वर्यसम्पन्नः सर्वेश्वरश्च शम्भुरि'ति श्रुतिः ॥

४७३. सकलकल्याणदायिने —

सकलमङ्गलप्रदानशीलः सकलकल्याणदायी ॥

'अशुभानि निराचष्टे तनोति शुभसन्ततिम् ।

स्मृतिमात्रेण यत्पुंसां ब्रह्म तन्मङ्गलं विदुरि'ति

'शिवो नः सुमना भवे'ति श्रुतिः ॥

४७४. प्रसवाय –

प्रकर्षेण सूयते, जगदुत्पादयति (उत्पाद्यत) इति प्रसवः ।

'सवितारं नृचक्षसमि'ति श्रुतिः ॥

४७५. स्वभावोदारधीराय –

स्वभावत एव उदारः सर्वाभीष्टफलप्रदः धीरः सर्वज्ञश्च यः स स्वभावोदारधीरः ॥ दातृत्वं सर्वज्ञत्वं च परमेश्वरस्यानादिसिद्धमित्यर्थः ॥ यद्वा स्वभावः प्रत्यगात्मा उदारो महान् पूर्णः, धीरः ज्ञप्तिरूपः । अनेन सर्वभूतान्तरात्मा सर्वव्यापी सर्वसाक्षी परशिव उक्तो भवति ।

'एकोभूत (देवः) सर्वभूतेषु गूढः

सर्वव्यापी [सर्वसाक्षी] सर्वभूतान्तरात्मा । साक्षी'ति श्रुतिः ॥

४७६. सूत्रकाराय –

सूत्रयन्ति सूचयन्ति अर्थानिति सूत्राणि ॥

'लघूनि, सूचितार्थानि स्वल्पाक्षरपदानि च ।

सारवद्भिश्चभूतानि *सूत्राण्याहुर्मनीषिण' इति ॥

तानि च सूत्राणि कर्तुं पाणिनि, व्यास, जैमिनि, कपिल, पतञ्जलि, गौतम, कणादरूपेण स्थित्वा निर्मातुं शीलमस्यास्तीति सूत्रकारः ॥ तद्रूपत्वं च परशिवस्य, सर्वविद्याकर्तृत्वात् ॥ यद्वा सूत्रशब्देन सूत्रात्मा हिरण्यगर्भ उच्यते ॥

'यो ब्रह्माणं विदधाति पूर्वमि'ति श्रुतिः ॥

---

* "अल्पाक्षरमसन्दिग्धं सारवद्विश्वतो मुखम् ।
अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुरि"ति वैयाकरणाः ॥

४७७. विषयार्णवमग्नानां समुद्धरणसेतवे -

विषयशब्देन विषयानुभवरूपसंसार उच्यते ॥

स एवार्णवः समुद्रः विषयार्णवः तस्मिन् संसारसमुद्रे महति, अविद्याकामकर्मप्रभवदुःखोदके तीव्ररोगजरामृत्युमहाग्राहे अनादावनन्तेऽपारे निरालम्बे विषयेन्द्रियजनितसुखलवलक्षणविभ्रमे, पञ्चेन्द्रियोत्थतृष्णमारुतविक्षोभोत्थितानर्थशतमहोर्मिणि, महापातकाद्यनेकनिरयगते, (दुर्वारवारिचरगर्भे) हाहेत्यादिकूजिताक्रोशनोद्भूतमहारवे मग्नानां समुद्धरणे सम्यगुद्धरणे सेतुरिव सेतुः । यथा अतिप्रबलवायुना विचलिते नौकारक्षकैरनियन्त्रिते समुद्रपाषाणादिना भिन्ने तत्रस्थजनान्मग्नांस्तात्कालिकपाथेयसहितेनोडुपेन तीरं प्रापयति कश्चित्, एवं परमेश्वरोऽपि संसारार्णवमग्नान् सत्यार्जवदयादानाहिंसाशमदमधृत्याद्यात्मगुणपाथेयपूर्णज्ञानोडुपेन तत्संयोगसर्वत्यागमार्गेण, सेतुशब्दोपलक्षितं मोक्षतीरं प्रापयतीति .... सेतुरुच्यते ॥

'त्रिरुन्नतं स्थाप्य समं शरीरं
हृदीन्द्रियाणि मनसा सन्निवेश्य ।
ब्रह्मोडुपेन प्रतरेत विद्वान्
स्रोतांसि सर्वाणि भयावहानि ॥ इति श्रुतिः ॥

४७८. अस्नेहस्नेहरूपाय -

न विद्यते विषयेषु स्नेहः किन्तु परमात्मनि यस्य सः अस्नेहः तस्मिन् स्नेहः प्रीत्यतिशयस्तद्धृदय एव सर्वदाऽवस्थानं अभिव्यक्तिरूपं यस्य सः अस्नेहस्नेहरूपः ।

'यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा वृणुते तनुं स्वामि'ति श्रुतिः ॥

४७९. वार्तातिक्रान्तवर्तिने -

वार्ताः शब्दाः तान्यत्यतिक्रान्ततया वर्तितुं शीलमस्यास्तीति वार्तातिक्रान्तवर्ती ॥

षष्ठी जातिगुणक्रियादिरूपनिमित्ताभावात् । शब्दैरप्रतिपाद्यः वाचः अगोचरः इत्यर्थः ॥

'यतो वाचो निवर्तन्त' इति श्रुतिः ॥

४८०. यत्र सर्वं यतःसर्वं सर्वं यत्र (नमो नमः) -

(इदमेकं नाम) यतः ईश्वरात् सर्वं उत्पद्यते, उत्पन्नं सत् स्थितिकाले यत्र जगद्वर्तते, पुनरपि सर्वं जगत् यत्र ईश्वरे विलीयते तस्मा इति शेष ॥ अनेन जगज्जन्मस्थितिलयकारणं ईश्वर इत्युक्तं भवति ॥

'यस्माज्जातं जगत्सर्वं यस्मिन्नेव प्रलीयते ।
येनेदं धार्यते चैव तस्मै ज्ञानात्मने नमः' इति ॥

'यतो वा इमानि भूतानि जायन्ते इत्यादि' श्रुतिः ॥

४८१. महार्णवाय -

महार्णववदतिगम्भीरो महार्णवः । यथा महार्णवो दुरवगाह्यः परमेश्वरोऽप्ययमङ्ख्याकगुणक्रियाविशिष्ट इति ज्ञातुमशक्यत्वाद्दुर-

वगाह्यः अचिन्त्यशक्तिमत्वात् । तदुक्तमनन्तशक्तिश्च विश्वं-विधिज्ञा इति ॥

'अपाणिपादोऽहं अचिन्त्यशक्तिः' इति श्रुतिः ॥

४८२. भास्कराय -

भासं करोतीति भास्करः ।

'तस्य भासा सर्वमिदं विभाती'ति श्रुतिः ॥

४८३. भक्तिगम्याय -

भक्तिर्नाम परमेश्वरे प्रेमातिशयरूपो भावविशेषः । अनेकजन्मकृतसुकृतपरिपाकतस्तदपदानश्रवणस्मरणादौ मनोवाङ्नेत्रगात्रेषु हर्षगद्गदस्वरानन्दबाष्परोमाञ्चकञ्चुकादिसम्पादकः परमेश्वरप्रणिधान-स्तोत्रमन्त्रादिजपाऽऽलयादि — दर्शन लिङ्गादिपूजाप्रवृत्तिकरः मनोवृत्तिविशेषः । पत्याविव प्रोषितनाथायास्तस्यास्तेऽनुगम्यः ॥ इयं च भक्तिः शिवपुराणेऽष्टविधा दर्शिता ।

मद्भक्तजनवात्सल्यं पूजायां चानुमोदनम् ।
स्वयमभ्यर्चनं भक्त्या मदर्थे चाङ्गचेष्टनम् ।

मत्कथाश्रवणे भक्तिः स्वरनेत्राङ्गविक्रिया ।
ममानुस्मरणे नित्यं ...... इति ॥

'भावग्राह्यमनीडाख्यमि'ति श्रुतिः ॥

४८४. भक्तानां सुलभाय -

शिवपूजादिपराणां सुलभः, शीघ्रमनुग्राहकः ।

तदर्थमेव शिवमूर्ति ग्रहणम् ॥

४८५. दुष्टानां दुष्प्रधर्षाय -

दुष्टानां कामक्रोधादियुक्तानां अत एव वर्णाश्रमाचाररहितानां दुष्प्रधर्षः दुष्प्रापः । प्रत्युत तेषां निग्राहकः । तदर्थमेवोग्रमूर्ति-ग्रहणम् ।

'तस्यैते तनुवो घोरान्याशिवान्या' इति नामद्वये श्रुतिः ॥

४८६. विवेकिनां विजयाय -

विवेकिनां साधनचतुष्टयसम्पत्तिपुरःसरं मनननिदिध्यासनोपकृत-श्रवणजन्यप्रत्यग्ब्रह्मैक्यज्ञानवतां विजयो विशेषेण जयः तेषां मूला-विद्यासहितकामक्रोधलोभमोहमदमात्सर्यादिनिरासरूपमूर्तिस्वभावत्वात् ।

'महत्त्वात्मानन्दत्वान्मुक्तत्वादि'ति श्रुतिः ॥

४८७. अतर्किताय -

तर्कः अनुमानम् । तेनावगतस्तर्कितः । (तथा न भवती-त्यतर्कितः) अननुमेय इत्यर्थः ॥

'व्यापको लिङ्ग एव चे'ति श्रुतिः ॥

४८८. लोकाय –

लोक्यतेऽनुभूयते स्वात्मत्वेन योगिभिः इति लोकः ।

'तस्य लोकः स उ लोक एवे'ति श्रुतिः ।

४८९. सुलोकाय –

शोभनाः लोकाः सर्वोत्तमा यस्य सः सुलोकः ।

'अथ यदतःपरो दिव्यो ज्योतिर्दीप्यते विश्वतः पृष्ठेषु सर्वतः पृष्ठेषु अनुत्तमेषूत्तमेषु लोकेष्वि'ति श्रुतिः ॥

४९०. पूरयित्रे –

सर्वस्य जगतः पूरयिता । सर्वं जगदनेन पूर्णमित्यर्थः ।

'तेनेदं पुरुषेण सर्वमि'ति श्रुतिः ॥

४९१. विशेषाय -

विशिष्यत इति विशेषः । सर्वापेक्षयापि विलक्षणः । अधिक इति यावत् ।

'विश्वाधिको रुद्र' इति श्रुतिः ॥

४९२. शुभाय -

शुभो मङ्गलस्वरूपः ।

'शिव एको ध्येयः शिवङ्करः' इति श्रुतिः ॥

४९३. कर्पूरदेहाय -

कर्पूरवच्छ्वेतो देहो यस्य सः कर्पूरदेहः ॥

'चारु स्मेराननसरसिजं चन्द्ररेखावतंसं
फुल्लन्मल्लीकुसुमकलिकादामसौभाग्यचोरम् ॥
अन्तः पश्याम्यचलसुतया रत्नपीठे निषण्णं
लोकातीतं शिवद सततं रूपमप्राकृतं ते' इति ॥

'नमो नीलग्रीवाय च शितिकण्ठाय चे'ति श्रुतिः ॥

४९४. सर्पहाराय -

सर्पा नागास्ते हाराः यस्य सः सर्पहारः ।
अनेन नाम्ना परमेश्वरस्य दुर्जनान्प्रति भयङ्करा मूर्तिः सूचिता ॥

"शैवे"

'उग्रैर्भुजङ्गैस्तत्सृष्टैः रुद्रःस्वाङ्गान्यभूषयदि'ति ॥
दंष्ट्राकरालवदनं ज्वलज्ज्वलनमूर्धजम् ॥
बिभ्राणं त्रिशिखं दीप्तं ध्यायेद्भुजगभूषणम् ॥
'तस्यैते तनुवो घोरान्येति' श्रुतिः ॥

४९५. संसारपाराय –

संसारस्याविद्यात्मकस्य पारः । अविद्यातत्कार्यासंस्पृष्टः इत्यर्थः ॥
'नमः पाराय सुपाराये'ति श्रुतिः ॥

४९६. कमनीयाय -

शङ्करत्वात्कमनीयः ॥

४९७. वह्निदर्पविघाताय -

अग्निगर्वनिर्वापणो वह्निदर्पविघातः ।

लैङ्गे पार्वत्याः स्वयंवरसमये तत्र ब्रह्मविष्णुलोकपालादिसमागमनानन्तरं देव्या उत्सङ्गे शिशुवेषधरं शिवं प्रति निग्रहार्थं कुपिताः सन्तः स्वं स्वमायुधं प्रेरयितुमुद्युक्ताः, तत्र वह्निः शक्तिं तथा क्षेप्तुं न शशाक ॥ (तदास्थित इति ?)

ब्रह्मगीतायाम् — यक्षरूपेणाविर्भूतं परमेश्वरं ज्ञातुमागतोऽग्निस्तं प्रति यक्षः —

यक्षरूपो महादेवः कोऽसीत्याहानलं प्रति ।
अग्निर्वा अहमस्मीति यक्षं प्रत्याह सोऽपि च ॥

सोऽपि प्रोवाच भगवंस्तव किं वीर्यमित्यपि ।
इदं सर्वं दहेयं यदिदं भूम्यां व्यवस्थितम् ॥

इत्याहाग्निस्तृणं तस्मै निधाय परमेश्वरः ।
एतद्दहेति भगवान्स्मयमानोऽभ्यभाषत ॥

अग्निः सर्वजवेनैव तद्दग्धुं तृणमास्तिकाः ।
अशक्तो लज्जया युक्तो भीतोऽगच्छत्सुरान्प्रति ॥

'जातवेद एतद्विजानीहि किमेतद्यक्षमित्यारभ्य तं न शशाक दग्धुं' इत्यन्ता श्रुतिः ॥

४९८. वायुदर्पविघातिने -

पवनाभिमानभङ्गकरो वायुदर्पविघाती ॥

'लैङ्गे' शिशुवेषधरं शिवं प्रति –

वरुणो नागपाशं च ध्वजयष्टिं समीरणः ।
क्षेप्तुं न शशाकेत्यनुषङ्गः ॥

ब्रह्मगीतायाम् –

तच्छ्रुत्वा वायुमाहूय विजानीहीति चाब्रुवन् ।
सोऽपि गत्वा तथा तेन यक्षरूपेण शम्भुना ।
भृशं प्रतिहतो भूत्वा तदागच्छत्सुरान्प्रति ॥

'वायवे तद्विजानीहि' इत्यारभ्य तत्र शशकादातुमित्यन्ता' श्रुतिः ॥

४९९. जरातिगाय -

जरासम्बन्धरहितो जरातिगः । उपलक्षणमेतत् अशनादीनाम् । 'योऽशनायापिपासे शोकमोहं जरामृत्युमत्येति' ॥ इति श्रुतिः ॥

५००. वीर्याय -

पराभिभवनसामर्थ्यं वीर्यम् । तेन तद्वाँल्लक्ष्यते । वीर्यपद-मैश्वर्यादीनामुपलक्षणम् ।

'ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः ।
ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणा' ।

'यो वै रुद्रः स भगवानि'ति श्रुतिः ॥

॥ इति पञ्चमशतकविवरणम् ॥

५०१. विश्वस्य व्यापिने -

विश्वस्य सर्वप्रपञ्चस्य व्यापी व्यापकः ।

'सर्वव्यापी सर्वभूतान्तरात्मे'ति श्रुतिः ।

५०२. सूर्यकोटिप्रतीकाशाय -

सूर्यकोटीनां प्रकाश इव प्रकाशो यस्य सः तथा । इयं च अभूतोपमा । अधिकदीप्तिमानित्यर्थः । उक्तं च '**शिवगीतायाम्**' वृषभारूढं प्रति

'तत्रासीनं महादेवं शुद्धस्फटिकविग्रहम् ।
कोटिसूर्यप्रतीकाशं कोटिशीतांशुशीतलम् ॥
व्याघ्रचर्माम्बरधरं नागयज्ञोपवीतिनम् ॥
सर्वालङ्कारसंयुक्तं विद्युत्पिङ्गजटाधरम् ।
नीलकण्ठं व्याघ्रचर्मोत्तरीयं चन्द्रशेखरम् ॥
नानाविधायुधोद्भासिदशबाहुं त्रिलोचनम् ॥
युवानं पुरुषश्रेष्ठं सच्चिदानन्दविग्रहम्' ॥

'नमो दीप्ताय दीप्तिरूपिण' इति श्रुतिः ॥

५०३. निष्क्रियाय -

क्रियासामान्यरहितो निष्क्रियः ।

'निष्कलं निष्क्रियमि'ति श्रुतिः ॥

५०४. चन्द्रकोटिसुशीताय -

शोभनः शीतः सुशीतः। चन्द्रकोटिरिवसुशीतः चन्द्रकोटि-सुशीतः।

श्रुतिरुक्ता ॥

५०५. विमलाय -

अविद्यादिमलरहितो विमलः।

'नाविद्यानुभवात्मनि स्वप्रकाश' इति श्रुतिः ॥

५०६. गूढस्वरूपाय -

अनभिव्यक्तस्वभावो गूढस्वरूपः।

'एको देवः सर्वभूतेषु गूढ' इति श्रुतिः ॥

५०७. दिशांपतये -

दिशां प्राच्यादीनां पतिः। लोकपालात्मको रुद्रः ॥

'दिशां च पतये नम' इति श्रुतिः ॥

५०८. सत्यप्रतिज्ञाय -

सत्या अबाधिता प्रतिज्ञा आकादिक्रमेणाण्डोत्पादनं; तत्र चतुर्दशलोकास्तेषु चतुर्दशविधग्रामश्चेतनात्मकः। गिरिनदी-समुद्रादिक वर्णाश्रमादिव्यवस्था, दुष्टनिग्रहशिष्टपरिपालनं च। एतत्सर्वं तत्तत्कर्मानुसारेण नियमेन करोति इत्येतादृशी यस्य सः सत्यप्रतिज्ञः।

'तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः। सोऽकामयत, बहुस्यां प्रजायेयेत्याद्यादिका श्रुतिः ॥

५०९. समस्ताय -

सर्वस्वरूपः समस्तः ।

'सर्वो वै रुद्र' इति श्रुतिः ॥

५१०. समाधये —

अहं ब्रह्मास्मीत्येतद्बुद्धिसमाधानरूपः प्रत्यगभिन्नः परमात्मा समाधिः ।

'सन्धिं समाधायात्मन्याचरेदि'ति श्रुतिः ॥

५११. एकरूपाय —

एकमेव रूपं वास्तवं यस्य सः एकरूपः ।

'कूर्मे' —

"नित्यः सर्वगतो ह्यात्मा कूटस्थो दोषवर्जितः ।
एकः स भिद्यते शक्त्या मायया न स्वभावतः ।' इति ॥

'शैवे' —

'एक एवेति यो रुद्रः सर्ववेदेषु गीयते ।
यस्य प्रसादलेशेन मुक्तिर्भवति शाङ्करी' इति ॥

'स एकः स एको रुद्र' इति श्रुतिः ॥

५१२. शून्याय —

माया तत्कार्यरूपसर्वप्रपञ्चरहितः शून्यः ।

वासिष्ठे —

शून्यं तत्प्रकृतिर्माया ब्रह्म विज्ञानमित्यपि ।
शिवः पुरुष ईशानो नित्य आत्मेति कथ्यते इति ॥

पाद्मे —

यं दृष्ट्वा योगिनो नित्यं संतृप्ताःस्वात्मसंस्थितम् ।
अक्षरं वेद सच्छून्यं परमात्मानमीश्वरमि'ति ॥

'स्वप्रकाशमानन्दघनं शून्यमभवदि'ति श्रुतिः ॥

५१३. विश्वनाभिर्ह्रदः —

विश्वस्य सर्वस्य प्रपञ्चस्य नाभिः नाभिस्थानीयः यथा रथचक्रावयवस्य नेम्याधारात्मकस्य नाभिः यस्य द्वारेऽक्षः संलग्नो भवति तादृशद्वारविशिष्टः काष्ठविशेषो नाभिरित्युच्यते । तस्मिन्नेम्याधारभूता अरा अर्पिताः । नेमिशब्देन वलयाकारविशिष्टः भूमौ परिवर्तमानः काष्ठविशेषः उच्यते । अरास्तिर्यग्भूताः शलाकाः काष्ठविशेषा उच्यन्ते । अरेषु नेमिरर्पिता, नाभावरा अर्पिताः ।

'तद्यथा रथस्यारेषु नेमिरर्पिता नाभावरा अर्पिताः' इति श्रुतेः ॥ यथा नेम्याधारान् प्रत्याधारत्वं नाभेः एवं सर्वस्यापि प्रपञ्चस्याधारत्वान्नाभिरित्युच्यते परमेश्वरः । तथाच विश्वनाभिः । स चासौ ह्रदश्च तथा । बहुजलात्मक अशोष्यः दुरवगाह्यः ह्रदः तेन समुद्रो लक्ष्यते । यथा नदीनां समुद्रः आधारः एवं सर्वस्यापि नदीस्थानीयस्यापि । नदीस्थानीयस्य प्रपञ्चस्याधारत्वाद्ध्रदः ॥ ननु विश्वनाभिरित्येवालं, ह्रद इत्यधिकं (इति चेत्) - न - विशेषप्रदर्शनार्थत्वात्तस्य ॥ उत्पत्तिस्थितिकालीनप्रपञ्चाधारत्वं अराधार-

नाभिवत् आधेयरूपनेभ्याधारा अरा अपि प्रतीयन्ते, आधारभूतनाभिरपि प्रतीयते । तदुक्तमभियुक्तैः —

'अस्ति भाति प्रियं रूपं नाम चेत्यंशपञ्चकम् ।
आद्यत्रयं ब्रह्मरूपं जगद्रूपं ततो द्वयम्' इति

श्रुतिरपि — सद्धीदं सर्वं सत् सदिति चिद्धीदं सर्वं काशते । काशते चेति — लयकालीनप्रपञ्चाधारत्वं हृच्छब्दलक्ष्यसमुदवत्तत्र कार्यरूपं जगन्न प्रतीयते ।

'तत्र स्तिमितगम्भीरं न तेजो न तमस्ततम् ॥
अनाख्यमनभिव्यक्तं सत्किञ्चिदवशिष्यत' इति वासिष्ठे ॥

श्रुतिरपि यदा तमस्तन्नदिवा न रात्रिः ......' इति ॥

श्रुतिस्तु 'तद्यथा रथस्यारेषु, नेमिरर्पिता, नाभावरा अर्पिताः । एवमेवैता भूतमात्रा प्रज्ञामात्राः स्वर्पिताः प्रज्ञामात्राः प्राणे अर्पिता इति ॥ यथा नद्यः स्यन्दमाना' इति श्रुतेश्च ॥

५१४. सर्वोत्तमाय —

सर्वेषु देवादिषूत्तमः सर्वोत्तमः ।

'स उत्तमः पुरुष' इति श्रुतेः ।

५१५. कौलाय —

कूले कावेर्यादिनदीतीरे भवः, तत्र लिङ्गरूपेण विद्यमानः कौलः

'नमस्तीर्थ्याय च कूल्याय चे'ति श्रुतिः ॥

५१६. प्राणिनां सुहृदे –

अहरहः सन्ध्यामुपासीत । यावज्जीवमग्निहोत्रं जुहोति । न कलञ्जं भक्षयेत् । न सुरां पिबेन्न परदारान्गच्छेदिति एवमादि विधिनिषेधबोधनेन सर्वप्राणिनां सुहृद्वद्धितोपदेष्टृत्वात् प्राणिनां सुहृत् ।

'धर्मावहं पापनुदं भगेशमि'ति श्रुतिः ॥

५१७. अन्नानां पतये –

अन्नानामदनीयानामोषधीनां वा पतिः स्वामी ॥

'अन्नानां पतये नम' इति श्रुतिः ॥

५१८. चिन्मात्राय –

दृश्यसम्बन्धरहितः सर्वाधिष्ठानभूतः प्रत्यगभिन्नः परशिवः चिन्मात्रः । तदुक्तं वासिष्ठे —

'चेत्यानुपातरहितं सामान्येन च सर्वगम् ।
यच्चित्तत्वमनाख्येयं स आत्मा परमेश्वरः' इति ॥

'चिन्मात्रोऽहं सदाशिवः (वो)' इति श्रुतिः ॥

५१९. ध्येयाय –

ध्येयो – ध्यातव्यः ।

स्कान्दे -

'अथो मोक्षार्थिभिः प्राज्ञैः शिव एव शिवङ्करः ।
ध्येयः सर्वं परित्यज्य शिवादन्यत्तु दैवतमि'ति ॥

'शिव एकः शिवो ध्येयः शिवङ्कर' इति श्रुतिः ॥

५२०. ध्यानगम्याय -

विजातीयप्रत्ययतिरस्कारपूर्वं परशिवविषयकसजातीयप्रत्यय-प्रवाहरूपेण गम्यः प्राप्यः ध्यानगम्यः । **स्कान्दे** —

उमार्धविग्रहा शुद्धा चन्द्रार्धकृतशेखरा ।
नीलग्रीवा त्रिणेत्रा च प्रसन्नवदना शुभा ।
वरदाभयहस्ता च विचित्रमकुटोज्वला ।
सर्वलक्षणसम्पन्ना सर्वाभरणभूषिता ।
स्वस्वरूपानुसन्धानप्रमोदादेव केवलात् ।
महाताण्डवसंयुक्ता ब्रह्मविष्णुशिवादिभिः ।
ध्येयाऽऽध्यन्तविनिर्मुक्ता या मूर्तिः श्रुतिदर्शिता ।
सेयं प्रसन्ना मूर्तिःस्यात् परात्परतरस्य तु ।
ये सदा परमां मूर्तिं ध्यायन्ति हृदयाम्बुजे ।
इह ते परमां भुक्तिं मुक्तिं च प्राप्नुवन्ति हि ॥
'उमासहायं परमेश्वरं प्रभुं
त्रिलोचनं नीलकण्ठं प्रशान्तम् ।
ध्यात्वा मुनिर्गच्छति भूतयोनिं
समस्तसाक्षी तमसः परस्तात् ॥' इति श्रुतिः ॥

५२१. ध्यानरूपाय —

ध्यानस्य प्रत्ययसन्ततिरूपस्य रूपं स्वरूपं प्रत्ययप्रत्यगात्मेत्यर्थः ।

पाद्मे —

ईशानाय नमस्तुभ्यं त्रिणेत्राय नमो नमः ।
ध्येयाय ध्यानरूपाय ध्यापयित्रे नमो नमः । इति ।

'प्रतिबोधविदितमि'ति श्रुतिः ॥ अस्य भाष्यम् —

बोधं बोधं प्रति विदितं -प्रतिबोधविदितं बोधशब्देन बौद्धाः प्रत्यया उच्यन्ते । सर्वप्रत्यया विषयीभवन्ति यस्य स सर्वप्रत्ययदर्शी-दृक्शक्तिमात्ररूपमात्रः प्रत्ययैरेव प्रत्यया विषयतया लक्ष्यते । नान्यद् द्वारान्तरमात्मनो विज्ञानायातः प्रत्ययप्रत्यगात्मतया विदितं ब्रह्म यदा तन्मतं तदा तत्सम्यग्दर्शितं (दर्शयामि) इत्यर्थः ॥ इति ॥

५२२. शाश्वतैश्वर्यविभवाय —

शाश्वतमेकरूपमैश्वर्यमणिमादि तत् शाश्वतैश्वर्यम् । तद्रूपो विभवो यस्य सः तथा ॥ "स्कान्दे" —

अस्मान्रक्षाक्षयैश्वर्य रक्ष त्वं करुणानिधे ।
स्रष्टा त्वं जगतामीश रक्षिता सर्वदेहिनाम् । (जीविनाम्)
'भर्ता त्वं सर्वभूतानां त्वां विनेहास्ति कोऽपरः ॥

'तमीश्वराणां परमं महेश्वरमि'ति श्रुतिः ॥

५२३. वरिष्ठाय —

वरिष्ठः श्रेष्ठः ।

'पराशरोपपुराणे' —

मनुष्याणां च सर्वेषां जम्बूद्वीपनिवासिनाम् ।
वरिष्ठास्तेषु सर्वेषु इति प्रस्तुत्य

'राज्ञो विप्रो वरो विप्राद्वरिष्ठो नास्ति कश्चन ।
विप्रः समस्तमर्त्यानां देवता हि न संशयः ॥

विप्रादपि च भूदेवाद्वरिष्ठा देवताःस्थिताः ।
देवताभ्यः समस्ताभ्यः स्रष्टा ब्रह्मा वरःस्मृतः ।
ब्रह्मणश्च महाविष्णुः वरिष्ठः सर्वपालकः ।
विष्णोरपि वरः साक्षाद्रुद्रः संहारकारकः ।
सर्वेषामपि देवानां वरिष्ठः परमेश्वरः' इति ॥

'परं विज्ञानाद्यद्वरिष्ठं प्रजानामि'ति श्रुतिः ॥

५२४. गोप्त्रे –

गोप्ता रक्षिता,

(महाभारते) द्रोणपर्वणि 'पार्वत्या सहितं देवं' इति प्रस्तुत्य

गोप्तारं सर्वलोकानामिष्ट्वा सादरमच्युतम् ।
वसुदेवसुतं दृष्ट्वा जगाम शिरसा क्षितिमि'ति ॥

'संहृत्य विश्वा भुवनानि गोप्ते'ति श्रुतिः ॥

५२५. निधानाय –

पुरुषार्थरूपेण निधीयत इति निधानम् ।

'यत्र तत्सत्यस्य परमं निधानमि'ति श्रुतिः ॥

५२६. अग्रजाय –

अग्रे जगदादौ हिरण्यगर्भरूपेण जायते इत्यग्रजः ।

'नमः पूर्वजाय चापरजाय चे'ति श्रुतिः ।

५२७. योगीश्वराय –

योगश्चित्तवृत्तिनिरोधः, सोऽस्यास्तीति योगी । योगिनामीश्वरो योगीश्वरः । तेषां योगप्रापकः ।

'ईश्वरप्रणिधानाद्वे'ति स्मृतेः ।

'एष ह्येव साधु कर्म कारयती'ति श्रुतिः ॥

५२८. योगाय –

क्षेत्रज्ञपरमात्मनोरैक्यभावना योगः ।

तदुक्तं भाष्ये —

ज्ञानेन्द्रियाणि सर्वाणि निगृह्य मनसा सह ।
एकत्वभावना योगः क्षेत्रज्ञपरमात्मनोः । इति ॥

तदवाप्यत्वात् परशिवोऽपि योग उच्यते ॥

'ज्ञानप्रसादेन विशुद्धसत्वस्ततस्तु तं पश्यति निष्कलं ध्यायमान' इति श्रुतिः ॥

५२९. योगगम्याय –

विषयेभ्यः प्रति संहृत्य चेतस आत्मनि समाधानं योगः तेन वृत्तिरूपेण गम्यः प्राप्यः योगगम्यः ।

'अध्यात्मयोगाधिगमेन देवं मत्वे'ति श्रुतिः ।

५३०. प्राणेश्वराय –

प्राणानां मुख्यप्राणवृत्तीनां तदतिरिक्तानामिन्द्रियाणां च श्रोत्रादीनां ईश्वरः । अधिष्ठाता सन्निधानमात्रेण प्रेरकः ॥

'प्राणेश्वरः कृत्तिवासाः पिनाकी'ति श्रुतिः ॥

५३१. सर्वशक्तिधराय –

सर्वासां स्वाभिन्नानां चिच्छक्तीनां स्वाधस्तानां मायिकानां, जड-शक्तीनां च, तत्तद्रूपेण धारयिता सर्वशक्तिधरः । तदुक्तं **स्कान्दे**–

चिन्मात्राश्रयमायायाः शक्त्याकारे द्विजोत्तमाः ।
अनुप्रविष्टा यस्यापि (या शक्तिः) निर्विकल्पा स्वयंप्रभा ।
सदाकारा परानन्दा संसारच्छेदकारिणी ।
सा शिवा परमा देवी शिवाभिन्ना शिवङ्करी ।
जगत्कारणमापन्नः शिवोऽथो मुनिसत्तमाः ।
सा तस्यापि भवेच्छक्तिस्तया हीनो निरर्थकः ।

एवं सर्वज्ञ – ईक्षितृरुद्रब्रह्मविष्णुसदाशिवेश्वरहिरण्यगर्भसूत्रात्म-विराट्स्वराट्सम्राडिन्द्रादिलोकपालानामितरदेवानां गन्धर्वादीनां गिरि-नदीसमुद्रादीनां सर्वेषां रूपेणावस्थानसमये शक्तिरपि सर्वत्राङ्गीकर्तव्या इति तस्मिन्नध्याये प्रपञ्चितम् ।

'देवात्मशक्तिं स्वगुणैर्निगूढमि'ति श्रुतिः ॥

५३२. धर्माधाराय –

धर्मः धर्मरूपो वृषभः आधारः वाहनं यस्य सः धर्माधारः । '**स्कान्दे**' – धर्मस्य वृषभरूपत्वं वर्णितम् ।

धर्मः पुरातनं शम्भुं नष्टे चैव चराचरे ।
स्वनाशाद्भीतिसंयुक्तो वृषोऽभूत्वेशमाश्रितः ॥
माभून्नाशो वृषस्येति तं चक्रे वाहनं शिवः ।
वृषरूपमुवाचेदं धर्मं तत्स्थापकः शिवः ।

सर्वदात्वविनाशाय वाहनत्वं भजस्व मे ।
कृते चर चतुष्पात् त्वं परिपूर्णमनोरथः ।

त्रिभिः पादैश्चरैकं त्वं त्रेतायां देहि पाप्मने ।
द्विपात्त्वं द्वापरे भूया द्विपादंहो युवां समौ ।

त्वं चरैकेन पादेन कलौ पापं त्रिपाच्चरेत् ।
अत एव कलौ सर्वे प्राणिनः पापकारिणः ।

मूलाधारं हि धर्मस्य मां न जानन्ति केचन ॥
धारणाद्धर्मयुक्तोऽसि पातनात्पातकं त्वघम् ।

मन्निमित्तकृतं पापमपि धर्माय कल्पते ।
मामनादृत्य धर्मोऽपि पापं स्यात्प्रत्यवायकृत् ।

मां धारयसि धर्म त्वं वृषरूपेण सर्वदा ।
त्वामहं धारयाम्येव मच्छक्त्या परिबृंहितम् ।

इत्येवं धर्ममाकल्प्य वाहनं तमकल्पयत् ।
अत एव च सङ्कल्पात् दाहे च तिसृणां पुराम् ।

विष्णुर्वृषेन्द्ररूपेण दधार शिरसा रथम् ॥
तस्मात् धर्मः सदा शम्भोर्वृषरूपेण वाहनमि'ति ॥

'धर्मावहं पापनुदं भगेशमि'ति श्रुतिः ॥

५३३. धन्याय –

धन्यः सुकृती जगद्धितकर इति यावत् ।

'विश्वशम्भूरवसे साधुकर्मे'ति श्रुतिः ॥

५३४. पुष्कलाय –

पुष्कलं प्रभूतं तादृशं प्रपञ्चरूपं कार्यमस्यास्तीति पुष्कलः सकलजगत्कर्तेति यावत् ।

'इदं सर्वमसृजत यदिदं किञ्चे'ति श्रुतिः ।

५३५. महेन्द्रोपेन्द्रचन्द्रार्कनमिताय –

जिष्णुविष्णुविधुरविप्रभृतिभिर्वन्दितः ।

आदित्यपुराणे –

'नमाम्यहं देववरं पुराणं
उपेन्द्रवेधेन्द्रसुरादिजुष्टम् ।
शशाङ्कसूर्याग्निमयं त्रिलोचनं
ध्यानाभिगम्यं जगतः प्रधानमि'ति ॥

स्कान्दे –

निशम्य वेदार्थमशेषमच्युतः
प्रणम्य शम्भुं शशिशेखरं हरम् ।
प्रसाद्य पादाम्बुजमास्तिको हरिः
स्वमूर्ध्नि विन्यस्य करद्वयेन सः । इति ॥

तत्रैव –

पञ्चाक्षरं परममन्त्रमशेषवेद-
वेदान्तसारमतिशोभनमादरेण ।
जप्त्वा सुराः प्रणवसंयुतमम्बिकेशं
दृष्ट्वा सभापतिमशेषगुरुं प्रणम्य ॥'

'भक्त्या पूज्य महेश्वराख्यममलं भुक्तिप्रदं मुक्तिदं
शक्त्या युक्तमतिप्रसन्नवदनं ब्रह्मेन्द्रपूर्वाः सुराः ।

नित्यानन्दनिरञ्जनामृतपरज्ञानानुभूत्या सदा
नृत्यन्तं परमेश्वरं पशुपतिं भक्त्यैकलभ्यं परम् ॥'

लौकिकेन वचसा मुनीश्वरा
वैदिकेन वचसा च तुष्टुवुः ।
देवदेवमखिलार्थहारिणं
ब्रह्मवज्रधरपूर्वकाः सुराः ॥

'शान्तं शाश्वतं ब्रह्मादिवन्दितमि'ति श्रुतिः ॥

५३६. महर्षिवन्दिताय -

महर्षिभिर्वामदेवादिभिर्हरभक्तादिभिश्च ज्ञानार्थं वन्दितः । उपलक्षणमेतत् स्तोत्रजपपूजातप आदीनाम् । तदुक्तं 'स्कान्दे' हरभक्तो हिरण्याक्ष इत्यारभ्य

'द्विसप्ततिसहस्राणि सहद्वादशसङ्ख्यया ।
सर्वे शमदमोपेताः शिवभक्तिपरायणाः ।
अग्निरित्यादिभिर्मन्त्रैर्भस्मोद्धूलितविग्रहाः ।
रुद्राक्षमालाभरणास्त्रिपुण्ड्राङ्कितमस्तकाः ।
लिङ्गार्चनपरा नित्यं शम्भोरमिततेजसः ।
सत्रावसाने सम्भूय मेरुपार्श्वे विचक्षणाः ।
परस्परं समालोक्य श्रद्धया सुचिरं बुधाः ।
मुक्तिं मुक्तेरुपायं च मोचकं मोचक(न)प्रदम् ।
तपश्चेरुर्महाधीराः शङ्करं प्रति सादरमि'ति ॥

'प्रोवाच सम्यगृषिसङ्घजुष्टमि'ति श्रुतिः ॥

५३७. प्रकाशाय –

दीपवत्प्रकाशयतीति प्रकाशः । यथा दीपोऽन्यैरप्रकाश्यः सन् स्वयमन्धकारावृतान् पदार्थान् प्रकाशयति एवं परमात्मा स्वव्यतिरिक्तैः सर्वैर्जडैरप्रकाश्यः सन् स्वाध्यस्तानज्ञानतत्कार्यभूतानज्ञानेनावृतान् सर्वान् पदार्थान् प्रकाशयति । तदुक्तं स्कान्दे –

अतः साक्षाच्छिवः साम्बः स्वप्रकाशैकलक्षणः ।
तेन सर्वमिदं गम्यं गम्यतेऽसौ न गम्यते ॥

स्वयञ्ज्योतिरिति प्राह श्रुतिः साध्वी महेश्वरम् ।
तस्य भासा सर्वमिदं विभातीत्यपि चाह हि ।

'अतः शिवः सर्वजगद्विभासकः
स्वयंप्रकाशः स्वयमेव केवल' इति ॥

'दीपवत्प्रकाशयति इति प्रकाशः' इति श्रुतिः ॥

५३८. सुधर्मिणे -

शोभनान्धर्मान् अपहतपाप्मत्वादिसत्यसङ्कल्पत्वान्तान् धारयति इति सुधर्मी ॥

'य आत्मा अपहतपाप्मा विजरो विमृत्युः विशोको विजिघत्सो .... सत्यकामः सत्यसङ्कल्पः' इति श्रुतिः ॥

५३९. हिरण्यगर्भाय -

हिरण्यं गर्भो गर्भरूपेण सूक्ष्मरूपेण अन्तः – शरीरे विद्यमानं यस्य सः हिरण्यगर्भः ॥

रुद्रेण सर्गादौ अपः सृष्ट्वा तासूत्सृष्टस्य वीर्यस्य हिरण्यरूप-ब्रह्माण्डात्मना परिणतत्वात् । यथोक्तं स्कान्दे 'सौरसंहितायाम्'

त्रिमूर्तीनां तु सर्गस्यानन्तरं परमःशिवः ।
शब्दादीनां तु भूतानां उत्पत्तिं कुरुते स्वयम् ॥

इत्यादिना त्रिमूर्त्यादिसर्गमुक्त्वा

सदाशिवेश्वरौ रुद्रस्तथा नारायणो विधिः ॥

इति नाम्ना प्रकीर्त्यन्ते तेषु रुद्रः शिवाज्ञया ।
पुरस्तादण्डसर्गस्य ससर्जापो द्विधा पुनः ।

अपामेकांशके विद्वन् स्वकं वीर्यमपासृजत् ।
तदण्डमभवद्धैमं सहस्रांशुसमप्रभम् । इति ॥

एवं च हिरण्यात्मकाण्डस्य परमेश्वराधीनत्वात्तस्य हिरण्यगर्भत्वम् ।

'नमो हिरण्यबाहवे हिरण्यपतये' इति श्रुतिः ।

५४०. हिरण्मयाय –

ज्योतिर्मयो हिरण्मयः ।

मण्डलान्तरगतं हिरण्मयं
भ्राजमानवपुषं शुचिस्मितम् ।
चण्डदीधितिमखण्डितद्युति
चिन्तयेन्मुनिसहस्रसेवितमिति रहस्यम् ॥

'य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्य'ते इति श्रुतिः ॥

५४१. जगद्बीजाय –

जगतः सर्वस्य प्रपञ्चस्य बीजं कारणम् । यद्यपि धाता यथापूर्वमकल्पयदिति श्रुत्या धातुर्हिरण्यगर्भस्य जगत्स्रष्टृत्वं प्रतीयते तथाप्यवान्तरसर्गं प्रति परमेश्वराज्ञया धातुस्स्रष्टृत्वम् । तदुक्तम् –

यदाज्ञया जगत्स्रष्टा विरिञ्चिः पालको हरिः ।
संहर्ता कालरुद्राख्यो नमस्तस्मै पिनाकिन' इति

आकाशादिकारणत्वं तु परमेश्वरस्यैव

'तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः' इति श्रुतिः ॥

५४२. हरये –

हरति पापानीति हरिः विष्णुः, तन्नामकत्वाच्छिवोऽपि हरिः । तदुक्तं हरिवंशे, कैलासयात्रायां शिवः —

'नामानि तव गोविन्द यानि लोके महान्ति च ।
तान्येव मम नामानि नात्र कार्या विचारणे'ति ॥
हरिर्हरति पापानि दुष्टचित्तैरपि स्मृतः । इति

अस्य नाम्नः पापनिवर्तकत्वेन प्रसिद्धत्वात् महत्वम् । तथाच शिवनामत्वमुचितम् ॥ आश्वलायनगृह्ये शूलगवेऽप्युक्तम्–'यान्युच्छ्रितानि नामधेयानि तानि महादेवस्ये'ति यद्वा – तत्वमस्यादि – महावाक्यजन्यवृत्त्यारूढः सन्नज्ञान – तत्कार्याणि हरतीति हरिः ॥

'हरये शर्वायेशानाये'ति श्रुतिः ॥

५४३. सेव्याय —

भजनीयः सेव्यः । भजनं च कायिकवाचिकमानसिकादिभेदेन बहुविधम् । कायिकं – भस्मोद्धूलनत्रिपुण्ड्ररुद्राक्षधारणपुरःसरं शिवक्षेत्रवासशिवपूजाप्रदक्षिणनमस्कारादिकम् । वाचिकं शिवस्तोत्रपञ्चाक्षरजपादि । मानसिकं, शिवविषयकस्मरणमननध्यानादिकम् । आदिशब्देन शिवालयलिङ्गमूर्तिदर्शन–शिवनैवेद्यभोजनशिवाघ्रातनीलोत्पलबिल्वपत्राद्याघ्राणशिवपुराणवेदान्तश्रवणादिकं च ॥ तदुक्तं शिवरहस्ये —

अर्चयध्वं महादेवं विष्णुब्रह्मादिवन्दितम् ।
त्रिकालमप्रमादेन बिल्वपत्रादिसाधनैः ।

भजध्वमप्रमादेन शिवं ब्रह्मादिवन्दितम् ।
जपध्वमनिशं यत्ताश्चैवं पञ्चाक्षरं परम् ।

उद्धूलनं त्रिपुण्ड्रस्य तथा रुद्राक्षधारणम् ।
मा त्यजध्वं मा त्यजध्वं निद्राकालेऽपि सर्वदा ।

शृणुध्वमतियत्नेन मोक्षदां शाम्भवीं कथाम् ।
शाम्भवैःसह सल्लापं कुरुध्वं भस्मभूषणम् । इति ।

पराशरोपपुराणे —

सर्वकारणमीशानः साम्बः सत्यादिलक्षणः ।
न विष्णुर्नविरिञ्चिश्च न रुद्रो नापरः पुमान् ।

स एव सर्ववेदान्तैः सादरं प्रतिपाद्यते ॥
वेदानुसारैः स्मृतिभिः पुराणैर्भारतादिभिः ।

श्रौतस्मार्तसमा(दा)चारैः स एवाराध्यते द्विजैः ।
तच्छेषत्वेन चाराध्यास्तदन्याः सकला अपि ।

'शिव एको (एव) ध्येयः शिवङ्करः ।

आत्मावारे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः । तव श्रिये मरुतो मार्जयन्त । तमुष्टुहि । यो रुद्रो अग्नौ । रुद्रभुक्तं भुञ्जीत रुद्रपीतं पिबेद्रुद्राघ्रातं जिघ्रीते'त्येवमादिका श्रुतिः ॥

५४४. क्रतवे -

यूपसहितो यज्ञः क्रतुः तद्रूपः ॥

'त्वं यज्ञस्त्वं विष्णुस्त्वं वषट्कार' इति श्रुतिः ।

५४५. आधिपत्याय -

आधिपत्यं अधिपतिः अणिमैतदात्म्यमितिवद्भावभवित्र्योरभेद विवक्षया ।

'त्र्यम्बकायैकचरायाधिपतय' इति श्रुतिः ॥

५४६. कामाय -

सर्वैः काम्यत इति कामः परमानन्दरूपत्वात् ।

'कामाय कामरूपिण' इति श्रुतिः ॥

५४७. यशसे -

यशः प्रसिद्धः ।

'यशसां यश' इति श्रुतिः ॥ अस्य भाष्यम् - यशसामात्मनां देहेन्द्रियमनोबुद्धिलक्षणानामात्मा यशः इति ॥

५४८. प्रचेतसे -

प्रकृतं चेतः ज्ञानं यस्य सः प्रचेताः । सर्वज्ञ इति यावत् ।

'धाता विधाता परमो न सन्दृगिति' श्रुतिः ॥

५४९. ब्रह्ममयाय -

ब्रह्ममयो वेदमयः, सर्ववेदप्रतिपाद्यत्वात् ।

'सर्वे वेदा यत्पदमामनन्ति' इति श्रुतिः ॥

५५०. सकलाय -

कलाभिः प्राचीदिगादिरूपाभिः पादचतुष्टयात्मिकाभिः षोडशसङ्ख्याकाभिः सहितः सकलः । इदं छान्दोग्ये षोडशकलाविद्यायां प्राचीदिक्कलाप्रतीचीदिक्कलादक्षिणादिक्कलोदीचीदिक्कला । एष वै सोम्य चतुष्कलः । पादो ब्रह्मणः प्रकाशवानित्यादिना प्रतिपादितम् ॥

५५१. रुक्मवर्णाय -

स्वयञ्ज्योतिःस्वभावो रुक्मवर्णः ।

'सर्वाभिमानिनं साम्बं संसारोदधितारकम् ।
रुक्माभं सूक्ष्मधीगम्यं विदित्वा मुच्यते जनः' ॥

इति पराशरोपपुराणे ॥

'यदा पश्यः पश्यते रुक्मवर्ण(मिति)' इति श्रुतिः ॥

५५२. ब्रह्मयोनये -

ब्रह्म चासौ योनिश्च ब्रह्मयोनिः । अपरस्य ब्रह्मणो वेदानां वा योनिः । तदुक्तम् —

अस्य पूर्वमुखं सौम्यं बालार्कसदृशप्रभम् ।
त्रिलोचनारविन्दाढ्यं बालेन्दुकृतशेखरम् ॥
अस्मादेव मुखात्पूर्वमृचः सर्वाः प्रजज्ञिरे ।
दक्षिणं नीलजीमूतसमानरुचिरप्रभम् ॥
भ्रुकुटीकुटिलं घोरं रक्तवृत्तेक्षणत्रयम् ।
दंष्ट्राकरालं दुर्धर्षं स्फुरिताधरपल्लवम् ।
इन्दुरेखाकृतोत्तंसमूर्ध्वज्वलितमूर्धजम् ।
अस्मादेव मुखात्पूर्वं यजुर्वेदाः प्रजज्ञिरे ।
पश्चिमं दुग्धसङ्काशं बालचन्द्रशिखामणिम् ।
मुक्ताफलमयैर्हारैर्भूषितं तिलकोज्वलम् ।
अस्मादेव मुखात्पूर्वमथर्वाङ्गिरसोऽभवन् ॥
उत्तरं विद्रुमप्रख्यं नीलाळकविभूषितम् ।
सविलासं त्रिणयनं चन्द्राभरणभास्वरम् ।
अस्मादेव मुखात्पूर्वं सामवेदाः प्रजज्ञिरे ।
पञ्चमं स्फटिकप्रख्यं शुद्धविद्यासमुज्ज्वलम् ।
अतीव सौम्यमुत्फुल्ललोचनं चन्द्रभूषणम् ।
अस्मादेव मुखात्पूर्वमोङ्काराख्यः समुद्गतः इति ॥

'कर्तारमीशं पुरुषं ब्रह्मयोनिमि'ति श्रुतिः ॥

५५३. योगात्मने -

बाह्येन्द्रियनिग्रहपूर्वकं ज्ञानध्यानप्रणिधानाद्यनुष्ठानं योगः । तेन गम्यः आत्मा योगात्मा ॥ तदुक्तं सूत्रकारेण —

अपि संराधने प्रत्यक्षानुमानाभ्याम् इति ।

व्याख्यातं च भाष्यकारेण - अपि चैनमात्मानं निरस्तसमस्तप्रपञ्चमव्यक्तं संराधनकाले पश्यन्ति योगिनः । संराधनं भक्तिध्यानप्रणिधानाद्यनुष्ठानम् । कथं पुनरवगम्यते ? संराधनकाले पश्यन्तीति प्रत्यक्षानुमानाभ्यां श्रुतिस्मृतिभ्यामित्यर्थः । तथा च श्रुतिः

'पराञ्चिखानि व्यतृणत्स्वयंभू-
स्तस्मात्पराङ् पश्यति नान्तरात्मन् ।
कश्चिद्धीरः प्रत्यगात्मानमैक्ष-
दावृत्तचक्षुरमृतत्वमिच्छन्नि'ति ॥

ज्ञानप्रसादेन विशुद्धसत्व-
स्ततस्तु तं पश्यति निष्कलं ध्यायमानः ।

इत्येवमाद्या स्मृतिरपि ॥

यं विनिद्रा जितश्वासाः सन्तुष्टास्संयतेन्द्रियाः ।
ज्योतिः पश्यन्ति युञ्जानास्तस्मै योगात्मने नमः ॥ इति ॥

'योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनमि'ति श्रुतिः ॥

५५४. अभीताय -

भीतिरहितोऽभीतः । भीतिहेतुभूतद्वितीयवस्तुनोऽभावात् ।
'द्वितीयाद्वै भयं भवति' इति श्रुतेश्च ॥
'अभयं प्रतिष्ठां विन्दते' इति श्रुतिः ॥

५५५. दिव्यनृत्ताय -

दिव्यं अमानुषं, दर्शनमात्रेण मुक्तिकरं नृत्तं नर्तनं यस्य सः दिव्यनृत्तः ॥ तदुक्तं स्कान्दे –

'मुनीश्वरान्महेश्वरः समस्तदेवनायकः
सुरेश्वरान्निरीक्षणान्निरस्तपापसञ्चयान् ।
अनुग्रहेण शङ्करः प्रगृह्य पार्वतीपतिः
समस्तवेदशास्त्रसारभूतमुत्तमोत्तमम् ॥

प्रदर्शयन्नटेश्वरः समस्तदेवसन्निधौ
स्वनर्तनं विमुक्तिदं महत्तरं महेश्वरः ।
समस्तलोकरक्षकं हृदिस्थितं महात्मनां
निरीक्षणान्महेश्वरोऽकरोत्सभापतिः शिवः ॥ इति ॥

एवं पुण्डरीकपुरमागत्य तपः कुर्वतो देवान् प्रति नटनं कृतवान्नटराजः सभापतिः । अनन्तरं तैः पृष्टः सन् आत्मस्वरूपं आत्मज्ञानसाधनं चोक्तवान् । अनन्तरं तैः स्तोत्रं कृतम् । 'नमस्ते रुद्रमन्यव' इत्यारभ्य 'सभारूपाय ते तुभ्यं सभायाः पतये नमः' इत्यन्तेन ॥

'सभाभ्यः सभापतिभ्यश्च वो नम' इति श्रुतिः ॥

५५६. जगतामेकबीजाय -

जगतां कार्यरूपाणामेकः सन् बीजं कारणं, एकबीजम् । अनेन पातञ्जलवैशेषिकादिमतप्रसिद्धप्रकृतिपरमाण्वादीनां कारणत्वं निराकृतं भवति । सिद्धान्ते त्वेकस्यैवेश्वरस्य जगत्प्रत्यभिन्ननिमित्तोपादानत्वात् ।

'सोऽकामयत बहुस्यां प्रजायेये'ति इति श्रुतिः ॥

ननु मायाया अपि जगत्कारणत्वात् कथमीश्वरस्यैव तत्वमत आह-

५५७. मायाबीजाय –

मायाया बीजं कारणमधिष्ठानमिति यावत् ।

एवं च मायाया अध्यस्तत्वेन वास्तवत्वाऽभावात् शक्तित्वेन स्वातन्त्र्याभावाच्च जगत ईश्वरैकबीजत्वमुपपद्यते ।

'देवात्मशक्तिं स्वगुणैर्निगूढामि'ति श्रुतिः ॥

५५८. सर्वहृन्निविष्टाय –

सर्वेषां प्राणिनां हृदि हृत्पुण्डरीके बुद्धौ च सन्निविष्टः सम्यङ्-निविष्टः प्रत्यगात्मत्वेन स्थितः तत्र अभिव्यक्त इत्यर्थः ।

'सदा जनानां हृदये सन्निविष्टः' इति श्रुतिः ॥

५५९. ब्रह्मचक्रभ्रमाय –

ब्रह्मचक्रस्य कार्यकारणरूपस्य सर्वात्मकस्य भ्रमः भ्रमणं पौनः-पुन्येन स ब्रह्मचक्रभ्रमः ।

ब्रह्मचक्रस्वरूपमुक्तं श्वेताश्वतरोपनिषदि –

'तमेकनेमिं त्रिवृतं षोडशारं (न्तं)
शतार्धारं विंशतिप्रत्यराभिः ।
अष्टकैः षड्भिर्विश्वरूपैकपाशं
त्रिमार्गभेदं द्विनिमित्तैकमोहमि'ति ॥

अस्य भाष्यम् —

य एकः कारणानि निखिलान्यधितिष्ठति तमेकनेमिं योनिः कारणमव्याकृतमाकाशं परमव्योम माया प्रकृतिः, शक्तिः, तमोऽविद्या छाया अज्ञानमनृतमव्यक्तं इत्येवमादि शब्दैरभिलप्यमानैका करणावस्था नेमिरिव नेमिः सर्वाधारो यस्याधिष्ठातुरद्वितीयस्य परमात्मनस्तमेकनेमिम् ॥ त्रिवृतं त्रिभिः सत्वरजस्तमोभिः प्रकृतिगुणैर्वृतम् । षोडशको विकारः पञ्च भूतान्येकादशेन्द्रियाण्यन्तोऽवसानं विस्तारसमाप्तिः यस्यात्मनस्तं षोडशान्तम् । अथवा प्रश्नोपनिषदि यस्मिन्नेताः षोडश कलाः प्रभवन्तीत्यारभ्य स प्राणमसृजत, प्राणाच्छ्रद्धामित्यादिना प्रोक्ता नामान्ताः षोडश कला अवसानं यस्येति । अथवा एकनेमिमिति कारणभूताव्याकृतावस्थाऽभिहिता । तत्कार्यसमष्टिभूतविराट्सूत्रद्वयं तद्व्यष्टिभूतभूरादिचतुर्दश भुवनान्यन्तोऽवसानं यस्य प्रपञ्चात्मनाऽवस्थितस्य तं षोडशान्तम् । शतार्धारं पञ्चाशत्प्रत्ययभेदा विपर्ययाशक्तितुष्टिसिद्ध्याख्या अरा इव यस्य तं शतार्धारम् ॥ पञ्च विपर्ययभेदाः । तमो मोहो महामोहस्तामिस्रो ह्यन्धतामिस्र इति । अशक्तिरष्टाविंशतिधा । तुष्टिर्नवधा । अष्टधा सिद्धिः । एते पञ्चाशत्प्रत्ययभेदाः । तत्र तमसो भेदोऽष्टविधः । अष्टसु प्रकृतिष्वनात्मस्वात्मप्रतिपत्तिविषयभेदेनाष्टविधत्वप्रतिपत्तेः । मोहस्य चाष्टविधो भेदः । अणिमादिशक्तिर्मोहः । दशविधो महामोहः । दृष्टानुश्रविकभेदेन तेषां दशविधत्वम् । तामिस्रोऽष्टादशविधः । दृष्टानुश्रविकेषु

दशसु विषयेष्वष्टविधैरैश्वर्यैः प्रयतमानस्य तदसिद्धौ यः क्रोधः सः तामिस्रोऽभिधीयते । अन्धतामिस्रोऽप्यष्टादशविधः । अष्टविधैश्वर्ये दशसु विषयेषु भोग्यत्वेनोपस्थितेष्वर्धभुक्तेषु मृत्युना ह्रियमाणस्य यः शोको जायते महता क्लेशेनैते प्राप्ता नचैते मयोपभुक्ताः प्रत्यासन्नश्चायं मरणकालः इति सोऽन्धतामिस्र इत्युच्यते । विपर्ययभेदा व्याख्याताः । अशक्तिरष्टाविंशतिधोच्यते । एकादशेन्द्रियाणामशक्तयो मूकत्वबधिरत्वान्धत्वप्रभृतयो बाह्याः । अन्तःकरणस्य पुरुषार्थायोग्यता तुष्टीनां विपर्ययेण नवधाऽशक्तिः । सिद्धीनां विपर्ययेणाष्टधाऽशक्तिः । तुष्टिर्नवधा । प्रकृत्युपादानकालभाग्याख्याश्चतस्रः । विषयोपरामात्पञ्च* ॥ कश्चित्प्रकृतिपरिज्ञानात्कृतार्थोऽस्मीति मन्यते । अन्यः पुनः पारिव्राज्यलिङ्गं गृहीत्वा कृतार्थोऽस्मीति मन्यते । अपरः पुनः प्रकृतिपरिज्ञानेन किमाश्रमाद्युपादानेन वा किं बहुना कालेनावश्यं मुक्तिर्भवतीति मत्वा परितुष्यति । कश्चित् पुनर्मन्यते विना भाग्येन न किञ्चिदपि प्राप्यते । यदि मम भाग्यमस्ति ततो भवत्येवात्रैव मोक्षः इति परितुष्यति । विषयाणामार्जनमशक्यमित्युपरम्य तुष्यति । शक्यते द्रष्टुमार्जितुमार्जितस्य रक्षणमशक्यमित्युपरम्य परितुष्यति । सातिशयत्वादिदोषदर्शनेनोपरम्यापरस्तुष्यति । विषयाः सुतरामेवाभिलाषं जनयन्ति, न च तद्भोगाभ्यासे तृप्तिरुपजायते ॥ न जातु कामः कामानामुपभोगेन शाम्यति । हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते ॥ तस्मादलमनेन पुनः पुनरसन्तोषकारणेनोपभोगेनेत्येवं सङ्गदोष-

* रमाः पञ्च ॥

दर्शनादुपरम्य कश्चि तुष्यति । तान्युपहृत्य भूतान्युपोगः[1] सम्भवति[2] । भूतोपघातभोगाच्चाधर्मः[3] । अधर्मान्नरकादिप्राप्तिरिति । हिंसा-दोषदर्शनात्कश्चिदुपरम्य तुष्यति । प्रकृत्युपादानकालभाग्याश्चतस्रः । विषयाणामार्जनरक्षणविषयदोषसङ्गहिंसादोषात्पञ्च तुष्ट्य इति नव तुष्टयो व्याख्याताः। सिद्धयोऽभिधीयन्ते ॥ ऊहः शब्दोऽध्ययनमिति तिस्रः सिद्धयः । दुःखविघातास्तिस्रः । सुहृत्प्राप्तिर्दानमिति सिद्धिद्वयम् । ऊहस्तत्वं जिज्ञासमानस्योपदेशमन्तरेण जन्मान्तर-संस्कारवशात् प्रकृत्यादिविषयं ज्ञानमुत्पद्यते सेयमूहो नाम प्रथमा सिद्धिः । शब्दो नामाभ्यासमन्तरेण श्रवणमात्राद्यज्ज्ञानमुत्पद्यते सा द्वितीया सिद्धिः ॥ अध्ययनं नाम शास्त्राभ्यासाद्यज्ज्ञानमुत्पद्यते सा तृतीया सिद्धिः ॥ आध्यात्मिकस्याऽऽधिभौतिकस्याऽऽधिदैविकस्य त्रिविधदुःखस्य व्युदासाच्छीतोष्णादिजन्यदुःखसहिष्णोस्तितिक्षोर्य-ज्ज्ञानमुत्पद्यते तस्याऽऽध्यात्मिकादिभेदात्सिद्धेस्त्रैविध्यम् । सुहृदं प्राप्य या सिद्धिर्ज्ञानस्य सा सुहृत्प्राप्तिर्नाम सिद्धिः । आचार्यहित-वस्तुप्रदानेन या सिद्धिर्विद्यायाः सा दानं नाम सिद्धिः । एव-मष्टविधा सिद्धिर्व्याख्याता । एवं विपर्ययाशक्तितुष्टिसिद्ध्याख्याः पञ्चाशत्प्रत्ययभेदा व्याख्याताः । एवं **ब्राह्मपुराणे** कल्पोपनि-षद्व्याख्यानप्रदेशे षष्टितमाध्याये पञ्चाशत्प्रत्ययभेदाः प्रतिपादिताः । अथवा पञ्चाशच्छक्तिरूपिण इति परस्य याः शक्तयः पुराणे स्वरूपत्वे-नाभिमताः पञ्चाशच्छक्तय अरा इव यस्य तं शताधारम् । विंशति-प्रत्यराभिः विंशतिप्रत्यरा दशेन्द्रियाणि तेषां च विषयाः शब्दस्पर्श-

1. गोगाः 2. सम्भवन्ति 3. भूतोपहननाच्चाधर्मः ॥

रूपरसगन्धवचनादानविहरणोत्सर्गानन्दाः । पूर्वोक्तानामराणां प्रत्यरा ये प्रतिविधीयन्ते कीलका अराणां दाढर्च्याय ते प्रत्यरा इत्युच्यन्ते तैः प्रत्यरैर्युक्तमष्टकैः षड्भिर्युक्तमिति योजनीयम् ॥

भूमिरापोऽनिलो वायुः खं मनोबुद्धिरेव च ।
अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा ॥

इति प्रकृत्यष्टकम् । त्वक्चर्ममांसरुधिरमेदोऽस्थिमज्जाशुक्राणि धात्वष्टकम् । अणिमाद्यैश्वर्याष्टकम् । धर्मज्ञानवैराग्यैश्वर्याधर्माज्ञानावैराग्यानैश्वर्याख्यभावाष्टकम् । ब्रह्मप्रजापतिदेवगन्धर्वयक्षराक्षसपितृपिशाचा देवाष्टकम् ॥ अष्टावात्मगुणा ज्ञेयाः । दया सर्वभूतेषु क्षान्तिरनसूया शौचमनायासो मङ्गलमकार्पण्यमस्पृहेति गुणाष्टकं षष्ठम् । एतैः षड्भिर्युक्तम् । विश्वरूपैकपाशं स्वर्गपुत्राद्यादिविषयभेदाद्विश्वरूपं विश्वरूपो नानारूप एकः कामाख्यः पाशोऽस्येति विश्वरूपैकपाशम् । धर्माधर्मज्ञानमार्गभेदा अस्येति त्रिमार्गभेदम् । द्वयोः पुण्यपापयोर्निमित्तैकमोहो देहेन्द्रियमनोबुद्धिजात्यादिष्वनात्मस्वात्माभिमानोऽस्येति द्विनिमित्तैकमोहम् इति ॥

'देवस्यैष महिमा तु लोके येनेदं भ्राम्यते ब्रह्मचक्रमि'ति श्रुतिः ॥

५६०. ब्रह्मानन्दाय —

ब्रह्मरूप आनन्दो ब्रह्मानन्दः । आनन्दं ब्रह्म मां ज्ञात्वा न बिभेति कुतश्चनेति पाद्मे ॥

'आनन्दं ब्रह्मणो विद्वानि'ति श्रुतिः ।

५६१. महते –

महान् परिपूर्णः ॥

'महान्प्रभुर्वै पुरुषत्वस्यैष प्रवर्तक' इति श्रुतिः ।

५६२. ब्रह्मण्याय –

'ब्रह्मस्वरूपाणां ज्ञानिनां हितकारी ब्रह्मण्यः ॥

'तस्यैष आत्मा(वि)वृणुते तनूं स्वामि'ति श्रुतिः ।

ज्ञात्वात्मैव मे मतमिति भगवद्वचनाच्च ॥

यद्वा ब्राह्मणानां हितकरो ब्रह्मण्यः । साजात्यात् ।

' त्वं देवेषु ब्राह्मण ' इति श्रुतिः ॥

५६३. भूरिभारार्तिसंहर्त्रे –

अधिकासह्यदुःखनिवारको भूरिभारार्तिसंहर्ता । देवासुरकृतामृतमथनकाले उत्पन्नं कालकूटविषं ब्रह्मविष्णुलोकपालादिदेवासुरसिद्धऋष्यादीन् प्रत्यधिकार्तिकरं निगृहीतवान् इति **स्कान्दे** प्रसिद्धम् ॥

यद्वा अविद्यासितरागद्वेषाभिनिवेशपुण्यापुण्यमिश्रकर्म गर्भजन्मजरामरणस्थावरनारकदुःखरागद्वेषादिरूपसंसारमोचकः ॥

'ज्ञात्वा देवं मुच्यते सर्वपाशैरि'ति श्रुतिः ॥

५६४. विधिसारथये –

विधिर्ब्रह्मा सारथिः(थी) रथनेता यस्य सः तथा ॥

सारथिं जगतां चैव ब्रह्माणं प्रभुमीश्वरम् ।
आरुरोह रथं दिव्यं रथमण्डनधृक् भवः इति **पुराणे** ॥

'ब्रह्मा भवति सारथिरि'ति श्रुतिः ॥

५६५. हिरण्यगर्भपुत्राणां प्राणसंरक्षणाय –

हिरण्यगर्भस्य ब्रह्मणः पुत्राणामपत्यानां, प्राणानां संरक्षणः हिरण्यगर्भपुत्राणां प्राणसंरक्षणः ॥

लोकोत्तरदिव्यलावण्यसौन्दर्यवतीं गौरीं विवाहकाले उपाध्यायरूपेण विद्यमानं ब्रह्माणं ईषद्दर्शनमात्रेण नन्दितक्षुभित वशीकृतचित्ततया निरोद्धुमशक्यं सत् बहिर्निर्गतं स्ववीर्यं ज्ञात्वा लज्जितं भीतं पादाङ्गुष्ठेन पेषणं कृतवन्तं प्रति सर्वज्ञः कारुणिकः सर्वव्यापी सर्वभूतान्तरात्मा परशिवः पेषणेनानेक ऋषिरूपेण वालखिल्यनामकेन जातं प्रति पुनः पुनः पेषणे यत्नवन्तं "मास्त्विति" उक्तवानिति **शङ्करसंहितायाम्** प्रसिद्धम् ॥

'प्राणेश्वरः कृत्तिवासाः पिनाकी'ति श्रुतिः ॥

५६६. दुर्वाससे –

दुर्निरीक्ष्यं वासो गजसिंहव्याघ्रचर्मादिरूपं यस्य सः तथा ।

'पिनाकहस्तः कृत्तिवासा' इति श्रुतिः ।

यद्वा लोकशिक्षार्थं तपः कुर्वतोऽत्रेः अपत्यरूपेण 'दुर्वास' इति नाम्ना शिव एवांशेन प्रादुर्बभूवेति **पुराणे** प्रसिद्धम् ॥ जाबालोपनिषदि दुर्वास शब्दव्याख्यातृभिस्तस्य शङ्करांशत्वेनैव व्याख्यातत्वात् ॥

५६७. षड्विकाररहिताय –

'जायते–अस्ति वर्धते परिणमतेऽपक्षीयते नश्यति' इति भावविकारषट्करहितः। षड्विकाररहितः ॥

"न जायते म्रियते वापि कश्चि-
न्नायं कुतश्चिन्न बभूव कश्चित्।
अजो नित्यः शाश्वतोऽयं पुराणो
न हन्यते हन्यमाने शरीरे ॥" इति श्रुतिः ॥

५६८. देहार्धकान्ताय –

देहस्य अर्धं वामभागः, कान्तात्मकः यस्य सः देहार्धकान्तः।

भविष्योत्तरपुराणे —

"अर्धं प्रवालरुचिरं हरिनीलमर्धं
नागाजिनाम्बरमतो वरवस्त्रमर्धम्।
कान्ताऽळकार्धमथ दीप्तजटालुमर्धं
दिव्यं महः सततमद्य तवाश्रयेऽहम् ॥ इति ॥

'दरिद्रन्नीललोहित' इति श्रुतिः ॥

५६९. षडूर्मिरहिताय –

अशनायापिपासाशोकमोहजरामृत्यवः षडूर्मयः। जननमरणाद्यात्मकसंसारसमुद्रे ऊर्मिवदनवरतमुत्पद्यमानत्वात् तद्रहितः षडूर्मिरहितः।

'योऽशनायापिपासे शोकम्मोहं जरां मृत्युमत्येती'ति श्रुतिः ॥

५७०. प्रकृत्यै –

जगदुपादानभूतः परमेश्वरः प्रकृतिः ।

अयमर्थः सूत्रकारेण निश्चितः । प्रकृतिश्च प्रतिज्ञा, दृष्टान्तानुपरोधादित्यादिसूत्रपञ्चकेन ॥ विवृतं चेदं भाष्यकारेण संशयपूर्वपक्षप्रदर्शनपूर्वकम् ॥

५७१. भवनाशाय –

भवः संसारः अविद्यातत्कार्यशोकमोहादिकं, तत्त्वमस्यादिवाक्यजन्यवृत्त्यारूढः सन् नाशयतीति भवनाशः ।

'भवस्य हेत्यै जगतां पतये' इति श्रुतिः ॥

५७२. ताम्राय –

अत्यन्तरक्तस्ताम्रः ।

'नमस्ताम्राय चे'ति श्रुतिः ॥

५७३. परमेष्ठिने –

परमे प्रकृष्टे सच्चिदानन्दस्वरूपे तिष्ठतीति परमेष्ठी । दक्षिणामूर्त्यादिस्वरूपेण निरन्तरं स्वरूपानुसन्धातेति यावत् ।

'स परमेष्ठी ब्रह्मात्मे'ति श्रुतिः ॥

५७४. अनेक (अनन्त) कोटिब्रह्माण्डनायकाय –

असङ्ख्यातब्रह्माण्डाधिपतिः अनन्त (अनेक) कोटिब्रह्माण्डनायकः ।

तदुक्तं वासिष्ठे —

"एकस्यानेकसङ्घस्य कस्याणोरम्बुधेरिव ।
अन्तर्ब्रह्माण्डलक्षाणि लीयन्ते बुद्बुदा इव ॥'

इति प्रश्नस्य उत्तरम् —

' अनाख्यत्वादगम्यत्वान्मन:षष्ठेन्द्रियस्थितेः ।
चिन्मात्रमेवमात्माणुराकाशादपि सूक्ष्मतः ॥
चिद्णोः परमस्यान्तः कोटिब्रह्माण्डबुद्बुदाः ।
सम्भूय स्थितिमभ्यस्य लीयन्ते शक्तिपर्ययात् ॥' इति ॥

अस्यायमर्थः — अत्रानाख्यत्वादित्यनेनाभिवदनस्य व्यवहारस्य न विषय इत्युक्तम् । अगम्यत्वान्मनःषष्ठेन्द्रियस्थितिरित्यनेनाभिज्ञा-व्यवहारस्यापि विषय इत्युक्तम् । एवंचिन्मात्ररूप आत्माणुर्य आकाशादपि सूक्ष्मः । एवं भूतपरमचिद्रूपाणोः अन्तः कोऽपि (कोटि) ब्रह्माण्डबुद्बुदा अनुग्राहकचिच्छक्त्या सम्भूय सङ्गम्य स्थितिमभ्येत्य शक्तिपर्ययाच्छक्तिक्षयाद्धेतोर्लीयन्ते इति ॥

'एष लोकाधिपतिरेष लोकपाल एष लोकेश' इति श्रुतिः ॥

५७५. एकाकिने —

एक एव सन् प्रलयकाले वर्तत इत्येकाकी ।

' यदा तमस्तं न दिवा न रात्रि-
र्न सन्नचासत् शिव एव केवल' इति श्रुतिः ॥

५७६. निर्मलाय —

संसारमलान्निर्गत इति निर्मलः ॥

'शुद्धमपापविद्धमि'ति श्रुतिः ॥

५७७. द्रविणाय –

द्रविणं वरिष्ठं धनम् । परमानन्दरूपत्वाद्वरिष्ठधनवत्सर्वैः प्रार्थनीय इत्यर्थः ।

'द्रविणं सवर्चसमि'ति श्रुतिः ।

५७८. दमाय –

दमोऽस्यास्तीति दमः । निगृहीतेन्द्रियग्राम इत्यर्थः । आत्मारामत्वात् ।

'न हि स्वात्मारामं विषयमृगतृष्णा भ्रमयति' इति **शिवरहस्ये** ॥

'नीलकण्ठं प्रशान्तमि'ति श्रुतिः ॥

५७९. त्रिलोचनाय –

त्रीणि सोमसूर्याग्निरूपाणि लोचनानि यस्य स त्रिलोचनः ॥ यद्वा त्रिषु धामसु जाग्रत्स्वप्नसुषुप्त्यवस्थासु विश्वतैजसप्राज्ञभोक्तृरूपेण स्थूलप्रपञ्चवासनामयानन्दभोग्यरूपेण तत्तद्विषयभोगरूपेण च विद्यमानस्य सर्वस्य लोचनस्वरूपः, लोचनवत्प्रकाश(क) इत्यर्थः ॥

'त्रिषु धामसु यद्भोग्यं भोक्ता भोगश्च यद्भवेत् ।
तेभ्यो विलक्षणः साक्षी'ति श्रुतिः ॥

सौरसंहितायाम् —

त्रिमूर्तीनां तु यः कर्ता निस्त्रैगुण्यस्त्रिलोचनः ।
नीलकण्ठो निराधारः शिवः सोमकलाधरः ॥
सृष्टिस्थित्यन्तकार्येषु सर्वेषूपकरोति वै ॥

निस्त्रैगुण्ये परे तत्वे साम्बमूर्त्युपलक्षिते ॥
स्वात्मभूतमतिर्येषां तेषामेव परा गतिः ' इति ॥

'परमेश्वरं प्रभुं त्रिलोचनमि'ति श्रुतिः ।

५८०. शिपिविष्टाय –

विष्णुमूर्तिधारी शिपिविष्टः ।

' विष्णुः शिपिविष्ट ' इति श्रुतेः । अथवा शिपिषु रश्मिषु विष्टः प्रविष्टः इति शिपिविष्टः सूर्यः । तदुक्तं **स्कान्दे** —

'शैत्याच्छयनयोगाच्च शिपि वीरि प्रचक्षते ।
तत्पानाद्रक्षणाच्चापि शिपयो रश्मयो मताः ।
तेषु प्रविष्टः सविता शिपिविष्ट इहोच्यते' इति ॥

तादृशसूर्यरूपत्वाच्छिपिविष्टः ॥ शिपिः पशुः तेषु (?) प्रतितिष्ठति यज्ञरूपेणेति वा शिपिविष्टो यज्ञमूर्तिः ।

'यज्ञो वै विष्णुः पशवः शिपिर्यज्ञ एव पशुषु प्रतितिष्ठतीति' श्रुतिः ॥

यद्वा शिपिः पशवः शिपिरिति श्रुतेः ॥ तेषु पशुषु द्विपत्सु चतुष्पात्सु च सर्वप्राणिष्वन्तर्यामित्वेन प्रविष्ट इति शिपिविष्टः ॥

'नमो गिरिशाय च शिपिविष्टाय चे'ति श्रुतिः ॥

५८१. बन्धवे –

आधारभूते परमेश्वरे सर्वे लोका बध्यन्त इति बन्धुः ॥ बन्धुकृत्यं हिताहितोपदेशं श्रुतिस्मृतिलक्षणं कृतवानिति वा ॥

'स नो बन्धुर्जनिते'ति श्रुतिः ॥

५८२. त्रिविष्टपेश्वराय –

त्रिविष्टपस्य स्वर्गस्य ईश्वर इन्द्रः । तद्रूपत्वात् ॥

'इन्द्रमित्रवरुणमग्निमाहुरि'ति श्रुतिः ॥

यद्वा त्रयाणां विष्टपानां ईश्वरः ॥

'एष लोकेश' इति श्रुतेः ॥

यद्वा तृतीयं विष्टपं भुवनं स्वर्गलोकः पाल्यत्वेन यस्य स त्रिविष्टपः दिवस्पतिः, तेन स्थापितो लिङ्गरूपी ईश्वरस्त्रिविष्टपेश्वरः ।

"शिवधर्मोत्तरे"

शक्रोऽपि देवराजेन्द्रो लिङ्गं मणिमयं शुभम् ।
भक्त्या पूजयते नित्यं तेन शक्रत्वमाप्तवानिति ।

५८४. व्याघ्रेश्वराय –

व्याघ्रेण पूजितो लिङ्गरूपी ईश्वरः व्याघ्रेश्वरः यद्वा भीमो भीमसेनवद् व्याघ्रशब्देन व्याघ्रपादः ऋषिरुच्यते । तेन स्थापित ईश्वरः व्याघ्रेश्वरः ॥

'स्कान्दे' चिदम्बरमहात्म्ये मध्यन्दिन नामको मुनिः । तस्य पुत्रः सुजन्मा । स तु तिल्ववने गत्वा तत्र शिवलिङ्गं प्रतिष्ठाप्य तल्लिङ्गं श्रीमूलस्थानलिङ्गं च पूजितवान् । तं प्रत्याविर्भूतेन शिवेन वरं वृणीष्वेत्युक्तः पुष्पग्रहणार्थं वृक्षारोहणसौकर्याय व्याघ्र-पादवत् स्वस्यपादौ प्रार्थितवान् । तद्दत्तं शिवेन । ततः प्रभृति तस्य व्याघ्रपाद इति नामाभूत् । तत्प्रतिष्ठितलिङ्गस्यापि

व्याघ्रेश्वर इति, तिल्वनस्यापि व्याघ्रपुरमिति च इत्येतत्सर्वं प्रसिद्धम् ।

५८४. विश्वेश्वराय –

विश्वेश्वरः काश्यां लिङ्गरूपी प्रसिद्धः ॥

५८५. दात्रे –

शिवपूजादिपराणां शीघ्रफलदाता ।

'फलं मुक्तिप्रदायिनामि'ति श्रुतिः ॥

५८६. चन्द्रेश्वराय –

(काश्यादिस्थाने) चन्द्रेण स्थापितश्चन्द्रेश्वरः ॥

५८७. व्यासेश्वराय –

काश्यादिस्थाने व्यासेन स्थापितः ।

५८८. युधिने –

युध्युद्धं जयकरमस्यास्तीति युधी ।

यान्प्रति भक्ताः द्वेषं कुर्वन्ति ये च भक्तान् प्रति द्वेषं कुर्वन्ति तान्प्रति निग्राहक इति यावत् ।

'यं द्विष्मो यश्च नो द्वेष्टि तं वो जम्भे दधामि' इति श्रुतिः ॥

५८९. यज्ञकेशाय –

यज्ञो विष्णुः । यज्ञो वै विष्णुरिति श्रुतेः । कः ब्रह्मा ॥

'मारुते वेधसि ब्रध्ने पुंसि कः कं शिरोऽम्बुनोः' इति अमरकोशोक्तेः। तयोरनुग्रहार्थं लिङ्गरूपेण प्रादुर्भूत ईशः यक्केशः।

'स्कान्दे'

माघकृष्णचतुर्दश्यां तयोर्मध्ये महानिशि ।
आत्मानं दर्शयामास लिङ्गरूपी महेश्वरः ॥

तदद्भुतं महद् दृष्ट्वा ब्रह्मविष्णू परस्परम् ।
ऊचतुर्विस्मयाविष्टौ दृष्ट्वा लिङ्गं तदा किल ॥

कृत्वा बहुविधं स्तोत्रं कृताञ्जलिपुटौ स्थितौ ।
हरिकेशस्तदा ताभ्यां भक्त्या परममर्चितः इति ॥

५९०. जैगीषव्येश्वराय –

जैगीषव्यो महायोगी ॥ तस्य महायोगित्वं षडक्षराध्यायव्याख्यानावसरे श्रीविद्यारण्यगुरुभिर्जैगीषव्यकथाख्याप्रदर्शनेन प्रकटीकृतम्। तेन प्रतिष्ठापितः काश्यादौ - जैगीषव्येश्वरः ॥

५९१. दिवोदासेश्वराय –

दिवोदासः प्रतर्दनपिता, श्रुतिप्रसिद्धः काशीराजः। तेन प्रतिष्ठापितो दिवोदासेश्वरः।

'प्रतर्दनो ह वै दैवोदासिरि'ति श्रुतिः ॥

५९२. नागेश्वराय –

नागेन पतञ्जलितक्षकादिना काशीपुण्डरीकपुरकावेरीतीरादिषु लिङ्गरूपेण प्रतिष्ठापितः नागेश्वरः। एवमन्यैर्देवासुरमनुष्यगन्धर्व-

पिशाचादिभिः प्रतिष्ठापितानि लिङ्गानि बहूनि पशुपक्षिमृगादिभिः पूजितानि च काशीखण्डादिषु द्रष्टव्यानि ।

शिवरहस्ये विष्णुः —

"लिङ्गपूजैव कर्तव्या मुमुक्षुभिरहर्निशम् ।
बहवो मोक्षमापन्नाः शिवलिङ्गस्य पूजया ।

देवैर्नरैश्च गन्धर्वैर्मुनिभिश्च मुमुक्षुभिः ।
अप्रमादेन कर्तव्या लिङ्गपूजैव सर्वदे'ति ॥

शिवधर्मोत्तरे –

ब्रह्मा पूजयते नित्यं लिङ्गं शैलमयं शुभम् ।
तस्य सम्पूजनात्तेन प्राप्तं ब्रह्मत्वमुत्तमम् ।

शक्रोऽपि देवराजेन्द्रो लिङ्गं मणिमयं शुभम् ।
भक्त्या रचयते नित्यं तेन शक्रत्वमाप्तवान् ।

इन्द्रनीलमयं लिङ्गं विष्णुः पूजयते सदा ।
विष्णुत्वं प्राप्तवांस्तेन सोऽद्भुतैकं सनातनम् ।

एवं वरुणः कांस्यलिङ्गम् । लिङ्गमन्नमयं पुण्यमग्निस्ताम्रं लिङ्गं दिवाकरः । मुक्ताफलमयं लिङ्गं सोमः, प्रवालमयं पन्नगोत्तमाः । कार्ष्णायसमयं असुरोत्तमाः । त्रपुसीसमयं पिशाचाः । त्रैलोहिकमयं गुह्यकोत्तमाः । बहुलोहमयं मातरः । एवं सर्वे पूजां कृत्वा तत्तत्फलं लब्धवन्तः इति प्रसिद्धम् । त्रिविष्टपेश्वर इत्यादि ईश्वरघटितनामनवकस्य श्रुतिस्तु "तव श्रिये मारुतः" इति पूर्वमुदाहृता ॥

५९३. न्यायाय -

प्रमाणानुग्राहकस्तर्को न्यायः । तदनुगृहीतोपनिषदेकसमधिगम्यत्वाल्लक्षितलक्षणया परमेश्वरोऽपि न्यायः ॥

'तं त्वौपनिषदं पुरुषमि'ति श्रुतेः

यद्वा नीयते प्राप्यते गम्यते ज्ञायतेऽनेनेति वेदान्तो न्यायः । तद्वेद्यत्वाल्लक्षणया परशिवोऽपि न्यायः ॥

'वेदैरनेकैरहमेव वेद्य' इति श्रुतेः ॥

यद्वा नीयते प्राप्यते सर्वैः प्रळयकाले इति न्यायः परमेश्वर एव ।

'यत्प्रयन्त्यभिसंविशन्ती'ति श्रुतिः ॥

५९४. न्यायनिर्वाहकाय -

न्यायस्य मानानुग्राहकतर्कस्य निर्वाहका व्यासजैमिनिप्रभृतयस्तद्रूपत्वान्न्यायनिर्वाहकः । यद्वा नीयते प्राप्यते सुखमनेनेति न्यायो धर्मः । तन्निर्वाहकः । तत्प्रतिपादकश्रुतिकर्तृत्वात् ।

'अस्य महतो भूतस्येत्यादि श्रुतिः ।

५९५. शरण्याय -

शरण्यं परायणं प्राप्यस्थानं, ददातीति शरण्यः ।

'सर्वस्य प्रभुमीशानं सर्वस्य शरणं बृहदि'ति श्रुतिः ॥

५९६. सुपात्राय -

शोभनं पात्रं सुपात्रम् । शोभनपात्रत्वं स्वेनैवोक्तं शिवगीतायाम् ।

'पुष्पं फलं सुमूलं वा पत्रं सलिलमेव वा ।
यो दद्यात्प्रणवेमह्यं तत्कोटिगुणितं भवेदि'ति ॥

यद्वा - शोभनं पात्रं कपिलादिः विद्याप्रदानेन यस्य स सुपात्रः ।

'युगान्तेऽन्तर्हितान्वेदान्सेतिहासान्महर्षयः ।
लेभिरे तपसा पूर्वं अनुज्ञाताःस्वयम्भुवे'ति ।

स्वयम्भूः परशिवः ।

'ऋषिं प्रसूतं कपिलं यस्तमग्रे
ज्ञानैर्बिभर्ति जायमानं च पश्येदि'ति श्रुतिः ॥

अस्यार्थः – ऋषिं कपिलनामक (नामान) साङ्ख्यसूत्रकर्तारं 'साङ्ख्यानां कपिलो देव' इति स्मरणात् ।

अथवा सगरपुत्राणां प्रतप्तवासुदेवांशः ।
कपिलर्षिर्भगवतः सर्वभूतस्य वै किल ।
'विष्णोरंशो जगन्मोहनाशाय समुपागतः' इति स्मरणात् ॥

तं ज्ञानैः धर्मज्ञानवैराग्यैश्वर्यैः बभार । जायमानं च पश्येदपश्यमिति । यद्वा – 'ब्रह्मा देवानां प्रथमःसम्बभूव विश्वस्य कर्ता भुवनस्य गोप्ता । स ब्रह्मविद्यां सर्वविद्यां प्रतिष्ठामथर्वाय ज्येष्ठपुत्राय प्राह । अथर्वणे यां प्रवदेत ब्रह्माऽथर्वा तां पुरोवाचाङ्गिरे ब्रह्मविद्याम् । स भारद्वाजाय सत्यवहाय प्राह भारद्वाजोऽङ्गिरसे परावराम् । शौनको ह वै महाशालोऽङ्गिरसं विधिवदुपपन्नः पप्रच्छेति तत्सम्प्रदायप्रवर्तकः ब्रह्मा । शोभनं विद्यापात्रं यस्य सः तथा ।

'यो ब्रह्माणं विदधाति पूर्वं
यो वै वेदांश्च प्रहिणोति तस्मै' इति श्रुतेः ॥

५९७. कालचक्रप्रवर्तिने –

कालः — निमेषकाष्ठाकलामुहूर्ताहोरात्रपक्षमासर्त्वयनवत्सरयुग-मन्वन्तरकल्पादिः । स एव चक्रवत्पुनःपुनः परिवर्तमानश्च-क्रमित्युच्यते । तस्य प्रवर्तयिता सूर्यरूपेण – कालचक्रप्रवर्ती । कालचक्रप्रणेतारं श्रीसूर्यनारायणं – य एवं वेदेति श्रुतिः ॥

यद्वा - कालः संवत्सरात्मा प्रजापतिः, तस्मिन् कालात्मनि सर्व-मिदं जगदर्पितं स एव कालात्मा चक्रस्वरूपः । अरस्थानीय-षड्तुमत्वात् सन्ततगतिमत्वाच्च स सर्वात्मककालचक्रस्वरूपः ।

'येनेदं भ्राम्यते चक्रमि'ति श्रुतिः ॥

५९८. विचक्षणाय –

विचक्षणो निपुणः, सर्वज्ञ इति यावत् ॥

५९९. दंष्ट्राय –

दंष्ट्रो दंष्ट्रा वा अस्य (अस्ति) सन्तीति द्रंष्ट्रः ।

दंष्ट्राकरालवदनं ज्वलज्ज्वलनमूर्धजम् ।

बिभ्राणं त्रिशिखं दीप्तं ध्यायेद्भुजगभूषणम्' इति **शिवरहस्यम्** ॥

'तं वो जम्भे दधामी'ति श्रुतिः ॥

६००. वेदाश्वाय –

वेदाः ऋग्यजुस्सामाथर्वनामकाः अश्वाः यस्य सः तथा ।

पाद्मे –

"जगतीं तु रथं कृत्वा संयोज्य श्रुतिवाजिनः" इति ॥

अश्वीकृदश्वीकृतवेदराशि-
रस्त्रीकृदस्त्रीकृतदानवारिः ।
नाङ्गीकृताङ्गीकृतशम्बरारिः
पायात्स नो दैवतसार्वभौमः ॥

इति **शिवरहस्ये** प्रथमांशे ॥

'नमो अश्वेभ्योऽश्वपतिभ्यश्च वो नम' इति श्रुतिः ॥

॥ इति षष्ठशतकविवरणम् ॥

---

६०१. नीलजीमूतदेहाय –

(तादृशो) नीलजीमूतो नीलमेघः । तादृशो यस्य सः तथा । नीलमेघश्याम इति यावत् ।

यथोक्तं **ब्रह्माण्डपुराणे** –

भण्डासुरपीडिता ब्रह्मविष्णुरुद्रेन्द्रादयः ऊर्ध्वाण्डभित्तिं बहुप्रयत्नेन भित्वा अण्डाद्बहिर्निर्गतास्तत्र महाकाशरूपेण विद्यमानं पराशक्ति-सहितं परशिवं स्तुवन्तः, तदानीं

"आविर्बभूव भगवान् परशक्त्या निषेवितः ।
कालमेघसमच्छाय कन्धे शूलकपालभृत् ।
द्विभुजश्च त्रिणेत्रश्च स्मयमानमुखाम्बुज" इति ॥

'कृष्णाय पिङ्गलाये'ति श्रुतिः ॥

६०२. परात्मज्योतिषे –

परश्चासावात्मा च परात्मा, तद्रूपं ज्योतिः प्रकाशः परात्मज्योतिः, सच्चिदानन्दपूर्णात्मेत्यर्थः ।

'सच्चिदानन्दपूर्णात्मानं परमात्मनमि'ति श्रुतिः ।

६७३. शरणागतपालाय –

शरणत्वेन आश्रयत्वेनास्माकं रक्षक इति मत्वाऽऽगतानां कालकूटविषादिना भीतानां विष्ण्वादीनां पालकः शरणागतपालकः ॥

'एष भूताधिपतिरेषभूतपाल' इति श्रुतिः ॥

६०४. महाबलपराय –

महद्बलं शारीरं सामर्थ्यं सैन्यरूपं वा येषां ते महाबलाः, इन्द्रोपेन्द्रप्रभृतयः तेषां परः श्रेष्ठः परमेश्वरः ।

तथाहीन्द्रस्य पर्वतभेदनं कृष्णरूपिणो विष्णोर्गोवर्धनधारणं, कमठरूपिणो मन्दरोद्धारणं, वराहरूपिणो भूम्युद्धारणं त्रिविक्रमरूपिणोऽण्डभेदनं एवं वायुहनुमत्प्रभृतीना पर्वतादिचलनानयनादिकं शरीरबलम् । एवमिन्द्रस्य वसुरुद्रादित्यादिगणदेवतानियमितसैन्यबलं विष्णोर्विष्वक्सेनजयविजयादिनियमितं एवं धर्मराजादीनामपि मृत्युचित्रादिनियमितं यथायोग्यं पुराणादिष्ववगन्तव्यम् । एवं बलद्वययुतानामपि विष्णुजिष्ण्वादीनां कालकूटविषत्रिपुरादिकृतार्तिमतामीषत्प्रयत्नेनार्तिनिवारकत्वान्महाबलपरत्वम् ॥

'तमीश्वराणां परमं महेश्वरमि'ति श्रुतिः ॥

६०५. सर्वपापहराय –

सर्वाणि पापानि महापातकातिपातकादीनि हरति स्वनामसहस्र-शतरुद्रीयादिजपकीर्तनपराणामिति सर्वपापहरः ।

स्तेयं कृत्वा गुरुदारांश्च गत्वा,
मद्यं पीत्वा ब्रह्महत्यां च कृत्वा ।
भस्मच्छन्नो भस्मशय्यां शयानो
रुद्राध्यायी मुच्यते सर्वपापैः । इति ॥

अत्र शङ्करः (शङ्खः) रहसि कृतानां महापातकानां शतरुद्रीयं प्रायश्चित्तम् । इति ॥

'नामसङ्कीर्तनादद्य (दस्य) भिद्यते पापपञ्जरमि'ति,

'यः शतरुद्रीयमधीते सोऽग्नि(रिव)पूतोभवति सुरापानात्पूतो भवति ब्रह्महत्यापूतो भवती'ति श्रुतिः

६०६. महानादाय –

महान्तो नादाः शब्दाः तत्वमस्यादि महावाक्यानि प्रति-पादकत्वेन यस्य सः महानादः । वाक्यस्य महत्वं प्रत्यगभिन्न-ब्रह्मप्रतिपादकत्वात् ॥

६०७. कृष्णस्य जयदात्रे –

कृष्णस्य विष्णोरसुरजयार्थं चक्रप्रदातेत्यर्थः ।

तदुक्तमादित्यपुराणे —

देवासुराणां सङ्ग्रामः, असुरैर्देवानां पराभवः। तदनु देवानां विष्णुं प्रति गमनम्। स्तुतिः, असुर निग्रहप्रार्थना च। तदनु शिवलिङ्गप्रतिष्ठापनपूर्वकं भवादिनामसहस्रेण पुण्डरीकैः शिवपूजनम्। तत्रैकस्मिन् पुण्डरीके शिवेन तिरोहिते तत्स्थाने विष्णुना नेत्रार्पणम्। अनन्तरं शिवाविर्भावः। शिवेन चक्रप्रदानं कमलनिभनेत्रप्रदानं चेति ॥

'वरदं वरेण्यमि'ति श्रुतिः ॥

६०८. बिल्वकेशाय –

बिल्वनामकः ईश्वरः बिल्वकेशः गोदावरीतीरे प्रसिद्धः

उक्तं च पुराणे —

गङ्गाद्वारि कुशावर्ते बिल्वके नीलपर्वते।
स्नात्वा कनखले तीर्थे पुनर्जन्म न विद्यते ॥ इति ॥

'तव श्रिया' इति श्रुतिः प्रदर्शिता।

६०९. दिव्यभोगाय –

दिव्या अप्राकृता देवयोग्याः परशिवगौरीसङ्कल्पमात्रनिष्पन्ना शिवरहस्ये तृतीयांशे प्रसिद्धाः, यस्य सः दिव्यभोगः।

'अथ कस्मादुच्यते भगवान् यः सर्वान् भावानीक्षते, सत्यकामः सत्यसङ्कल्प' इत्यादिश्रुतिः ॥

६१०. दूताय –

दूतः परसैन्यवृत्तान्तज्ञानकुशलः सन्देशहराभिरूपी वा ।
यद्वा शिवस्य साक्षाद्दूतत्वं देवीमाहात्म्ये सिद्धम् ॥

'नमो दूताय च प्रहिताय चे'ति श्रुतिः ॥

६११. कोविदाय –

कोविदः सर्वज्ञः ॥

६१२. कामपाशाय –

कामः रागः तत्स्वरूपः पाशः रज्जुविशेषः आयुधस्थानीयो वा यस्य इति वा ।

ब्रह्माद्याः स्थावरान्ताश्च पशवः परिकीर्तिताः ।
तेषां पतित्वाद्विश्वेशो भवः पशुपतिः स्मृतः' इति ॥

मायापाशेन बध्नाति पशूनेतान्सरस्वतीति पुराणे ।

'पशूनां पतय नम' इति श्रुतिः ॥

६१३. चित्राय –

आश्चर्यकरप्रपञ्चचित्तवत्वाच्चित्रः ।

यथोक्तं वासिष्ठे —

'अकर्तृकमरङ्गं च गगने चित्रमुत्थितम् । अदृष्टकं स्वानुभवमि'ति ॥

अस्यार्थः — लोके चित्रं केनचिच्छिल्पिवरेण रञ्जनद्रव्येण कस्मिंश्चिद्भित्तिविशेषे कृतं सत् सर्वैः दृश्यमानं च भवति । इदं तु जगच्चित्रमकर्तृकं परमार्थत ईश्वरेण(।) कृतत्वादत

एवारङ्गं रञ्जनद्रव्यहीनं गगने गगनोपमे अतिसूक्ष्मे निःसङ्गे उत्थितमाविर्भूतमदृष्टकं प्रपञ्चापेक्षया द्रष्टुरन्यस्याभावात् ॥

ननु अनुभूयमानत्वात्कथमिदमित्यत आह स्वानुभवमिति – अध्यस्तप्रपञ्चस्यानुभवात्मन्यध्यासकाल एवानुभूयमानत्वात् सुषुप्ति-समाधिकालादावभावाददोषः ॥

'मायामात्रमिदं द्वैतमद्वैतं परमार्थत' इति श्रुतिः ॥

६१४. चित्राङ्गाय –

ईशानादिपञ्चब्रह्मावयवभूताष्टत्रिंशत्कलात्मकानि शिरःपाण्यादीन्यङ्गानि यस्य स चित्राङ्गः । द्वात्रिंशल्लक्षणयुक्तातिसुन्दराङ्गो वा स्त्रीपुंरूपात्मकत्वाद्वा ॥

'पुरुषं कृष्णपिङ्गलमि'ति श्रुतिः ॥

६१५. मातामहाय –

मातुः पिता मातामहः, चतुर्विधभूतग्रामस्य पार्थिवस्य माता पृथिवी, तस्याः पिता मातामहः ।

'स भूमिमसृजतेति श्रुतिः । पृथिव्या मातृत्वे 'इयं वै माते'ति श्रुतिः ॥

यद्वा चराचरात्मकस्य सर्वस्यापि जगतः जगदङ्कुरावस्थापनं नाम या शक्तिः अव्यक्तशब्दवाच्या मातृस्थानीया, तस्याः कारणं जनकः परमेश्वरः ।

तस्मादव्यक्तमुत्पन्नं त्रिगुणं द्विजसत्तमेति स्मृतिः । तद्धेदं तस्य वा कृतमासीत्तन्नामरूपाभ्यामेव व्याक्रियते इति श्रुतिः ॥

६१६. मातरिश्वने –

मातरि आकाशे श्वयतीति मातरिश्वा वायुः, तद्रूपत्वात्तद्रूपत्वम् । वायुभावापन्नस्य परमेश्वरस्य अग्न्यादि जगत्कारणत्वात् । वायोरग्निरिति श्रुतेः । शिवस्य अष्टमूर्त्यात्मकत्वात् (त्वेन) तदन्तः प्रविष्टत्वात् ॥

"त्वमर्कस्त्वं सोमस्त्वमसि पवनस्त्वं हुतवहः ।
त्वमापस्त्वं व्योमेत्यादि शिवरहस्ये ॥

'स एव विष्णुस्स प्राण' इति श्रुतिः ॥

६१७. निःसङ्गाय –

सङ्गरहितो निःसङ्गः ।

'असङ्गोह्ययं पुरुष' इति श्रुतिः ॥

६१८. सुनेत्राय –

शोभनं नेत्रं सर्वदा सर्ववस्तुविषयप्रकाशनरूपं चैतन्यात्मकं स्वरूपत्वेन यस्य सः सुनेत्रः ॥

'यः सर्वज्ञः स सर्वविदि'ति श्रुतिः ॥

६१९. विद्येशाय –

विद्याः अष्टादशविधाः । ताश्चोक्ताः

'अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः ।
पुराणं धर्मशास्त्रं च विद्या ह्येताश्चतुर्दश ॥'
आयुर्वेदो धनुर्वेदो गान्धर्वश्चेत्यनुक्रमात्
अर्थशास्त्रं ततश्चैता विद्या अष्टादश स्मृताः ।'

इति ॥ तासामीशः विद्येशः ॥

अष्टादशानां विद्यानां एतासां भिन्नवर्त्मनाम् ।
आदिकर्ता रविः साक्षाच्छूलपाणिर्महेश्वरः ॥ इति ॥

यद्वा ब्रह्मविद्यानामिकाया ईशः ॥ श्वेतारण्येश्वरनामकः लिङ्गरूपी श्वेतारण्यवासी पुराणे प्रसिद्धः । यद्वा श्रीकण्ठशिखण्डाद्यागम-प्रसिद्धविद्येशरूपी । अथवा विद्या उमा-(विद्यारूपा) तदुक्तम् –

" विद्यारूपामुमां देवीं महाकारुणिकोत्तमाम् "

इति पुराणे ॥ यद्वा सर्वासां विद्यानां श्रुत्यादीनां तत्प्रतिपादितानां सगुणनिर्गुणानां च ईशः उपदेष्टा गुरुः ॥

* 'ईशानः सर्वविद्यानामि'ति श्रुतिः ॥

---

* " विद्याप्रदं वरद विश्वसिमः कमन्यं
विद्याधिपे भवति विश्वगुरौ प्रतीते ।
सर्वज्ञनामनि समुन्मिषदिन्दुचूडे
सन्ध्यार्धविग्रहसमाकलितात्मविद्ये ॥ "

इति हरदत्तविरचितब्रह्मतर्कस्तवीयः श्लोकोऽप्यत्रानुसन्धेयः ॥

६२०. जयाय –

जयत्यभिभवति रिपूनिति जयः ।

'जेतारमपराजितमि'ति श्रुतिः ॥

६२१. व्याजसम्मर्दनाय –

व्याजस्य कपटस्याविद्यकस्य महामोहात्मकस्य संसारस्य श्रवणमनन-निदिध्यासनजन्यब्रह्मविद्याप्रतिफलितः सन् सम्यङ्मर्दयिता — व्याजसम्मर्दनः ॥

'तमेवं ज्ञात्वा ब्रह्मपाशांश्छिनत्ति' इति श्रुतिः ॥

६२२. मध्यस्थाय –

मध्ये तिष्ठतीति मध्यस्थः । वादिप्रतिवादिनोर्मध्ये स्थित्वा विवादपदनिर्णेता यथा मध्यस्थ एवमीश्वरोऽपि ॥

नन्वीश्वरस्य कथं माध्यस्थ्यम् ? कांश्चिदत्यन्तसुखभाजः करोति देवादीन्, कांश्चिदत्यन्तदुःखभाजः पश्वादीन् कांश्चिन्मध्यमभाजो मनुष्यादीन्, नैष दोषः तत्तत्कर्मानुसारेण करोतीश्वरः ॥

'पुण्यो वै पुण्येन कर्मणा भवति । पापः पापेने'ति श्रुतिः ॥

६२३. अङ्गुष्ठशिरसा लङ्कानाथदर्पहराय –

अङ्गुष्ठशिरसा पादाङ्गुष्ठाग्रेण लङ्कानाथस्य रावणस्य दर्पं गर्वं हरतीति हरः । इदं च रामायणादौ प्रसिद्धम् ।

शिवरहस्ये —

अमुष्य त्वत्सेवासमधिगतसारं भुजवनं
बलात्कैलासेऽपि त्वदधिवसतौ विक्रमयतः ।
अलभ्यापातालेऽप्यलसचलिताङ्गुष्ठशिरसि
प्रतिष्ठा त्वय्यासीद्ध्रुवमुपचितो मुह्यति खल इति ॥

'नमः सहमानाय निव्याधिन' इति श्रुतिः ॥

६२४. वैय्याघ्रपुरवासाय —

व्याघ्रपादो नाम ऋषिः, तत्सम्बन्धिपुरं वैयाघ्रपुरम् । तदेव विराजो हृदयपुण्डरीकस्थानं, तदेव चिदम्बरमिति प्रसिद्धम् । ब्रह्मपुरनामक्षेत्रादुत्तरभागे योजनसमीपे उत्तरकावेर्या उत्तरदिग्भागे तिल्लवनमिति च प्रसिद्धं तस्मिन् श्रीमूलस्थाननायकनामलिङ्गरूपेण भक्तानामानन्दनटनप्रदर्शनार्थं वसतीति वैयाघ्रपुरवासः । एवं विराजः हृदयपुण्डरीके आधिभौतिके व्याघ्रपादपतञ्जलिप्रभृतिभि-स्त्रिसहस्रमुनीश्वरैरन्यैर्हिरण्यवर्मादिभिर्भक्तैश्च सेवित इत्यनेक पुराणादिषु प्रसिद्धम् । स एव परमेश्वरः ॥

" आध्यात्मिके हृत्पुण्डरीके योगिभिः सेव्य " इति श्रुतिषु ॥ अथ यदिदमस्मिन्ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरेऽस्मिन्नन्तरा-काशस्तस्मिन् यदन्तस्तदन्वेष्टव्यं तद्वा विजिज्ञासितव्यमित्येवमादि छान्दोग्यबृहदारण्यतैत्तिरीयककैवल्यादिषु प्रसिद्धम् ॥

६२५. सर्वेश्वराय –

सर्वस्य चेतनाचेतनात्मकस्य जगत ईश्वरो नियन्ता सर्वेश्वरः ॥

स्कान्दे —

'विश्वम्भरावारिशिखिमरुद्व्योमरवीन्दूणून् अधिष्ठाय जगत्सर्वं सृजते ग्रसते नमः ।

त्वं कर्ता सर्वलोकानां भर्ता हर्ता नियामकः ।
भुक्तिदो मुक्तिदस्त्वं च सिद्धिदः सिद्धवन्दितः ॥

'सर्वैश्वर्येण सम्पन्नो नाम्ना सर्वेश्वरः श्रुतः' इति ॥

'एष सर्वेश्वर एष सर्वज्ञ' इति श्रुतिः ॥

६२६. परावरेशाय –

अस्मदाद्यपेक्षया परे विराडादयो यस्मादवरे स परावरः परमेश्वरः । स चासावीशश्च परावरेशः । परे विराडादयोऽपरेऽस्मदादयस्तेषामीश इति वा ॥

'सर्वैश्वर्यसम्पन्नस्सर्वेश्वरश्चेति । 'तस्मिन्दृष्टे परावरे' इति श्रुतिः ॥

६२७. जगत्स्थावरमूर्तये –

जगच्छब्देन जङ्गमाः प्राणिन उच्यन्ते । स्थावरशब्देन वृक्षगुल्मलतादयः । जगद्रूपाः स्थावररूपाश्च मूर्तयो यस्य स जगत्स्थावरमूर्तिः ॥ 'शैवे' विष्णुं प्रति शिवः —

'अहं हि सर्वजन्तूनां आत्मा सर्वत्र संस्थितः ।
अन्तर्बहिश्च भूतानामहमेव न चापरः ।
मया विना हरे चास्ति न किञ्चिदिह विद्यते' ॥ इति

'विग्रहादेव देवस्य विश्वमेतच्चराचर'मिति वान्यत्र ॥

'द्वे वाव ब्रह्मणो रूपे मूर्तं चैवामूर्तं चैवे'ति श्रुतिः ॥

६२८. अनुपमेशाय –

न विद्यते उपमा येषां ते, अनुपमाः, ब्रह्मविष्णुरुद्राः सृष्टिस्थितिसंहारकर्तारः, तेषामीशः अनुपमेशः ।

'तमीश्वराणां परमं महेश्वरमि'ति श्रुतिः ।

'न विद्यते उपमा यस्य सोऽनुपमः, सचासावीशश्चे'ति वा ॥

'न तत्समश्चाभ्यधिकश्च विद्यते' इति श्रुतेः ॥

६२९. शार्ङ्गिणे –

शार्ङ्गं शृङ्गविकारो धनुरस्येति शार्ङ्गी ॥

यद्वा, तपस्यतः कण्वस्य शिरः प्रदेशोद्भूताद्वल्मीकादुत्पन्नेन वेणुना शिवविष्णुसोमानुद्दिश्य ब्रह्मणा प्रणीतेषु त्रिषु चापेषु द्वितीयं धनुः शार्ङ्गम् । यथोक्तमुमामहेश्वरसंवादे —

'युगान्ते (हि) महादेवि कण्वो नाम महामुनिः ।
स हि दिव्यां तपश्चर्यां कर्तुमेवोपचक्रमे'
इत्यारभ्य 'पिनाकं नाम मे चापं शार्ङ्गं नाम हरेर्धनुः ।

'तृतीयमवशेषेण गाण्डीवमभवद्धनुः' ॥ इत्यन्तेन ॥ तद्वान् शार्ङ्गी, तद्रूपी शिवः ॥ तदेवाह—

६३०. विष्णुमूर्तये –

विष्णोर्मूर्तिरेव मूर्तिर्यस्य स विष्णुमूर्तिः । परशिव एव विष्णुरूपेण वर्तते ॥

'स एव विष्णुः स प्राण' इति श्रुतेः ॥

ब्रह्माण्डपुराणे वरदानार्थमागतं शिवं प्रति परशुरामः —

श्रीकण्ठाय जगद्धात्रे लोककर्त्रे नमो नमः ।
रजोगुणात्मने तुभ्यं विश्वसृष्टिविधायिने ।
हिरण्यगर्भरूपाय हराय जगदादये ॥
'नमो विश्वात्मने लोके स्थितिव्यापारकारिणे' इति ॥

६३१. नारायणाय –

नरः आत्मा, ततो जातान्याकाशादीनि नाराणि, तानि कार्याण्ययति कारणात्मना व्याप्नोति, अतश्च तान्यस्यायनमिति नारायणः ।

'नराज्जातानि तत्त्वानि नाराणीति ततो विदुः
तान्येव चायनं तस्य तेन नारायणः स्मृतः'

इति **महाभारते** ॥ अथवा —

नराज्जातानि नाराणि तेषां अयनं लयस्थानम् ॥

'यत्प्रयन्त्यभिसंविशन्ती'ति श्रुतिः ॥

नारायणाय नम इत्ययमेव मन्त्रः
संसारघोरविषसंहरणाय दक्षः ।
शृण्वन्तु भव्यमतयो यतयोऽस्तरागा-
उच्चैस्तराम्युपदिशाम्यहमूर्ध्वबाहुः ॥

इति नरसिंहपुराणे ॥

'नारायणः परं ब्रह्मे'ति श्रुतिः ॥

६३२. रामाय –

नित्यानन्दलक्षणत्वेन योगिनो रमन्त इति रामः । स्वेच्छया रमणीयमुमासहायादिव पर्वहनाद्वा रामः ॥ अथवा रमयत्यानन्दयति सर्वानिति रामः ॥

'एष ह्येवानन्दयाती'ति श्रुतिः ॥

६३३. सुदीप्ताय –

सर्वप्रकाशकत्वेन प्रमाणं विना सर्वदा दीप्त इति सुदीप्तः ॥

'दीप्ताय दीप्तरूपिण' इति श्रुतिः ॥

६३४. ब्रह्माण्डमालाय –

ब्रह्माण्डैरनेकैः पुष्पस्थानीयैः एकेन मालारचनाऽसम्भवा रचिता माला यस्य सः ब्रह्माण्डमाला ॥ अनेन नाम्ना युगपदनेकब्रह्माण्डोत्पादकत्वपालकत्वनियन्तृत्वादिकं सूचितम् ।

'सर्वान् लोकानीशत ईशनीभि'रिति श्रुतिः ॥

६३५. गोधराय –

गावो वाग्रूपाः श्रुतिस्मृतीतिहासपुराणादयस्ताः प्रलयकालेऽपि धरतीति गोधरः ॥

'युगान्तेऽन्तर्हितान्वेदान्सेतिहासान्महर्षयः ।
लेभिरे तपसा पूर्वमनुज्ञाताः स्वयम्भुवे'ति स्मरणात् ॥

यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै' इति श्रुतेः ॥

६३६. वरूथिने –

सारथिगुप्तिस्थानं वरूथः, तद्वान्वरूथी तद्रूपी ।

'नमो वर्मिणे च वरूथिने चे'ति श्रुतिः ॥

६३७. सोमाय –

उमा संविद्रूपा पराशक्तिः तया सह सर्वदा वर्तत इति सोमः ॥

ननु शक्तेर्जडरूपत्वात्कथं संविद्रूपत्वमिति चेदुच्यते–द्विविधा–हि शक्तयः, चिच्छक्तिर्जडशक्तिश्चेति । जडशक्तिर्माया । 'मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरमि'ति श्रुतेः ॥

चिच्छक्तिः परशिवादभिन्नैव, तयोर्भेदस्तु भ्रान्तिः । यथा जीवपरयोः । तथा च, मायावच्छिन्नचैतन्यं शिवः तस्या जगदङ्कुररूपो य आद्यपरिणामः तदवच्छिन्नचैतन्यं चिच्छक्तिरित्युच्यते ।

तदुक्तमागमिकैः —

चिदचिदनुग्रहहेतो-
रस्य सिसृक्षोर्य आद्य उन्मेषः ।
तच्छक्तितत्वमभिहित-
मविभागापन्नमस्यैव' ॥ इति ॥

उक्तं च सूतसंहितायाम् —

चिन्मात्राश्रयमायायाः शक्त्याकारे द्विजोत्तमाः ।
अनुप्रविष्टा या संविन्निर्विकल्पा स्वयंप्रभा ॥
सदाकारा परानन्दा संसारच्छेदकारिणी ।
सा शिवा परमा देवी शिवाभिन्ना शिवङ्करी ।
न शिवेन विना शक्तिर्न शक्तिरहितः शिवः ॥
उमाशङ्करयोरैक्यं यः पश्यति स पश्यति ॥

अथवा, उमाशब्देन भक्तानुग्रहार्थं स्वीकृतलीलाविग्रहा परमकारुणिकी लोकोत्तरसौन्दर्यशालिनी परशिवाऽविनाभूता गौरीदेवी प्रतिपाद्यते । तदुक्तं श्रुत्या — 'सह स्वसाम्बिकया तं जुषस्व भेषजमि'ति तया सह वर्तत इति सोमः ॥

'नमः सोमाय चे'ति श्रुतिः ॥

६३८. कूप्याय -

कूपे जलाधारविशेषे भवो विद्यमानः कूप्यः ।

'नमः कूप्याय चे'ति श्रुतिः ॥

६३९. पातालवासिने –

पाताले पाताललोके रसातलादिनामत्वेन प्रसिद्धे अत्युदारत्वेन प्रसिद्धमहाबल्यादिरूपेण वसतीति पातालवासी –

यद्यद्विभूतिमत्सत्वं श्रीमदूर्जितमेव वा ।
तत्तदेवावगच्छ त्वं मम तेजोंऽशसम्भवम् ॥"

इति भगवद्वचनात् ॥

'नमः श्रुताय च श्रुतसेनाय चे'ति श्रुतिः ॥

६४०. ताराधिनाथाय –

ताराधिनाथो नक्षत्रेशश्चन्द्रमाः तद्रूपी यो वै रुद्रः स भगवान् यश्च सोमस्तस्मै वै नमो नम इति श्रुतिः ॥

यद्वा, तारस्य प्रणवस्याधिनाथस्तत्प्रतिपाद्यत्वादोङ्कारेण परमात्म-प्रतिपादनप्रकारः कथ्यते –

ओङ्कारस्य हि स्वाज्ञानकल्पितभूतभौतिकात्मकप्रपञ्चविशिष्टः प्रत्यग्रूपः शिवो वाच्यार्थः । सर्वदृश्यविनिर्मुक्तः स एव सच्चिदानन्दलक्षणः परशिवः प्रत्यगभिन्नो लक्ष्यार्थः । एवं चाधिकारी एकान्ते स्थित्वा निगृहीतबाह्यान्तःकरणः सङ्क्षालितकामक्रोधादि-मल ओङ्कारमनुसन्धाय तस्य वाच्यार्थं प्रपञ्चविशिष्टमात्मानमपीश्वर-रूपमनुचिन्त्य तस्यैवोङ्कारस्य लक्ष्यार्थं दृश्यप्रपञ्चविनिर्मुक्तं दृग्रूपं केवलप्रत्यगात्मानमपि परशिवस्वरूपमात्मानमनुचिन्त्य तस्मिन्

परशिवरूपे परमात्मनि भूतभौतिकप्रपञ्चं सर्वं दृश्यं प्रविलाप्य परशिवस्वरूपसच्चिदानन्दमात्रमात्मनावतिष्ठत इति ॥

'परं चापरं च ब्रह्म यदोङ्कार' इति श्रुतिः ॥

६४१. वागीशाय –

वाचां लौकिकवैदिकरूपेण विद्यमानानां स्थूलानां वैखरीशब्द-वाच्यानां परा–पश्यन्ती–मध्यमानां सूक्ष्मसूक्ष्मतररूपाणामेत-दात्मकशब्दब्रह्मरूपायाश्च वाच ईशः कारणं सर्वासामपि शब्द-ब्रह्मादीनां वाचां तदधीनत्वात् ॥ उक्तं (च) **स्कान्दे** —

"मातृका च क्रिया (त्रिधा) स्थूला सूक्ष्मा सूक्ष्मतरेति चे"ति ॥ तत्रैवान्यत्र —

परात्परतरादस्माच्छिन्नाच्चैतन्यलक्षणात् ।
स्वशक्तिसहितादेव जगज्ज्योतिर्मयः परः ॥

शब्दसूक्ष्मस्वभावेन प्रादुरासीदखण्डितः ।
स शब्दः पुनराधारे प्राणिनामास्तिकोत्तमाः ।

पिण्डीभूततया भाति तप्तजाम्बूनदप्रभः ।
स पुनर्ब्रह्मनाड्या तु प्रविश्य हृदयाम्बुजम् ।
विभक्तः सूक्ष्मरूपेण भाति वह्निस्वभावतः ॥ इति ॥

अत्र परशब्देन बिन्दुरुच्यते । स एवेश्वरः । तस्मात् — परात्परतरो निष्कलः परशिवः, तस्मात्परशिवात्स्वमायाविशिष्ट-चैतन्यरूपः परो बिन्दुर्जातः ॥

तदुक्तमागमे —

'जगदुत्पत्तिहेत्वर्थं निष्कलात्परमाच्छिवात् ।
समुद्भूतः परस्तस्मा'दिति ॥

परः बिन्दुशब्दाभिधेयः । अचिदंशो बीजं, चिदचिन्मिश्रांशो नादः । चिदंशो बिन्दुरिति त्रिधा विभागसमये सूक्ष्मशब्दो जात इत्याह शब्दसूक्ष्म इति ॥ अखण्डित-इति मूलकारणस्य विभज्यमानस्य बिन्दोः सर्वगतत्वात्त-दात्मतया सर्वत्रानुस्यूत इत्यर्थः ॥ तथा सर्वगतस्यापि वैखरीरूप-शब्दवच्छ्रोत्राऽग्राह्यत्वमेव सूक्ष्मत्वमिन्द्रियागोचरत्वे कथं तदवभास-इत्यत आह स्वभावेन प्रादुरासीदिति । स्वप्रकाशबिन्दुकार्यतया तदात्मकत्वेन स्वयमपि स्वप्रकाशत्वस्वभावेन प्रादुर्भूतः । एष शब्दः अखण्डितः स्वप्रकाशत्वात्, सर्वगतत्वात् जगत्कारण-तादात्म्यात् तत्र शब्दब्रह्मेत्युच्यते । तस्यैव शब्दब्रह्मणः परावाग्रूपम् ॥ लक्षणदशाविशेषलक्षणमाह शब्द इति पिण्डी-भूततयेति । तस्य सर्वगतस्यापि प्राणिनामर्थविवक्षाहेतुप्रयत्नजनित-पवनसम्बन्धनिबन्धना मूलाधारलक्षणप्रदेशविशेषे या अभिव्यक्तिः सा पिण्डीभावः । तयैवाभिव्यक्त्या स्वप्रकाशस्यापि तस्य यो वैशद्यातिशयः स स्वप्रकाशरूपतासाम्याज्जडप्रकाशेन प्रसिद्धेन तप्तजाम्बूनदरूपेणोपमीयते । तप्तेति पिण्डीभावदशोपहितो मूलाधारस्थस्वप्रकाशो निष्पन्दशब्दः परावागित्युच्यते । स एव मूलाधारादानाभि विमर्शरूपेण मनसाऽभिव्यक्तो वैशद्यातिशय-दशापन्नः सामान्यस्पन्दरूपः पश्यन्ती वागित्युच्यते ॥ एते परापश्यन्त्यौ स्वप्रकाशत्वमनोविषयाभ्यां निष्पन्दत्वसामान्यनिष्पन्द-

त्वाभ्यां वा पृथक्त्वेन क्वचिन्निर्दिश्यते । इह तु विशेषस्पन्दन-विरहसाम्येन एकीकृत्य पिण्डीभावजाम्बूनदप्रभाभ्यां विशिष्टैक-रूपतया निर्दिश्यत इति मन्तव्यम् ॥ अनेनैवाभिप्रायेण मातृका च त्रिधा स्थूलेत्यत्र परापश्यन्त्यौ सूक्ष्मतररूपत्वे नैकीकृत्य त्रैविध्य वर्णितमिति तस्यैवेदानीं नाभेर्हृदयं प्राप्तस्य निश्चयात्मिकया बुध्या विषयीकृतस्य विशेषस्पन्दरूपस्य मध्यमावाग्रूपतामाह स पुनर्ब्रह्मेति ॥ ब्रह्मनाड्या सुषुम्नया । विभक्त इति—तत्तदर्थविशेषविषयशब्द-रूपविशेषोल्लेखिन्या बुध्या निश्चित्य कल्पितो विशेषस्पन्दरूप-इत्यर्थः । अनेन मध्यमायाः परापश्यन्तीभ्यां विशेषो वर्णितः । वैखरीतो विशेषमाह सूक्ष्मरूपेणेति ॥ परश्रोत्रग्रहणाऽयोग्यत्वं सूक्ष्मत्वम् । स्वत इति स्वगोचरया निश्चयात्मिकया बुध्येत्यर्थः ॥ वह्निप्रभा इति—पश्यन्तीवाग्रूपादपि वैशद्यातिशयो मध्यमाया वाच-उच्यते । वह्निप्रभा हि बाह्यतमोऽपहरणसमर्था जाम्बूनद-प्रभामतिशेते । वैखरीशब्दस्तु सर्वमनुष्यैरुच्चार्यमाणः सर्वैः प्राणिभिर्ग्राह्यः प्रसिद्ध एव ।

अत्र श्रुतिः – वाक्चातुर्विध्ये —

'चत्वारि वाक्परिमिता पदानि
तानि विदुर्ब्राह्मणा ये मनीषिणः ।
गुहा त्रीणि निहिता नेङ्गयन्ति
तुर्यं (तुरीयं) वाचो मनुष्या वदन्ति ॥' इति ॥

वाच ईश्वराधीनत्वे त्वस्य महतो भूतस्य निश्वसितमेतदृग्वेद इत्यादिका

६४२. सदाचाराय –

सत् ब्रह्मस्वरूपं आचरत्यासमन्ताच्चरत्यवगच्छतीति सदाचारः सच्चिदानन्दस्वरूपं स्वात्मानं सर्वदा अनुसन्दधातीति यावत् । एतच्चिन्मुद्रया परशिवेन स्पष्टीकृतम् । तथा च पराशरः —

“ ज्ञानात्मकस्यामलसत्वराशे-
रपेतदोषस्य सदास्फुटस्य ” इति ॥

स्वात्मतत्वसुखस्फूर्तिप्रमोदाचाण्डवप्रियेति स्कान्दे कथमुच्यते महादेवः ‘ यः सर्वान्भावान्परित्यज्यात्मज्ञानयोगैश्वर्ये महति महीयते ’ इति श्रुतिः ॥

६४३. गौराय –

धवलो गौरः सत्वमूर्तिरिति यावत् ।

शुभासं शुक्ररोचिषमिति श्रुतिः ।

६४४. स्वायुधाय –

शोभनमायुधं त्रिशूलरूपं यस्यासौ स्वायुधः ।

‘नमः स्वायुधाय च सुधन्वने चे’ति श्रुतिः ॥

६४५. अतर्क्याय –

अतर्क्यः स्वबुध्यूहाविषयस्वरूपः ।

‘अणीयान्यतर्क्यमणुप्रमाणमि’ति श्रुतिः ॥

६४६. अप्रमेयाय –

प्रत्यक्षादिप्रमाणागम्यः अप्रमेयः ।

(महाभारते) आरण्यपर्वणि शिवं प्रत्यर्जुनः —

संप्राप्तजन्मसाफल्यः कृतार्थोऽस्मि कृपानिधे ।
अप्रमेयः प्रमाणैस्त्वम् अहो प्रत्यक्षितोऽसि यत् ॥
निष्कलो निर्मलो नित्यो नित्यानन्दो निरञ्जनः ।
निरन्वयो निराधारो निरीहो निर्गुणो मतः ॥
चिद्घनं परमं ब्रह्म परञ्ज्योतिः सनातनः इति ॥

'अप्रमेयमनादिं चे'ति श्रुतिः ॥

६४७. प्रमाणाय –

सर्वावभासकत्वात्प्रमाणम् ।

'सर्वद्रष्टारं सर्वसाक्षिणमि'ति श्रुतिः ॥

६४८. कलिग्रासाय –

कलहनाशकः कलिग्रासः । मुख्यप्राणस्य वागादीनां मुख्यप्राणानां च अहंश्रेष्ठोऽहंश्रेष्ठ इति योऽयं कलहः परस्परमभूत् तस्य प्रजापतिरूपेण निवारक इत्यर्थः । तदुक्तं छान्दोग्ये — 'अथ ह प्राणा अहं श्रेयसि व्यूदिरे अहं श्रेयानस्मीति । ते ह प्राणाः प्रजापतिं पितरमेत्योचुर्भगवन् को नः श्रेष्ठ इति । तान्होवाच यस्मिन्नुत्क्रान्ते शरीरं पापिष्ठतरमिव दृश्यते स वः श्रेष्ठ इति ।

६४९. भक्तानां भुक्तिमुक्तिप्रदायिने –

भक्तानां भोगमोक्षार्थिनां चतुर्विधानां वा भुक्तिमुक्तिप्रदायी ।

वासिष्ठलैङ्गे —

"प्रमाणं वेद एव स्याद्धर्माधर्मे च मय्यपि ।
वर्णाश्रमसमाचारात् पूज्यो देवो न चान्यथा ॥"

"प्रथमायां द्विजः स्नात्वा वाग्यतो भक्तिमान्नरः "

इत्यारभ्य तिथि-वार-नक्षत्रेषु ब्राह्मणानां धनधान्यादि–सन्तर्पणपूर्वकं तत्तद्दिनविशेषेषु शिवपूजाविशेषात् ब्रह्महत्यादिपातकनिवृत्तिपूर्वकमिह-लोके आरोग्यादिसर्वाभीष्टफलप्राप्तिपूर्वकं परलोके नरकादिप्राप्ति-निवृत्तिपूर्वकं स्वर्गादिशिवलोकप्राप्तिपर्यन्तं ज्ञानं चावाप्नोतीति प्रतिपादितम् ।

ब्रह्मकैवर्ते —

भक्त्या यः शिवमर्चयेदनुदिनं लिङ्गे मखानां फलं
दानानां तपसां त्रिविष्टपमहातीर्थाप्लुतीनां फलम् ।
पापान्याशु विनाश्य शङ्करगणश्रेष्ठत्वं समेष्यत्यसौ
विज्ञानात्परिभाव्य मोहमखिलं ज्ञानी परं गच्छति ॥ इति ॥

'एष ह्येव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषत-इत्यन्नादो वसुदान' इति च श्रुतिः ॥

६५०. संसारमोचनाय –

ब्रह्मविद्याविषयभूतः सन् अविद्यातत्कार्यभूतसंसारपाशविमोचकः संसारमोचनः । **स्कान्दे** — शिवं प्रति विष्णुः

जडं हि गम्यतेऽन्येन नाजडं मुनिपुङ्गवाः ।
शिवो नैव जडस्साक्षात्स्वप्रकाशैकलक्षणः ॥ इति ॥

"त्रिषु धामसु यद्भोज्यं भोक्ता भोगश्च यद्भवेत् ।
तेभ्यो विलक्षणस्साक्षी चिन्मात्रोऽहं सदाशिवः' इति श्रुतिः ॥

६५३. सच्चिदानन्दरूपाय -

सत्पदेन कालत्रयाबाध्यं स्वरूपमुच्यते । चित्पदेन प्रकाशान्तर-निरपेक्षतया प्रकाशमानम् । आनन्दपदेन निरतिशयप्रेमास्पदतया सुखरूपं एतत्त्रितयात्मकरूपं स्वरूपं यस्य सः सच्चिदानन्दरूपः ॥

सूतसंहितायाम् —

स शिवस्सच्चिदानन्दस्सोऽन्वेष्टव्यो मुमुक्षुभिः ।
स च जिज्ञासितव्यश्च विना सङ्कोचमास्तिकाः ॥ इति ॥

'यतस्तु जातं सकलं विचित्रं सत्यवत्सुराः'
स सत्यः सत्यसाक्षित्वात् साक्षित्वाच्चित्सुखं तथा ।
प्रेमास्पदत्वादद्वैतं भेदाभावात्सुरर्षभाः इति ॥

एतत्साक्षात्सच्चिदानन्द(स्व)रूपं
भावाभावाशेषलोकस्य हेतु ।
श्रुत्या युक्त्या ब्रह्म जानन्ति मर्त्याः
विद्यायोगादेव मुक्ता भवन्ति ॥ इति च

'ब्रह्मैवेदं सर्वं सच्चिदानन्दरूपं भवति' इति श्रुतिः ॥

एवं निशम्य पुरुषोत्तम आत्मभूतं
अम्बासहायममलेन्दुकलावतंसम् ।
सर्वामरैरखिलयोगिभिरर्चनीयं
संसारमोचक इति प्रतिपद्य भक्त्या ॥

इत्यादि ।

'ज्ञात्वा देवं सर्वपाशापहानिरि'ति श्रुतिः ॥

६५१. वर्णिने –

वर्णी ब्रह्मचारी वर्णित्वं अपर्णायै वरप्रदानसमये शिवस्य प्रसिद्धम् ।

'उत्तमपुरुषाय ब्रह्मचारिणे नमः' इति श्रुतिः ॥

६५२. लिङ्गरूपिणे –

लीनमर्थं गमयतीति लिङ्गम् । तद्रूपी लिङ्गरूपी । अविद्यातिरोहितजडप्रपञ्चस्य गमकत्वं प्रकाशात्मकस्य चैतन्यस्य, तद्रूपी परमेश्वरः इत्यर्थः । तदुक्तं **स्कान्दे** —

सूतः —

अथातस्संप्रवक्ष्यामि शिवलिङ्गं समासतः ।
यस्य विज्ञानमात्रेण विमुक्तो मानवो भवेत् ॥

शिव एव स्वयं लिङ्गं लिङ्गं गमकमेव हि ।
शिवेन गम्यते सर्वं शिवो नान्येन गम्यते ॥

६५४. पापराशिहराय –

पापानां महापातकसमपातकअतिपातकउपपातकादीनां राशिं समूहं स्वभक्तानां स्वविषयज्ञानिनां वा हरतीति पापराशिहरः ।

तदुक्तं **पाद्मे** —

बहुनात्र किमुक्तेन यस्य भक्तिः शिवे दृढा ।
महापापोपपापौघकोटिग्रस्तो विमुच्यते ॥ इति ॥

ब्रह्माण्डपुराणे —

कृतान्यखिलपापानि भूयो जन्मनि जन्मनि ।
मेरुमन्दरतुल्यानि नश्यन्तीशे सुतोषिते ॥ इति ॥

आत्मन्येवात्मानं पश्यति सर्वमात्मानं पश्यति नैनं पाप्मा तरति सर्वं पाप्मानं तरति नैनं पाप्मा तरति सर्वं पाप्मानं तरति विपापो विरज' इति श्रुतिः

६५५. गजारये –

गजस्य गजासुरस्यारिः शत्रुः गजारिः ॥

स्कान्दे —

वाराणस्यां पुरा यातो गजरूपो महाऽसुरः ।
तापसांश्छिन्नभक्तांश्च हन्तुं कोपाग्निदीपितः ॥
तमागतमथालोक्य कालमेघमिवोन्नतम् ।
अविमुक्तगतास्सर्वे प्राणिनश्चुक्रुशुर्भयात् ॥

ततो विश्वेश्वरो देवः करुणारक्षिताश्रयः ।
आस्थाय भैरवाकारं बहुबाह्वायुधोद्धतम् ।
अञ्जनाचलसङ्काशं बालेन्दुद्वयदंष्ट्रकम् ॥
पीतपिङ्गलनेत्राणां त्रयेणातीव भीषणम् ।
नूपुरध्वनियुक्तं च नागाभरणभूषितम् ॥
जग्राह गजमायान्तं महान्तं नादभैरवम् ।
ततो दृष्ट्वा गिरेः पुत्री बिभ्यन्ती पार्श्वतःस्थिता ॥
रक्ष रक्षेति सहसा भाषमाणामनिन्दिताम् ।
ईषदुत्स्मयमानस्तु माभैर्माभैरिति ब्रुवन् ॥
हत्वा तं कुञ्जरं भीममप्रधृष्यं सुरैरपि ।
पादहस्तयुतं चर्म विशस्याच्छिद्रमाततम् ॥
प्रावृत्यात्मानमात्मेशः स्तूयमानोऽखिलैस्सुरैः ॥ इति ॥
'गजचर्मावृततनुं स्फुरत्प्रहरणोज्वलम् ।
सर्वरोगहरं ध्यायेद्देवं कुञ्जरभेदिनम्' इति रहस्यं च ॥

'पिनाकहस्तः कृत्तिवासाः' इति श्रुतिः ॥

६५६. विदेहाय –

देहरहितो विदेहः ।

'सपर्यगाच्छुक्रमकायमव्रणमि'ति श्रुतिः ॥

६५७. त्रिलिङ्गरहिताय –

स्त्रीत्वपुंस्त्वनपुंसकत्वरहितः त्रिलिङ्गरहितः ।

नैव स्त्री न पुमानेष नैव चायं नपुंसकः ।
अमूर्तः पुरुषः पूर्णः दृष्टान्ते हि स जीवनः ॥ इति ॥

'व्यापकोऽलिङ्ग एवे'ति श्रुतिः ॥

६५८. अचिन्त्यशक्तये –

अचिन्त्या चिन्ताऽविषयीभूता शक्तिः चिच्छक्तिः यस्य सः अचिन्त्यशक्तिः ।

यद्वाऽचिन्त्याः चिन्तयितुं अशक्याः इयत्तारहिताः शक्तयो जगत्सर्गादौ सहकारित्वेनापेक्षिता यस्य सः अचिन्त्यशक्तिः ॥

स्कान्दे —

जगत्कारणमापन्नश्शिवो यो मुनिपुङ्गवाः ।
सा तस्यापि भवेच्छक्तिः तया हीनो निरर्थकः ॥
सर्वज्ञत्वं गतो यस्तु शिवस्साक्षादुपाधिना ॥ इत्यादि

सा तस्यापि भवेच्छक्तिरित्यादि —

'अपाणिपादोऽहमचिन्त्यशक्तिः' इति श्रुतिः ॥

६५९. अलङ्घ्यशासनाय –

अलङ्घ्यं लङ्घयितुं अशक्यं शासनं शास्तिः यस्य सः तथा ।

'एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठत एतस्य वा अक्षरस्य प्रशासने गार्गि द्यावापृथिव्यौ इत्यादि' श्रुतिः ।

६६०. अच्युताय —

च्युतिरहितोऽच्युतः ।

श्रीविष्णुपुराणे —

" अनादिमध्यान्तमजरमवृद्धिक्षयमच्युतम् ।
प्रणतोऽस्मि ' .... इति ।।

'शाश्वतं शिवमच्युतमि'ति श्रुतिः ।।

६६१. राजाधिराजाय —

राज्ञां सर्वेषामधिकत्वेन यः स्वामी सोऽयं राजाधिराजः, कुबेरः तद्रूपीत्यर्थः ।।

'राजाधिराजाय प्रसह्येति प्रस्तुत्य कुबेराय वैश्रवणाये'ति श्रुतिः ।

अथवा राज्ञामीश्वरत्वेन प्रसिद्धानां विष्ण्वादीनां अधिराजः ।

पराशरोपपुरणे —

महापापवतां नृणां शिवः सत्यादिलक्षणः ।
परतत्वतया साम्बः स्वप्रभः संविभासते ।
अनेकजन्मसिद्धानां श्रौतस्मार्तानुवर्तिनाम् ।
परतत्वतया साम्बः शिवो भाति सनातनः ।
शिवदृष्टिस्तु सर्वत्र कर्तव्या सर्वजन्तुभिः ।
राजाधिराजः सर्वेषां त्र्यम्बकस्त्रिपुरान्तकः ।।
तस्यैवानुचराः सर्वे ब्रह्मविष्ण्वादयः सुराः ।। इति ।।

'तमीश्वराणां परमं महेश्वरमि'ति श्रुतिः ।।

६६२. चैतन्यविषयाय –

स्वरूपचैतन्येनैव प्रकाशते, न तु वृत्तिविषय इति वृत्तिविषयत्व-निवृत्त्यर्थमेव विषयपदम् ।

स्वप्रकाशकत्वेन जडबुद्धिवृत्तीनामपि प्रकाशकत्वात् ॥

'स्वप्रकाशोऽप्यविषयज्ञानत्वादि'ति श्रुतिः ॥

६६३. शुद्धात्मने –

शुद्धः सत्वादिमलरहितः स चासावात्मा च शुद्धात्मा । देहेन्द्रियादिविलक्षणः ॥ प्रत्यगात्मेत्यर्थः ॥

आत्मा शुद्धः सदा नित्यः
सुखरूपः स्वयंप्रभः ।
अज्ञानान्मलिनो भाति
ज्ञानाच्छुद्धो विभात्ययम् ॥ इति श्रुतिः ॥

६६४. ब्रह्मज्योतिषे –

ब्रह्म वृद्धतमं नित्यं परिपूर्णं सर्वाधिष्ठानं तच्च तज्ज्योतिश्च ब्रह्मज्योतिः । परिपूर्णस्वप्रकाशः इत्यर्थः ।

'पूर्णं तत्स(स्व)त्प्रकाशं परतरममलं ज्योतिरानन्दसान्द्रं
शान्तात्मानो मुनीन्द्राः प्रमुदितमनसः सन्ततं भावयन्ति(न्तु)' इति
" **प्रबोधचन्द्रोदये** " ॥

'ज्योतिर्ज्वलति ब्रह्माहमस्मि' इति श्रुतिः ॥

६६५. स्वस्तिदाय –

भक्तानां स्वस्ति मङ्गलं ददातीति स्वस्तिदः ।

'स्वस्तिदा विशस्पतिरि'ति श्रुतिः ॥

६६६. मयोभुवे –

मयः परममोक्षसुखं भावयतीति मयोभूः ।

'नमः शम्भवे च मयोभवेचे'ति श्रुतिः ॥

६६७. दुर्विज्ञेयसामर्थ्याय –

दुःखेन ज्ञातुं योग्यं सामर्थ्यं शक्तिः यस्य सः दुर्विज्ञेयसामर्थ्यः । एतादृशशक्तिमान् एतावच्छक्तिमांश्चेति देवैरपि दुर्विज्ञेयः परशिवः ॥

स्कान्दे —

चरितानि विचित्राणि गुह्यानि गहनानि च ।
ब्रह्मादीनां च सर्वेषां दुर्विज्ञेयोऽसि शङ्कर ॥ इति ॥

'अपाणिपादोऽहमचिन्त्यशक्तिः' इति श्रुतिः ।

६६८. यज्वने –

मूर्त्यष्टकमध्ये यजमानमूर्तिर्यज्वा । यद्वा चैतन्यात्मकसर्वप्रपञ्चरूपं हविः स्वनिटिलनेत्राहवनीये कालरूपी सन् जुहोतीति ॥

तदुक्तमभियुक्तैः —

'पक्ष्मालीपिङ्गलिम्नः कण इव तटितां यस्य कृत्स्नःसमूहो
यस्मिन् ब्रह्माण्डमीषद्विघटितमुकुले कालयज्वा जुहाव' इति ॥

अथवा महायागयज्वा कर्ता पराशक्तिपत्नीसमेतो महाशम्भुरेव यज्वा। तथाहि **ब्रह्माण्डपुराणे** — उत्तरखण्डे दशमाध्याये हयग्रीवागस्त्यसंवादे देवासुरयक्षगन्धर्वादीनां मनुष्यादीनां च वीर्यं भण्डासुरेण माययाऽपहृते तदनु वीर्यलाभार्थं ते विष्णुं प्रति गत्वा स्तुतिं कृतवन्तः। तैः सह विष्णुर्ब्रह्माण्डभित्तिमनेकयोजनविस्तृतामैरावतादिदन्ताग्रेणातिप्रयत्नेन भेदनं कृत्वा तद्द्वारा अण्डाद्बहिर्महाकाशे गत्वा तत्र विद्यमानं महाशम्भुं स्तुत्वा भण्डासुरनिग्रहं प्रार्थितवन्तः, तेन च "यूयमेव पुरोडाशादिरूपेण स्थिताश्चेदहं यजमानः सन् महायागं करिष्यामि, तदनु युष्माकं वीर्यलाभः भण्डासुरवधश्च भविष्यतीति (उक्तं) तैरप्यङ्गीकृतम्। परशम्भुश्चान्तर्दधे" इत्येतत्सर्वं दशमाध्याये ॥ अथैकादशाध्यायो – लिख्यते –

हयग्रीव महाप्राज्ञ विचित्रं प्रस्तुतं त्वया ॥
महायागो भवेत्कीदृक् किम्फलो जगतां प्रिय ।
विस्तरेण ममाचक्ष्व तत्र मे कौतुकं महत् ।
संश्रूयमाणमपि यत्परानन्दाय कल्पते ॥

हयग्रीवः —

कथयामि महाप्राज्ञ महायोगमहोदयम् ।
पठितं सर्वपापघ्नं श्रुतं सर्वमलापहम् ॥

आवर्तितं तु संसिद्धैः सर्वस्यामूलभाजनम् ।
एकवारं श्रुतं ह्येतन्महायागप्रवर्तनम् ॥
राजसूयसहस्रस्य दत्ते फलमनुत्तमम् ।
श्रीमन्महाशम्भुनाथः प्रविश्याण्डं महत्तरम् ।
स्वयं होताऽभवत्तत्र यज्ञपत्नी पराभवत् ।
ललितायाः महाविद्यां उच्चरन्स्वात्मसंविदम् ।
सप्तस्कन्धमहावायुमयमात्मानमातनोत् ।
पराशक्त्यम्बिका चास्य क्रियाशक्तिः किलाभवत् ।
तया प्रबलया युक्तः श्रीमहाशम्भुनायकः ।
वायुरूपं समास्थाय धुनोति स्म जगत्त्रयम् ।
प्रत्रेपमानं त्रैलोक्यं महाशम्भुनभस्वता ।
विलोक्याज्ञासिषुर्देवाः समारब्धं (धो) महामखं (खः) ।
स महाशम्भुरुत्थाय विधून्वन्भुवनत्रयम् ।
सप्तमं शुद्धजलधिं कुण्डार्थं समशोषयत् ।
शोषिते सप्तमे सिन्धौ शाम्भवानिलधूमिते ।
आपातालगभीराभूदतिदीर्घमहाखनिः ।
तां सागरखनिं देवो होमकुण्डमकल्पयत् ।
समस्तधुद्भिदां जालं चतुर्धा व्यभजत्पुनः ।
उद्भिज्जालचतुर्थांशं राशीकृत्य महाखनौ ।
सिह्मासनमहाविद्यां जपन्हुङ्कारमास्थितः ।
तेन घोरेण हुङ्कारशब्देन ध्वान्तविग्रहः ।
आमूलमाब्रह्मबिलं तस्य जज्वाल चिच्छिखी ।

तं संविदनलं फालक्रोधलोचनकोटरात् ।
ववाम वामदेवोऽयं स च लग्नो महाखनौ ।

अथ सागरकुण्डान्तरुद्भिज्जालसमुद्गतः ।
जज्वाल विततज्वालाजटालः शाम्भवानलः ॥

एवं प्रणीय सद्विद्या पूतमग्निं चिदात्मकम् ।
तारका पुष्पनिकरैः कुण्डमण्डलमार्चयत् ।

तत्राग्नेरष्टधा मूर्तिं सङ्कल्प्याभ्यर्चयच्छिवः ।
षण्मूर्तिमपि चाभ्यर्च्य मध्ये मूर्तित्रयं तथा ।

एवं प्रकारं संस्कारमग्नेः व्यधीत(धित) शम्भुराट् ।
जातवेदाः सप्तजिह्वो हव्यवाहन एव च ।

अश्वोदरश्चतुर्थः स्यादथ वैश्वानरः परः ।
कौमारतेजाः षष्ठश्च विश्वदेवमुखावपि ।

इत्यष्टमूर्तयो वह्नेः अथ मूर्तीश्च षड्ब्रुवे ।
सहस्रार्चिः स्वस्तिपूर्णः उत्तिष्ठपुरुषस्तथा ।

* धूमव्यापी सप्तजिह्वो धनुर्धर इतीह षट् ।
अथ वैश्वानरोत्तिष्ठपुरुषोऽथ तृतीयकः ।

चित्पिङ्गल इति ख्यातास्त्रेधा मूर्तिस्तु शुष्मिणः ।
अथ जिह्वाः सप्तवह्नेः सप्तधाऽभ्यर्चयच्छिवः ।

अथ जिह्वाः संविदग्नेः सप्ताप्यभ्यर्चयच्छिवः ।
हिरण्या कनका रक्ता कृष्णा चैव तु सुप्रभा ।
अतिरक्ता च षष्ठी स्याद्बहुरूपा च सप्तमी ॥

---

* इति मातृकायां नोपलभ्यते ॥

एवं सम्पूज्य जिह्वास्तु क्रमात्संविन्महाशुचेः ।
पुष्कलावर्तकौ दर्वी गृहीत्वा होतुमास्थितः ।

अथ सर्पिस्समुद्रस्य सर्पिरादाय सर्वशः ।
महाजलदर्व्या च जुहावास्मिन्महानले ।

श्रीशम्भुराजहंसेन .... (प्रीत्या) संप्रेरितास्ततः ।
पुष्करा(ला)वर्तकाः सर्वे समुद्रं सकलं पुनः ॥

सहस्रधा लक्षधा च कोटिधा ज्ञानपावके ।
आदायादाय वेगेन जुहुवुः चिन्मये शुचौ ॥

धारा घृतस्य सम्पेतुरेकैकाः पर्वतोपमाः ।
पतन्तीष्वाज्यधारासु प्रजज्वाल हुताशनः ॥

शतयोजनपर्यन्तमूर्ध्वं ज्वाला प्रधाविता ।
उद्भिज्जालचतुर्थांशं पुनः समिधमुत्क्षिपत् (?)

अथेक्षुसारजलधिं पुष्करा(ला)वर्तकस्रुचा ।
आदाय संविदे वह्नावहौषीच्छम्भुनायकः ॥

कल्पान्तवारिद इव प्रतिगर्जन्मुहुर्मुहुः ।
स जज्वाल महावह्निर्योजनत्रिंशतोच्छ्रितः ॥

उद्भिज्जालचतुर्थांशं ततस्समिधमुत्क्षिपत् ।
ततः सुरामहासिन्धुं पुष्करावर्तकस्रुचा ॥

जुहाव तीव्रज्वलने श्रीशाम्भव (श्रीमच्छम्भु) समीरणः ।
तेन मत्त इवात्यर्थं नृत्यन्निव मुहुर्मुहुः ।

चतुःशतं योजनानामूर्ध्वं जज्वाल चिच्छिखी ।
सर्वमप्युद्भिदां जालं समादाय हुताशने ।

लवणाम्बुनिधिस्रोतः समस्तं स्रुच्यधारयत्
जुहाव च ततस्तीव्रे संविदे हव्यवाहने ।

ततश्चटचटाकारो महानासीद्भयङ्करः ।
तेन भण्डादिदैत्यानां चेतांसि प्रचकम्पिरे ॥

अथ क्षीरसमुद्रस्य महाजलददर्शिना ।
गृहीत्वा सकलं शम्भुः अजुहोत्स्वर्णरेतसि ॥

रुद्राट्टहासधवलज्वालस्तेनाज्वलच्छिखी ॥
घोरनिर्घातनिर्भिन्नस्फटिकाचलसन्निभः ।

इत्थं सिन्धुषु सर्वेषु स्थलशैलेषु शाम्भुराट् ।
लोकान् जुहुषुः क्रमशः प्रावर्तत महानले ।

अथ स्वेनैव सत्येन धारयन्मेदिनीमधः ।
वायुरूपः समाजह्रे शेषाद्यान्फणिपुङ्गवान् ।

ते तेन रभसाऽऽकृष्टाः स्फुरत्फणिमणिप्रभाः ।
(फणामणिलसत्प्रभाः ।
द्योतयन्त इवाकाशं बद्धाञ्जलिपुटा मुदा ।

तक्षकार्कोटकमुखाः पेतुस्तस्मिन्हुताशने (महानले) ॥
इत्थं हुत्वा महानागानष्टौ दिक्करिणोऽपि च ।

अजुहोच्छम्भुनाथोऽयं मदकानां कटस्थलान् ।
अव्यथा एव दिङ्नागाः प्रीतान्तःकरणा मुहुः ।

रक्तपद्माकरमिव प्राविशन् हव्यवाहनम् ।
अथ भारतवर्षस्थान् मनुजान् राजभिः सह ॥

भद्राश्वमुख्यवर्षस्थान् अप्यन्यानमितौजसः ।
उत्तरांश्च कुरून् प्राच्यानुदीच्यान्मध्यदेशगान् ॥

नानादेशगतान्मर्त्यान्नानाद्वीपसमावृतान् ।
सर्वानानीय जुहुवांबभूव ज्वलितेऽनले ॥

इत्थं रसातलद्वन्द्वे निःशेषफणिमानुषे ।
ज्योतिश्चक्रगतान्सर्वान् ग्रहराशिसमायुतान् ॥

नक्षत्रतारासंयुक्तान्विश्वनिर्भासकत्विषः ।
तेजःशरीरिणो देवो जुहाव ज्वलितेऽनले ॥

अथ शक्रादयो देवा दिक्पालाश्चाग्निसंयुताः ।
असुराश्चैव गन्धर्वाश्चारणाश्चैव गुह्यकाः ॥

किन्नराः (रौघाः) किंपुरुषाः साध्याः सिद्धाश्च खेचराः ।
देवयोनिप्रभेदाश्च सर्वे सन्तोषशालिनः ॥

सुस्नाताः शुचिवस्त्राश्च नानाभूषणधारिणः ।
बद्धाञ्जलिपुटाः प्रीता हाससम्फुल्लदाननाः ॥

स्वैः स्वैश्च वाहनैः स्वैः स्वैरस्त्रैः स्वैः स्वैः परिच्छदैः ।
भण्डेन दूषितान्यङ्गान्यवमोक्तुं समुद्यताः ॥

अपतन् सांविदे तेन हुताः कल्याणरेतसि ।
आदित्या वसवोऽष्टौ च दस्रौ पितृगणास्तथा ॥

एकादशमहारुद्राश्चन्द्रार्धमकुटोज्ज्वलाः ।
समं निजैः पार्षदैश्च निजैश्च गणनायकैः ॥

अपतञ्छम्भुनाथेन हूयमाना महानले ।
सनन्दसनकाद्यैश्च योगिभिः परमर्षिभिः ॥

भृत्यैश्च विविधैर्युक्तो विष्वक्सेनपुरःसरैः ।
निजैः पञ्चायुधैर्युक्तो, लक्ष्म्या साकमनिन्दया ॥

भूशक्त्या च स्फुरत्कान्त्या सानन्दस्मितमांसलः ।
सर्वैरनुचरैः सार्धं भगवानब्जलोचनः ॥

ज्ञानाग्निमभिनत्यन्तं प्रविवेश जगन्मुदे ।
नन्दिभृङ्गिमहाकालप्रमुखैश्च गणेश्वरैः ॥

आनीलकन्धरश्चन्द्रचूडो गङ्गावतंसभृत् ।
भोगिभूषितसर्वाङ्गो भस्मोद्धूलितविग्रहः ॥

स्वमूलाङ्गस्वरूपेण शम्भुनाथेन दर्शितः ।
प्रविवेश महाज्वालमुज्ज्वलच्छिद्रधुताशनम् ॥

ब्रह्मणा प्रेरिताः सर्वे अपि षट्षष्टिकोटयः ।
अपतन्नप्सरःसङ्घा ज्वलद्रूपे हुताशने ॥

तारकाद्या दुरात्मानो भण्डाद्याश्च महासुराः ।
तत्कर्म तु विनिन्दन्तः प्रमत्ता जोषमास्थिताः ॥

अथ ब्रह्मा स्वसचिवैर्मरीचिप्रमुखैः सह ।
ब्रह्मभिस्तापसेन्द्रैश्च सत्यलोकनिवासिभिः ॥

महर्लोकगतैर्लोकैस्तपोलोकादिसुस्थितैः ।
अन्येष्वपि च लोकेषु वर्तमानैर्महर्षिभिः ॥

सह सन्तुष्टहृदयैर्युक्तः कमलविष्टरः ।
स्मयमानमुखाम्भोजश्चतुर्मुख्या कृतस्तुतिः ॥

सावित्र्या चैव गायत्र्या सरस्वत्या च संयुतः ।
निजवाहनहंसेन तत्प्रसूतैः खगैः समम् ॥

प्रविवेश महाज्वालालङ्घिताशं हुताशनम् ।
एवं प्रकारतः सर्वान्मानसानौद्भिदानपि ॥

जरायुजाण्डजांश्चैव स्वेदजांश्च शरीरिणः ।
जुहाव स महाहोता श्रीमहाशम्भुमान्त्रिकः ॥

अवशिष्टा केवलोर्वी वृक्षाश्चापि च भूधराः ।
अवशिष्टो महायागे होता वातोऽपि शाम्भवः ॥

अन्यत्सर्वं हुतं तस्मिन् महति ज्ञानशुष्मणि ।
दर्शनानि च सर्वाणि विद्याः सर्वाश्च भूमयः ॥

नानाविधानि वाद्यानि मतानि मतशालिना ।
सुहुतानि हुताशेऽस्मिन्नादिशाम्भववायुना ॥

इत्थं शम्भुमहेशेन हुतैः सर्वैश्च वस्तुभिः ।
ऊर्ध्वाण्डभित्तिपर्यन्तं ज्वालाचिद्वपुषो बुधः ॥

स नित्यहोता परमः शम्भुनाथोऽपि चिन्मयः ।
पराशक्त्याऽखिलं हुत्वा स्वाकारं प्रत्यपद्यत ॥

सम्प्रपन्ननिजाकारो वायुरूपं परित्यजन् ।
आजुहाव चिदग्निस्थां कारिकाष्टकपाठतः ॥

विश्वरूपिणि सर्वात्मे(मन्) विश्वभूतैकनायिके ।
ललितापरमेशानि संविद्वह्नेः समुद्भव ॥

आनन्दरूपिणि परे जगदानन्ददायिनि ।
ललितापरमेशानि संविद्वह्नेः समुद्भव ॥

ज्ञातृज्ञानज्ञेयरूपे महाज्ञानप्रकाशिनि ।
ललितापरमेशानि संविद्वह्नेः समुद्भव ॥

लोकसंहाररसिके कालिके भद्रकालिके ।
ललितापरमेशानि संविद्वह्नेः समुद्भव ॥

लोकसन्त्राणरसिके मङ्गले सर्वमङ्गले ।
ललितापरमेशानि संविद्वह्नेः समुद्भव ॥

विश्वसृष्टिपराधीने विश्वनाथे विशङ्कटे ।
ललितापरमेशानि संविद्वह्नेः समुद्भव ॥

संविद्वह्नौ हुताशेषसृष्टिसम्पादिताकृते ।
ललितापरमेशानि संविद्वह्नेः समुद्भव ॥

भण्डाद्यैस्तारकाद्यैश्च पीडितानां सतां मुदे ।
ललितापरमेशानि संविद्वह्नेः समुद्भव ॥

इत्यष्टकारिकापाठं कुर्वाणे शम्भुनायके ।
आविर्बभूव चिद्वह्नेः ललितापरमेश्वरी ॥

चतुर्योजनविस्तारं दशयोजनमुन्नतम् ।
नवपर्वसमायुक्तं सर्वतेजोमयाकृति ॥

चतुर्वेदमहाचक्रं पुरुषार्थमहाहयम् ।
आनन्दध्वजसंयुक्तं तप्तकार्तस्वरोज्ज्वलम् ॥

सर्वाग्रे बिन्दुपीठेन सहितं बिन्दु चारुणा ।
मेरुप्रस्ताररूपाढ्यं चक्रराजरथोत्तमम् ॥

आरूढा ललिता देवी स्वयंप्रथममुद्गता ।
पश्चात्स्रष्टुं समुद्युक्ता पुंरूपं स्वात्मनाऽसृजत् ॥

स्वपुंरूपमयं देवं श्रीकामेश्वरनामकम् ।
तमेव शम्भुनाथ सा सुप्रत्यर्थं पतिमातनोत् ॥

तेनाश्लिष्टा भगवती श्रीकामेश्वरकामिनी ।
वाञ्छामात्रेण चत्वारि महास्त्राण्यम्बिकाऽसृजत् ॥

पाशाङ्कुशेक्षुचापधनुर्बाणायुधलसत्करा ।
उद्यत्सहस्रचण्डांशुप्रतिमानवपुर्द्युतिः ॥

चन्द्रार्धनद्धमकुटा कुचभारेण मन्थरा ।
सदाशोडशवर्षीया स्मयमानमुखाम्बुजा ।

सर्वाभरणशोभाढ्या सर्वसौन्दर्यरूपिणी ।
त्रैलोक्यममृताकारैः स्नापयन्तीव वीक्षणैः ॥

ददृशे शम्भुनाथेन महाहोत्रा महीयसा ।
तेन नानाविधैः स्तोत्रैर्वेदार्थैर्भावगर्भितैः ॥

स्तुता सा ललिता देवी नन्दिता च मुहुर्मुहुः ।
आत्मानं बहुधा कर्तुं स्त्रीपुंरूपव्यवस्थया ॥

ब्रह्मविष्णुमहेशानशक्रादिसुररूपतः ।
प्रचक्रमे भगवती ललितापरमेश्वरी ॥

कामेश्वरेण संयुक्ता परानन्दस्वरूपिणी ।
अथ सोमात्मकाद्वामान्नेत्राद्ब्रह्मा तथा रमा ॥

दक्षिणात्सूर्यरूपाच्च ललिताया विलोचनात् ।
विष्णुश्चैव मृडानी च द्वौ जन्म प्रापतुः शुभम् ॥

अथ रुद्रश्च वाग्देवी ललिताया ललाटजात् ।
वह्निरूपादभजतां सम्भवं कुम्भसम्भव ॥

ब्रह्मलक्ष्म्यौ तटित्कान्ती विष्णुगौर्यौ घनद्युती ।
शर्ववाग्देवते शुभ्रे सौन्दर्यं च परस्परम् ॥

तासां विनिमयं चक्रुः भार्यात्वेन च तेऽखिलाः ।
लक्ष्मीर्विष्णोरभूज्जाया शर्वाणी शर्वभामिनी ॥

सरस्वती ब्रह्मणश्च पत्न्यभूत्कुम्भसम्भव ।
सकलत्रांश्च तान्देवान् प्रणतान् ललिताम्बिका ॥

आदिदेश जगत्स्रष्टुं पातुं हन्तुं तथाज्ञया ।
कुमारा ललितादेव्यास्ते प्राथमिकसम्भवाः ॥

स्वं स्थानं ययुः प्राप्तनवीननिजविग्रहाः ।
सर्वं विश्वं नवमिव प्ररूढानन्दनिर्भरम् ।
ललितापरमैश्वर्याः प्रादुर्भावेन चाभवत् ॥ इति ॥

'आवोराजनमध्वरस्य रुद्रं होतारमि'ति श्रुतिः ।

६६९. चक्रेश्वराय –

चक्रस्य सुदर्शनाख्यस्य ईश्वरो नियन्ता । निर्मातेति यावत् ।

पाद्मे —

चरणाङ्गुष्ठरेखोत्थजलमध्ये सुदर्शनम् ।
गुणावस्थात्रिकालात्मलोकशक्तिक्रियात्मकम् ॥

शिवः कालात्मकं चक्रं दक्षिणाङ्गुष्ठरेखया ।
निर्ममेऽमोघसङ्कल्पः कला(क्षण) काष्ठाकलात्मकम्' ॥ इति

'नमः स्वायुधाय च सुधन्वने चे'ति श्रुतिः ।

६७०. नक्षत्रमालिने –

नक्षत्रादीनां कृत्तिकादीनां उपलक्षणमेतत् । ग्रहादीनां माला, साऽस्यास्तीति नक्षत्रमाली । तथा च **कौर्मे** —

"दिव्यां विशालां ग्रथितां ग्रहैः सार्केन्दुतारकैः ।
मालामप्यद्भुताकारां धारयन्पादलम्बिनीम्" ॥ इति ॥

'दीप्ताय दीप्तरूपिण' इति श्रुतिः ।

यद्वा नक्षत्राणि हस्तादिपञ्चनक्षत्राणि, तेषां माला पङ्क्तिः सा हस्ताद्यवयवत्वेनास्यास्तीति । अत्र श्रुतिः 'यो वै नक्षत्रियं प्रजापतिं वेद । उभयोरेनं लोकयोर्विदुः । हस्त एवास्य हस्तः । चित्रा शिरः । निष्ठ्या हृदयम् । ऊरू विशाखे । प्रतिष्ठानूराधाः । एष वै नक्षत्रियः प्रजापतिः' इति ॥

६७१. **अनर्थनाशनाय** –

अनर्थः प्रतिकूलत्वेन वेदनीयः सांसारिकं दुःखं रजःकार्यं तन्नाशयति तत्त्वमस्यादिमहावाक्यजन्यवृत्त्यारूढः सन् इत्यनर्थनाशनः ।

'निचाय्य तं मृत्युमुखात्प्रमुच्यत इति श्रुतिः ॥

६७२. **भस्मलेपकराय** –

भस्मना उद्धूलनरूपेण त्रिपुण्ड्ररूपेण स्ववपुषि लेपनं करोतीति भस्मलेपकरः ।

पराशरोपपुराणे – चतुर्दशाध्याये —

त्रिपुण्ड्रधारणं तिर्यक् भस्मना चावकुण्ठनम् ।
सुदुर्लभमिति ज्ञात्वा खलु सर्वेश्वरोऽकरोत् ॥

निर्दुःखो निर्मलः साक्षान्नित्यानन्दो निरञ्जनः ।
किमर्थमकरोद्ब्रूहि शिवः साक्षान्निरामयः ।

अनियोज्यः सदा कर्ता सदा भोक्ता महेश्वरः ।
किमर्थमकरोद्ब्रूहि साधकस्योदितं मुदा ॥

तस्मात्सुदुर्लभं नृणामिति ज्ञात्वा महेश्वरः ।
त्रिपुण्ड्रधारणं भस्मकुण्ठनं चाकरोत्सदा ॥
अनिष्पन्नस्यापि कर्तव्यं त्रिपुण्ड्रादेस्तु धारणम् ।
विशेषेण स्वलाभाय नान्यलाभाय सत्तम ॥
स्वलाभमन्तरेणापि पराचारार्थमास्तिकाः ।
निष्पन्नेनापि कर्तव्यं सदा सर्वेश्वरेण तु ॥ इति ॥

'एष ह्येव साधु कर्म कारयतीति' श्रुतिः ।

६७३. **सदानन्दाय** –

कालत्रयाऽबाधितनिरतिशयसुखस्वरूपः सदानन्दः ।

'विज्ञानमानन्दं ब्रह्मे'ति श्रुतिः ।

६७४. **विदुषे** –

विद्वान्विपश्चित्सर्वज्ञ इति यावत् ॥

'न जायते म्रियते वा विपश्चिदि'ति श्रुतिः ॥

६७५. **सगुणाय** –

गुणातीतोऽपि सृष्टिस्थितिसंहारार्थं सत्त्वरजस्तमोगुणवान् सगुणः । **तदुक्तमभियुक्तैः** —

"गुणातीतोऽपीशस्त्रिगुणसचिवस्त्र्यक्षरमय-
स्त्रिमूर्तिर्यः सर्गस्थितिविलयकर्माणि तनुत" इति ॥

"सर्वमेतद्विश्वमधितिष्ठत्येको
गणांश्च सर्वान्विनियोजयेद्यः" इति श्रुतिः ॥

६७६. विरोधिने –

दुष्टदैत्यानामुद्धतानां कामक्रोधादीनां वा विरोधी । शमयिता ॥

नमः सहमानाय निव्याधिन इति श्रुतिः ॥

कल्पान्ते सर्वप्रपञ्चसंहर्ता वा ॥

'तस्मा उपसंहर्त्रे महाग्रासाय वै नमो नमः' इति श्रुतिः ।

अथवा ब्रह्मविद्यारूढः सत्त्वज्ञानतत्कार्यस्वरूपव्यतिरिक्तं सर्वं संहरतीति वा सर्वसंहारसमर्थः ।

'परिभवाऽसहनीय' इति श्रुतिः ॥

६७७. दुर्गमाय –

दुःखेन गम्यते ज्ञायत इति दुर्गमः ।

तद्विषयकज्ञानसाधनस्य श्रवणमननिदिध्यासनरूपस्यातिदुर्घटत्वात् ।

'दुर्गं पथस्तत्कवयो वदन्ति' इति श्रुतिः ॥

६७८. शुभाङ्गाय –

शोभनानि भक्तानां ध्यानविषयार्थं स्वीकृतानि अङ्गानि स्मरण-कथनमात्रेण सर्वापन्निवारणपूर्वकसर्वाभीष्टफलप्रदानानि यस्य स शुभाङ्गः ।

नमः शङ्कराय च मयस्कराय चे'ति श्रुतिः ।

यद्वा सर्वज्ञतादीन्यङ्गानि यस्येति यमनियमासनप्राणायाम-

प्रत्याहारध्यानधारणासमाधिरूपयोगाष्टाङ्गानि स्वज्ञानसाधनत्वेन यस्येति वा ॥

'श्रोतव्यो मन्तव्यो निदिध्यासितव्य' इति श्रुतिः ॥

६७९. मृगव्याधाय –

मृगव्याधो मृगहिंसकः किरातवेषधारीत्यर्थः ।
यथोक्तं भविष्योत्तरपुराणे —

"इत्युच्यमाने नृपनन्दने तदा
किरातरूपी भगवान् महेश्वरः ।
प्रसन्नतामाप तदा किरीटिने
वरं प्रदातुं विजयाय शत्रुषु ॥ इति ॥

पञ्चविंशतिवर्षोऽसौ मयूरकृतशेखरः ।
समावृतो बालकैश्च श्वभिश्चापि मनोहरैः ॥

गच्छद्भिरग्रतो दृप्तैः किरातपुरीश्वरः ॥
एवंरूपो महातेजाः स ध्येयो जगतां गुरुः ॥

इति रहस्यम् ॥

'नमो मृगयुभ्यः श्वनिभ्यश्चे'ति श्रुतिः ॥

६८०. प्रियाय–

परमप्रेमास्पदप्रत्यगात्मरूपत्वात् सर्वेषां प्रियः ।

'प्रेयोऽन्यस्मात्सर्वस्मादि'ति श्रुतिः ॥

६८१. धर्मधाम्ने –

धर्मः स्वीयस्वभावः । धर्माः पुण्ययमन्यायस्वभावाचार-सोमपाः इत्यमरः । स धाम प्रतिष्ठा न तु पृथिव्यादिः यस्य सः धर्मधामा ।

'स भगवः कस्मिन् प्रतिष्ठित इति स्वे महिम्नी'ति श्रुतिः ॥

६८२. प्रयोगाय –

प्रयुज्यते संवर्धने धर्मज्ञानवैराग्यादिषु भक्तोऽनेनेति प्रयोगः ।

'एष ह्येव साधु कर्म कारयती'ति श्रुतिः ॥

६८३. विभागिने –

वर्णाश्रमादिधर्मानुष्ठानवतां फलविभागः परमेश्वराधीनः इति विभागी ।

'अन्नादो वसुदान' इति श्रुतिः ॥

६८४. नाद्याय –

नदीगतजलरूपो नाद्यः ।

'नमो नाद्याय चे'ति श्रुतिः ॥

६८५. अमृतपाय –

स्वात्मानन्दामृतमनुसन्दधानेन सर्वदा पिबति इति अमृतपः ।

'आनन्दरूपममृतं यद्विभाती'ति श्रुतिः ॥

६८६. सोमपाय -

सोमं पिबति सर्वयज्ञेषु यष्टव्यदेवतारूपेणेति सोमपः ।

'आवो राजानमध्वरस्य रुद्रमि'ति श्रुतिः ॥

६८७. तपस्विने -

स्रष्टव्यजगत्पर्यालोचनं तपः तद्वान् तपस्वी ।

'स तपोऽतप्यत । स तपस्तप्त्वा । इदं सर्वमसृजते'ति श्रुतिः ॥

६८८. विचित्रवेषाय -

भक्तानुग्रहार्थं बालवृद्धादिरूपेण अन्यादिरूपेण वा विचित्रवेषः । अथवा चन्द्रशेखर-दाक्षायणीपतिवृषभारूढ ताण्डवाकृति - कल्याणसुन्दर-भिक्षाटन-गजासुरान्तक-कालसंहारि-त्रिपुरारि-जलन्धरवध-वीरभद्र-भैरव-शारभ(शरभ) अर्धनारीश्वर-किरात-कङ्कालधारि-चण्डेशानुग्रहदायी (यि) कालकूटविषादन-विष्णोश्चक्रप्रदायि-विघ्नराजस्य प्रसन्नवरद-सोमास्कन्द-एकपादधर-हरिब्रह्माद्यैः सेव्यमान-सुखासन-दक्षिणामूर्ति-ब्रह्मविष्ण्वोर्मध्यदेशे तयोर्युद्धप्रशान्तये महालिङ्गोद्भवरूपेण पञ्चविंशतिसङ्ख्याका विचित्रवेषा यस्येति ।

'य एको जालवानीशत ईशनीभिः सर्वां लोकानीशत ईशनीभिः । य एवैक उद्भवे सम्भवे चे'ति श्रुतिः ॥

६८९. पुष्टिसंवर्धनाय –

पुष्टयः पूर्वमुक्ताः ।

सुगन्धि पुष्टिवर्धनमि'ति श्रुतिः ॥

६९०. चिरन्तनाय –

कालसङ्ख्यारहितश्चिरन्तनः ।

तथादिमध्यान्तविहीनमेकमि'ति श्रुतिः ॥

६९१. धनुषे –

धनुः पिनाकाख्यं तद्रूपः परमेश्वरः । अथवा शिवोपकरणत्वात्प्राधान्येन धनुष एव नमस्कारः इषुमन्युबाहूनामिव । यथोक्तं श्रीरुद्रे — "नमस्ते रुद्रमन्यव उतोत इषवे नमः । नमस्ते अस्तु धन्वने बाहुभ्यामुत ते नमः ।" इति श्रुतिः ॥ किञ्चायुधानां मध्ये धनुषः प्राधान्यं श्रुत्यादिषु तस्मिन्नादरातिशयस्य दर्शनात् । तथाहि– पिनाकहस्तः कृत्तिवासाः । कृत्तिं वसान आचर पिनाकम् । कृत्तिवासाः पिनाकी । धनुर्गृहीत्वौपनिषदं महास्त्रं, प्रणवो धनुः शरो ह्यात्मा । शिवं बभूव ते धनुः । प्रमुञ्च धन्वनस्त्वम् । अवतत्य धनुस्त्वम् । विज्यं धनुः कपर्दिनः । हस्ते बभूव ते धनुः । बाहुभ्यां तव धन्वने । धन्वाविभ्यश्च । शतधन्वने च । अव धन्वानि तन्मसि, सुत्रन्वन इति मन्त्रदशके ।

'यःस्विषुस्सुधन्वेत्येवमादिषु' श्रुतिः ।

'स कृत्वा धनुरोङ्कारमिति' महाभारते ॥

६९२. वृक्षाणां पतये –

वृक्षा अश्वत्थादयः, तेषां पतिः स्वामी ।

'वृक्षाणां पतये नम' इति श्रुतिः ॥

६९२. निर्मायाय –

मायाया निर्गतो निर्मायः । यद्यपि मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरमिति मायासम्बन्धः श्रुतिषु दृश्यते, तथापि मायायाः कल्पितत्वेन वास्तवसम्बन्धाभावात् कल्पितसम्बन्धपरेयं श्रुतिः । अत एव, व्यक्तात्पुरुषः परः, अक्षरात्परतरः अविद्याकार्यहीनः ।

'अतमस्कममायमि'ति श्रुतिः ॥

६९४. अग्रगण्याय –

अग्रे गण्यत इत्यग्रगण्यः ईश्वरत्वाद्गुरुत्वाच्च ।

'ईशानः सर्वविद्यानामीश्वरः सर्वभूतानामि'ति श्रुतिः ॥

'तमीश्वराणां परमं महेश्वरमि'ति च (श्रुतिः) । स पूर्वेषामपि गुरुः कालेनानवच्छेदादिति योगसूत्रे ।

६९५. व्योमातीताय –

अव्याकृताकाशपरो व्योमातीतः ।

तस्मिन्खल्वाकाशे ओतश्च प्रोतश्चेति प्रश्नस्य व्याकृताधिष्ठानविषयस्य उत्तरम् । एतद्वै तदक्षरे गार्गि — आकाश ओतश्च प्रोतश्चे'ति श्रुतिः ।

६९६. संवत्सराय –

संवसन्त्यस्मिन्भूतानि इति संवत्सरः ।

'कर्माध्यक्षः सर्वभूताधिवास' इति श्रुतिः ॥

६९७. लोप्याय –

लुप्यते तृणादिकमस्मिन्निति लोपः कठिनप्रदेशः । तत्र भवो लोप्यः ।

'नमो लोप्याय चे'ति श्रुतिः ॥

६९८. स्थानदाय –

तिष्ठन्त्यस्मिन्निति स्थानं, ब्रह्मादिपदानि । स्वकीयं परमं पदं च स्थानशब्दार्थः । तद्देवेभ्यो भक्तेभ्यश्च यथार्हं ददातीति स्थानदः । एष ह्येव साधुकर्म कारयति .... अन्नादो वसुदान इति श्रुतिः ॥

६९९. स्थविष्णवे –

सर्वदा वर्तमानः स्थविष्णुः नित्य इति यावत् ।

'अजो नित्यः शाश्वतोऽयं पुराण' इति श्रुतिः ॥

७००. व्यवसायफलान्ताय –

व्यवसायो व्यवसितिः ज्ञानविशेषः निश्चयरूप इति यावत् । तस्य फलं संशयज्ञानानां निवृत्तिः, तथा च यस्य यद्विषयनिश्चयो जायते तस्य तद्विषकार्थिनस्तत्र प्रवृत्तिर्भवति । यथा रज्ज्वर्थिनः

रज्जुनिश्चयसर्पादिभ्रान्तिनिवृत्तौ तत्र प्रवृत्तिः । यथा वा धर्मानुष्ठानार्थिनः धर्मविषयकनिश्चये तत्र प्रवृत्तिः । परशिवविषये तु निश्चये परशिवस्य प्रत्यगभिन्नत्वेन उत्पन्ने अज्ञानादिनिवृत्तिः फलम् । अनन्तरं रज्जुधर्मादिप्रवृत्तिवत् अनुष्ठानापेक्षा नास्तीति ज्ञानफलमेवान्त इति व्यवसायफलान्तो मोक्षरूपः । तदुक्तं **भाष्यकारैः** — अभ्युदयफलं धर्मज्ञानं तच्चानुष्ठानापेक्षम्, निःश्रेयसफलं तु ब्रह्मज्ञानं न चानुष्ठानान्तरापेक्षमिति ।

'ब्रह्म वेद ब्रह्मैव भवती'ति श्रुतिः ॥

॥ इति सप्तमशतकविवरणम् ॥

७०१. **महाकर्तृप्रियाय** —

महाकर्तरि प्रियो महाकर्तृप्रियः । तस्यानुग्राहक इति यावत् ।

ज्ञानवासिष्ठे —

रागद्वेषौ सुखं दुःखं धर्माधर्मौ फलाफले ।
यः करोत्यनपेक्ष्यैव महाकर्ता स उच्यते ॥

यःपुमान् रागद्वेषादीन् कारणत्वेन कार्यत्वेन वाऽपेक्ष्यैव करोति रागादिकं स्वप्रवृत्तौ हेतुत्वेनापि नापेक्षते, प्रयोजनत्वेनापि नापेक्षते स महाकर्तेत्युच्यते ।

मौनवान्निरहम्भावो निर्मानो गतमत्सरः ।
यः करोति गतोद्वेगं महाकर्ता स उच्यते ॥

यः पुमान् मौनवान् इदं करिष्यामीति न वक्ति ।

निरहम्भावः —'अहमे'वास्य कर्तेति 'नाहं' करोतीति ।

निर्मानः —स्वस्मिन् स्वकार्ये वोत्कर्षं न मन्यते ।

गतमत्सरः —परशुभप्रद्वेषरहितः । इत्थंभूतः सन् गतोद्वेगमव्याकुलमेव करोति स महाकर्ता (तेत्युच्यते) इत्युच्यते ।

सर्वत्र विगतस्नेहो यः साक्षिवदवस्थितः ।
निरिच्छो वर्तते कार्ये महाकर्ता स उच्यते ॥

इत्येनेन ब्रह्मपरत्वं सूच्यते । न तु विषयाभिलषितत्वम् ।

'यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा तनूं स्वामि'ति श्रुतिः ॥

७०२. गुणत्रयस्वरूपाय –

गुणत्रयं सत्वरजस्तमांसि कार्यकारणरूपेण विद्यमानानि तदुपाधिकाश्च जीवाः ।

ये शास्त्रविधिमुत्सृज्य यजन्ते श्रद्धयान्विताः ।
तेषां निष्ठा तु का कृष्ण सत्वमाहो रजस्तमः ॥

श्रीभगवानुवाच –

त्रिविधा भवति श्रद्धा देहिनां सा स्वभावजा ।
सात्विकी राजसी चैव तामसी चेव तां शृणु ॥

इत्यादिना प्रतिपादितं स्वरूपं यस्य स गुणत्रयस्वरूपः ।

'सर्वं खल्विदं ब्रह्मे'ति श्रुतिः ॥

७०३. सिद्धस्वरूपिणे —

सिद्धिर्द्विविधा उत्पत्तिर्ज्ञप्तिश्चेति । अत्र सिद्धिशब्देन ज्ञप्तिः ब्रह्मविद्या उच्यते । तद्वान् सिद्धः । ब्रह्मनिष्ठ इति यावत् । तत्स्वरूपी परशिवः । "ज्ञानी त्वात्मैव मे मतमि"ति भगवद्वचनात् ।

यद्वा नित्यसिद्धस्वरूपी, सर्वदा विद्यमानः सर्वदा प्रकाशमानश्चेति यावत् ।

'सिद्धं ब्रह्मे'ति श्रुतिः ॥

७०४. स्वरूपरूपाय –

स्वीयं सदा विद्यमानं सच्चिदानन्दात्मकं रूपं स्वरूपं, तदेव रूपं सर्वदा वर्तमानं, नत्वनृतजडदुःखात्मकं प्रपञ्चरूपं, कालत्रयेऽपि यस्य सः स्वरूपरूपः ।

'स्वात्मस्थमानन्दचिद्घनमि'ति श्रुतिः ॥

७०५. स्वेच्छाय –

स्वा स्वीया इच्छा यस्य सः स्वेच्छः, स्वतन्त्र इति यावत् ।

'शाश्वतोऽजोऽनन्यः स्वतन्त्रः' इति श्रुतिः ॥

७०६. पुरुषाय –

सर्वस्य कार्यप्रपञ्चस्य स्वस्वरूपेण पूरयिता । यद्वा सर्वासु पूर्षु शेत इति पुरुषः ।

ब्रह्मगीतायाम् —

पुरुषो नाम सम्पूर्णः शिवः सत्यादिलक्षणः ।
साम्बमूर्तिधरो देवो नान्यो विष्णुरजोऽपिवेति ॥

गारुडे —

वेदाहमेतं पुरुषं चिद्रूपं तमसःपरम् ।
सोऽहमस्मीति मोक्षाय नान्यःपन्था विमुक्तये ॥ इति ॥

'अव्यक्तात्पुरुषः पर' इति श्रुतिः ॥

७०७. कालात्पराय –

कालः सर्वभूतानां परिणामहेतुस्तस्मात्परः । तस्य कालानवच्छिन्नत्वात्, कालस्यापि कारणत्वाच्च ।

'ज्ञः कालकाल' इति श्रुतिः ॥

७०८. वेद्याय –

निःश्रेयसार्थिभिः वेदनार्हत्वाद्वेद्यः ।

'वेदैरनेकैरहमेव वेद्य' इति श्रुतिः ॥

७०९. ब्रह्माण्डरूपिणे –

ब्रह्माण्डं ब्रह्मणः सम्बन्धि अण्डं, तदाण्डं निरवर्ततेत्यादिश्रुतिप्रसिद्धम् ।

राजत सौवर्ण कपालद्वयात्मकं पक्ष्यण्डावयव—सदृशावयवात्मकं सत्यलोकादिचतुर्दशलोकसहितं मानसादिपञ्चविधसृष्टिसहितं गिरि-

नद्यादिसहितं च पृथिव्याद्यष्टावरणावृतं ब्रह्माण्डरूपं स्वरूपं कार्यत्वेनास्यास्तीति ब्रह्माण्डरूपी ।

'सर्वं खल्विदं ब्रह्मे'ति श्रुतिः ॥

७१०. अनित्यनित्यरूपाय –

अनित्याः ब्रह्माण्डतदन्तवर्तिगिरिनदीसमुद्रचतुर्विधभूतग्रामाद्याः, नित्याः ब्रह्मादि-पिपीलिकान्तवर्तिनः सर्वे आत्मानः अनित्यनित्याः । तदुभयात्मकोऽनित्यनित्यरूपः ।

स्कान्दे —

नमः पिनाकहस्ताय नमः शूलधराय ते ।
नित्याय चैवानित्याय नित्यानित्याय ते नमः ॥ इति ॥

'सोऽहं नित्यानित्यो ब्रह्माहमि'ति श्रुतिः ॥

७११. तदन्तर्वर्तिने —

तेषामनित्यनित्यत्वेनोक्तानामन्तर्यामितया वर्तत इति तदन्तर्वर्ती ।

'यः पृथिव्यां तिष्ठन्निति प्रस्तुत्य यः पृथिवीमन्तरोऽयमयति य आत्मानमन्तरोऽयमयतीत्यादि' श्रुतिः ॥

७१२. तीर्थ्याय —

तीर्थं प्रयागादि तत्र भवस्तीर्थ्यः ।

७१३. कूल्याय —

गङ्गानर्मदागोदावरीकावेर्यादिनदीतीरे प्रतिष्ठापितलिङ्गरूपेणावतिष्ठत इति कूल्यः ।

'नमस्तीर्थ्याय च कूल्याय चे'ति श्रुतिः ॥

७१४. पूर्णाय —

कालतो देशतो वस्तुतः परिच्छेदरहितः पूर्णः ॥

स्कान्दे —

अन्यच्चास्तितया भातं तथा नास्तीति शब्दितम् ।
सर्वं पूर्णं शिवं पश्यन् स्वयं पूर्णःशिवो भवेत् ॥ इति ॥

स्वपूर्णात्मशिवानन्दनिष्ठामासाद्य मानवः ।
तदैव लभते मुक्तिं स्वपूर्णात्मशिवात्मिकाम् ॥ इति ॥

'पूर्णमदः पूर्णमिदं' इति श्रुतिः ॥

७१५. वटवे —

वटुः ब्रह्मचारी तद्रूपः ॥

पाद्मे —

अथास्थाय महादेवः प्रथमाश्रमिणो वपुः ।
प्रगल्भवागमुमायाश्च तपोवनमुपागमत् ॥

आषाढमजिनं मौञ्जीं कौपीनमुपवीतकम् ।
अक्षमालां जटामेकां भस्मधारां च धारयन् ॥

प्रथमाश्रमधर्मं तं मूर्तिमन्तमुपागतम् ।
उमासखीनां चेतांसि विलोक्यास्मिन्नवापतन् ॥ इति ॥

'पुरुषाय ब्रह्मचारिणे नमो नम' इति श्रुतिः ॥

७१६. पञ्चतन्मात्ररूपाय —

अपञ्चीकृतपञ्चमहाभूतानि आकाशादिपृथिव्यन्तानि पञ्चतन्मात्राणि तानि रूपमस्येति (रूपं यस्येति) पञ्चतन्मात्ररूपः ॥

७१७. पञ्चकर्मेन्द्रियात्मने —

पञ्चसङ्ख्याकानि कर्मेन्द्रियाणि वाक्पाणिपादपायूपस्थरूपाणि आत्मा स्वरूपं यस्य सः पञ्चकर्मेन्द्रियात्मा । उपलक्षणमेतत् । ज्ञानेन्द्रियान्तःकरणप्राणानां पञ्चतन्मात्रपदेन पञ्चीकृतपञ्चमहाभूतान्युपलक्ष्यन्ते ।

'विश्वं भूतं भुवनं चित्रं बहुधा जातं जायमानं च यत् । सर्वो ह्येष रुद्र' इति श्रुतिः ॥

७१८. विशृङ्खलाय —

स्वेच्छाव्यवहारो विशृङ्खलः, ब्रह्मपञ्चमशिरश्छेदकालसंहारादिकारणात् ।

७१९. दर्पाय —

दर्पोऽस्यास्तीति दर्पः 'अर्श आद्यच्'प्रत्ययान्तः । स्वात्मामृतरसास्वादेन नित्यमुदितत्वात् दर्पवत्त्वम् ।

'कस्तं मदामदं देवमि'ति श्रुतिः ॥

७२०. विषयात्मने —

शब्दस्पर्शरूपरसगन्धवचनादानगमनविसर्गानन्दादयो विषया:, ते आत्मा स्वरूपं यस्य स: विषयात्मा ॥

७२१. अनवद्याय -

अगर्हणीय: अनवद्य: ।

'निरवद्यं निरञ्जनमि'ति श्रुति: ॥

७२२. शास्त्राय -

ऋग्वेदादि शास्त्रं, तद्रूप: ।

ऋग्यजु:सामाथर्वाङ्गिररसोऽहमि'ति श्रुति: ॥

७२३. स्वतन्त्राय -

सृष्टिस्थितिसंहारेष्वन्याऽनपेक्ष: स्वतन्त्र: ।

'शाश्वतोऽजोऽनन्यस्वतन्त्र' इति श्रुति: ॥

७२४. अमृताय -

अविनाशिस्वभावोऽमृत: ।

तदेव शुक्रं तद्ब्रह्म तदेवामृतमुच्यत' इति श्रुति: ॥

७२५. प्रौढाय -

प्रौढ: प्रकृष्ट: श्रेष्ठ इति यावत् ।

'श्रेष्ठोऽहं वरिष्ठोऽहमि'ति श्रुति: ॥

७२६. **प्रज्ञाय –**

प्रज्ञः प्रत्यक्स्वप्रकाशसाक्षी चिद्रूपः ।
'स एतेन प्रज्ञेनात्मनेति श्रुतिः ॥

७२७. **योगारूढाय –**

युज्यतेऽनेनेति योगः आत्मज्ञानं, तस्मिन्नारूढः सर्वदा ज्ञाननिष्ठ-इत्यर्थः । तदुक्तं **पराशरोपपुराणे** —

स्वात्मभूतपरानन्दपरशक्तिसमन्वितम् ।
पराहन्तानुसन्धानपरमक्रीडयान्वितम् ॥ इति ॥

सूतगीतायाम् —

परमात्मतया रुद्रः स्वात्मानं मनुते भृशम् ।
परतत्त्वप्रकाशेन न तथा देवतान्तरम् ॥ इति ॥

महत्यात्मज्ञानयोगैश्वर्ये यस्तु महीयते ।
सर्वान्भावान् परित्यज्य महादेवस्ततोऽस्म्यहम् ॥ इति ॥

शिवगीतायाम् — अथ कस्मादुच्यते महादेवो,

'यः सर्वान्भावान्परित्यज्यात्मज्ञानयोगैश्वर्ये महति महीयत' इति श्रुतिः ॥

७२८. **मन्त्रज्ञाय –**

मन्त्रालोचनसमर्थो मन्त्रज्ञः । परमेश्वरस्य परशम्भुरूपस्य मन्त्र-ज्ञत्वं **ब्रह्माण्डपुराणे** प्रसिद्धम् ।

तथाहि — भण्डासुरेण ब्रह्मादीनां वीर्ये विनाशिते ब्रह्मविष्ण्वादिभिरण्डाद्बहिर्गत्वा तत्रत्यपराकाशरूपे परशम्भुनाथे स्तुते तस्मिन्प्रसन्ने प्रलयत्रैविध्यकथनपूर्वकं महाप्रलयस्याहं कर्ताऽवान्तरप्रलयस्य विधिः इदानीन्तनयुष्मदीयकामप्रलयस्य ललिताम्बिकैव कर्त्रीति तदुत्पत्तिः सम्पादनीयेति तेनैवोक्ते अनन्तरं देवाः —

कथं तस्या महादेव्याः समुत्पत्तिर्भविष्यति ।
कुतः स्थानात्समुत्पत्तिः केन वा कर्मणा भवेत् ॥

श्रीमहाशम्भुनाऽथैतद्विस्पष्टं प्रतिपादितम् ।
त्वमेव सर्वोपायानां प्रज्ञाता परमेश्वरः ॥

महाशम्भुः —

तत्र कल्पो भवद्भिस्तु तदुत्पादनकर्मणि ।
संश्रोतव्यः प्रयत्नेन सर्वकार्यस्य सिद्धये ।
महायागः प्रकर्तव्यो महाहोमविधानतः ॥ इत्यादिना ॥

'मन्त्रिणे वाणिजाये'ति श्रुतिः ॥

७२९. प्रगल्भाय –

प्रकर्षेण धृष्टा गणा नन्दिभृङ्गिमहाकालप्रभृतयो यस्य सः प्रगल्भः ।

'नमो गणेभ्यो गणपतिभ्यश्चे'ति श्रुतिः ।

७३०. प्रदीपविमलाय –

प्रदीपवद्विमलः स्वच्छः प्रदीपविमलः । स्वयंप्रकाश इति यावत् ।

'दीपोपमेनेह युक्तः प्रपश्येदि'ति श्रुतिः ॥

७३१. विश्वावासाय –

विश्वेषां सर्वेषां भूतानां आवासः अधिष्ठानं तदुत्पन्नत्वात्सर्वेषां भूतानां स परमेश्वरो विश्वावासः ।

कर्माध्यक्षः सर्वभूताधिवास इति श्रुतिः ।

यद्वा विश्वेष्वावासो यस्येति ।

'यः सर्वेषु भूतेषु तिष्ठति' इति श्रुतिः ॥

७३२. दक्षाय –

दक्षोऽभिज्ञः ॥ "दक्षः प्रजापतौ वह्नौ ताम्रचूडे हरे मुनौ । त्रिष्वभिज्ञ" इति **रत्नमालायाम्** ॥

प्रजापतिर्वा दक्षः सोऽनुग्राह्यत्वेनास्यास्तीति मत्वर्थीयप्रत्ययान्तः । अत्र **कौर्मवचनम्** —

"अद्यापि श्रृणु मे दक्ष वचनं सर्वरक्षणम् ।
त्यक्त्वा ते (त्वं) धिषणामेतां मद्भक्तो भव यत्नतः ॥

भविष्यसि गणेशानः कल्पान्तेऽनुग्रहान्मम ।
तावत्तिष्ठ ममादेशात् स्वाधिकारे सुनिर्वृतः ॥" इति ॥

सर्वकर्माणि क्षिप्रं करोतीति वा जगद्रूपेण वर्तमानत्वाद्वा परमेश्वर-एव दक्षः ।

'सर्वं खल्विदं ब्रह्मे'ति श्रुतिः ॥

७३३ वेदनिःश्वसिताय –

वेदा ऋग्वेदादयः निःश्वसितमिव यथाप्रयत्नेन पुरुषनिःश्वासो भवति एवं यस्य स वेदनिःश्वसितः ।

'अस्य महतो भूतस्य निःश्वसितमेवैतदृग्वेद' इत्यादि श्रुतिः ।

७३४. यज्ञाङ्गाय —

यज्ञस्य अङ्गानीव यस्य स यज्ञाङ्गः । वराहमूर्तिः । तदुक्तं हरिवंशे —

वेदपादो यूपदंष्ट्रः क्रतुवक्त्रोऽग्निनीमुखः ।
अग्निजिह्वो दर्भरोमा ब्रह्मशीर्षो महातपाः ॥

अहोरात्रेक्षणो दिव्यो वेदाङ्गः श्रुतिभूषणः ।
आज्यनासो स्रुवस्तुण्डः सामघोषस्वनो महान् ॥

धर्मसत्यमयः श्रीमान् क्रमविक्रमसत्क्रियः ।
प्रायश्चित्तनखोऽघोरः पशुजानुर्महाभुजः ॥

उद्गात्रान्तो होमलिङ्गः फलबीजमहौषधिः ।
वाय्वन्तरात्मा मन्त्रस्फिक् (ङ्)निर्मितः सोमशोणितः ॥

वेदिस्कन्धो हविर्गन्धो हव्यकव्यादिवेगवान् ।
प्राग्वंशकायो द्युतिमान् नानादीक्षाभिरर्चितः ॥

दक्षिणाहृदयो योगी महासत्रमयो महान् ।
उपकर्मेष्टिरुचिरः प्रवर्ग्यावर्तभूषणः ॥

नानाच्छन्दोगतिपदो गुह्योपनिषदासनः ।
छायापत्नीसहायो वै मेरुशृङ्गमिवोच्छ्रितः ॥ इति ॥

तद्रूपी ॥ यद्वा यज्ञस्य सोमयागादेरङ्गानि सोमपश्वादीनि स्वीयत्वेन यस्य ॥ अत्र श्रुतयः —

'इमं पशुं पशुपते तेऽद्य बध्नामी'ति ।

'अयं सोमः कपर्दिन' इति ।

'रौद्रं गवि रौद्रा वै पश्वादयः' इति ॥

अथवा यज्ञस्याङ्गानि अग्निकुण्डपश्वादीनि तानि वा अङ्गानि-यस्य महायागकर्तुर्महाशम्भुनाथस्य यजमानस्य स यज्ञाङ्गः ।

तदुक्तं **ब्रह्माण्डपुराणे** —

"एकाग्निको महायागो होताऽहं वायुरूपधृक् ।
मम चिद्वह्निरेवाग्निः सामान्याग्निस्तु हव्यवाट् ॥

शुष्कसर्वजलः सिन्धुः सप्तमः कुण्ड इष्यते ।
अभिघारः सिन्धुषट्कः पशवः पञ्च सृष्टयः" ॥ इति ॥

विशेषस्तु यज्वनामव्याख्यानावसाने प्रदर्शितः ।

'आवो राजानमध्वरस्य होतारं' इति श्रुतिः ॥

७३५. सुवीराय –

शोभनाः तत्तत्कर्मानुसारेण तत्तत्कार्यकर्तारः । मर्यादामनतिक्रान्ताः वीरभद्रप्रभृतयो गणाः यस्य सुवीरः ।

'गणेभ्यो गणपतिभ्यश्च वो नमः' इति श्रुतिः ॥

७३६. नागचूडाय –

नागो वासुकिः कोटीरबन्धनार्थं चूडायां यस्य स नागचूडः ।

७३७. व्याघ्राय –

व्याघ्रवद्व्याघ्रः, क्रौर्यशौर्यादिमान्, सर्वेषां भीषणः ।

'भीषास्माद्वातः पवते', 'भीषोदेति सूर्यः' इत्यादि श्रुतिः ॥

७३८. बाणहस्ताय –

बाणः अग्निसोमविष्ण्वादिरूपः ।

अग्निमनीकं (मग्निकम्) सोमं शल्यं विष्णुं तेजनमिति श्रुतेः । स हस्ते यस्य स बाणहस्तः । बाणः सामान्यरूपः शरः हस्ते यस्येति वा ।

७३९. स्कन्दाय –

स्कन्दति अमृतरूपेण गच्छति स्रवति इति वा स्कन्दः ।

यथोक्तम् —

गङ्गाधरं विशालाक्षं चन्द्रार्धकृतमस्तकम् ।
सुधासंसक्तसर्वाङ्गं प्लावयन्तं सुधां सदा ॥ इति ॥

अथवा स्कन्दं शुष्कं रेतः इति स्कन्दः । तारकजित् ।
तदुक्तं **आदित्यपुराणे** —

गोपयामास तत्तेजः पिङ्गलं प्रेक्ष्य शङ्करः ।
गोप्यमानं च तत्तस्मिन्नेकसूर्यायुतप्रभम् ॥

वर्षाणां च सहस्रेण कथञ्चित्स्कन्दतां गतम् ।
स्कन्द इत्युच्यते तेन तदाप्रभृति सुव्रताः ॥ इति ॥

अथवा स्कन्दयति शोषयत्यरीन् शूरप्रभृतीनिति ।
'तं (तत्) स्कन्द इत्याचक्षते' इति श्रुतिः ॥ तद्रूपी ।
स्कन्दयति शोषयति वायुरूपेण समुद्रानिति वा ॥
तदुक्तं **ब्रह्माण्डपुराणे** —

सप्तस्कन्धी(ध)महावायुमयमात्मानमातनोत् ।
पराशक्त्यम्बिका चास्य क्रियाशक्तिःकिलाभवत् ॥

तथा प्रबलया युक्तः श्रीमहाशम्भुनायकः ।
वायुरूपं समास्थाय धुनोति स जगत्त्रयमिति ॥

अस्मिन्नर्थे श्रुतिरुक्ता –

७४०. **दक्षिणे** –

दक्षा मुनयः सनकादयः अनुग्राह्यत्वेन (अस्य) सन्तीति दक्षी दक्षिणामूर्तिरूपः ।

'ईशानः सर्वविद्यानामि'ति श्रुतिः ॥

७४१. क्षेत्रज्ञाय –

क्षेत्रं – "महाभूतान्यहङ्कारो बुद्धिरव्यक्तमेव च ।
इन्द्रियाणि दशैकं च पञ्च चेन्द्रियगोचराः ॥

इच्छा द्वेषः सुखं दुःखं सङ्घातश्चेतना धृतिः ।
एतत्क्षेत्रं समासेन सविकारमुदाहृतम् ॥" इति

उक्तप्रकारमनात्मत्वेन जानातीति क्षेत्रज्ञः । **मोक्षधर्मे** —

"क्षेत्राणि च शरीराणि बीजानि च शुभाशुभे ।
तानि वेत्ति स योगात्मा ततःक्षेत्रज्ञ उच्यते ॥

प्रकृतेश्च विकाराणां द्रष्टारमगुणान्वितम् ।
क्षेत्रज्ञमाहुर्जीवं तु कर्तारं गुणसम्भृत"मिति ॥

'क्षेत्रज्ञः सङ्कल्पाध्यवसायाभिमानी लिङ्ग' इति श्रुतिः ॥

७४२. रहस्याय –

रहस्यज्ञानविषयत्वात्परमेश्वरो रहस्यम् ।

रहस्याभयब्रह्मरूपत्वाद्रहस्यमिति वा ।

श्रुतिस्तु — नात्र काचन भिदास्ति....एतद्ब्रह्माभयं वै ब्रह्माभयं हि वै ब्रह्म भवति, य एवं वेदेति रहस्यमिति ॥

७४३. स्वस्थानाय –

स्वं स्वीयं रूपं स्थानं यस्य स स्वस्थानः ।

'स्वे महिम्नी'ति श्रुतिः ॥

७४४. वरीयसे –

अतिशयेन वरः वरीयान् उत्कृष्टः ।

'स एव परो वरीयानि'ति श्रुतिः ॥

७४५. गहनाय –

गगनवद्दुष्प्रवेशत्वाद्गहनः प्राकृतविषयविज्ञानप्रच्छन्नो वा ॥

'तं दुर्दर्शं गूढमनुप्रविष्टमि'ति श्रुतिः ॥

यद्वा अवस्थात्रयविद्यमानभावाभावपदार्थाध्यासाधिष्ठानतया तत्साक्षी ।

"त्रिषु धामसु यद्भोज्यं भोक्ता भोगश्च यद्भवेत् ।
तेभ्यो विलक्षणः साक्षी चिन्मात्रोऽहं सदाशिवः ॥"

इति श्रुतिः ॥

७४६. विरामाय –

विरामोऽवसानं प्राणिनां यस्मिन्निति विरामः । यत्प्रयन्त्यभिसंविशन्तीति श्रुतिः । विरमणं विरामः सविलासाविद्यानिवृत्तिरूपमवसानम् ॥ सोऽस्यास्तीति वा ।

'अविद्याकार्यहीन' इति श्रुतिः ॥

७४७. सिद्धान्ताय –

सर्वद्वैतविनिर्मुक्तं मायाऽविद्यादिशब्दितोपाधिविनिर्मुक्तं परशिवस्वरूप (चैतन्य) मेव सिद्धान्तः ।

सिद्धान्तोऽध्यात्मशास्त्राणां सर्वापह्नव एव हि ।
नाविद्यास्तीह नो माया शान्तं ब्रह्मेदमक्लमम् इति **वासिष्ठे** ॥

'नेह नानास्ति किञ्चनेति अथात आदेशेन नेति नेति' इत्यादि-श्रुतयः ॥

७४८. महीधराय –

महीं गिरिरूपेण (धरति) धरते इति महीधरः ।

"भूतानि शम्भुर्भुवनानि शम्भु-
र्वनानि शम्भुर्गिरयश्च शम्भुरि"ति **स्कान्दे** ॥

यद्वा महायागसमये महाशम्भुर्महावायुरूपेण महीं धत्त इति **ब्रह्माण्डपुराणे** ॥

'अथ स्वेनैव सत्वेन धारयन्नवनीमयः ।
वायुरूपं समाजह्रे शेषाद्यान्फणिपुङ्गवान् ॥' इति ॥

'इत्थं हुत्वा महानागानष्टौ दिक्करिणोऽपि चे'ति ॥

'सहोवाच यदूर्ध्वं गार्गि दिवो यदवाक्पृथिव्या यदन्तरा(रे)द्यावा-पृथिवी इमे यत् । भूतं च भवच्च भविष्यच्चेत्याचक्षत आकाशे तदोतं प्रोतं चे'ति श्रुतिः ॥

७४९. गृह्याय –

जगत्सृष्ट्यादि कारणत्वेन सर्वैर्देवादिभिः सर्वैः प्रत्यक्षादि-प्रमाणैर्गृह्यत इति गृह्यः ॥

'यतो वा इमानि भूतानि जायन्त' इत्यादि श्रुतिः ॥

यद्वा—सुरनरतिर्यगादिभिरात्मत्वेन गृह्यत इति ॥

'तमहं प्रत्ययव्याजात्सर्वे जानन्ति जन्तव' इति स्कान्दे ॥

'या तिर्यङ्नरदेवताभिरहमित्यन्तः स्फुटा गृह्यत' इत्याचार्यैः ॥

'सोऽहमस्मीत्यग्रे व्याहरदि'ति श्रुतिः ॥

७५०. वटवृक्षाय –

वटनामको वृक्ष आवासयोग्यत्वेन यस्यास्ति स वटवृक्षः ।

'वटविटपिसमीपे भूमिभागे निषण्णमि'ति ।

उपासकानां यदुपासनीय-

मुपात्तवासं वटमूलभागे' । इत्याचार्याः ॥

'वृक्षाणां पतये नम' इति श्रुतिः ॥

७५१. ज्ञानदीपाय–

ज्ञानमेव दीपः प्रकाशो यस्य सः ज्ञानदीपः ।

'अत्रायं पुरुषः स्वयञ्ज्योतिरि'ति श्रुतिः ॥

७५२. दुर्गाय –

दुःखेन गन्तुमवगन्तुं योग्यो दुर्गः ।

'दुर्गं पथस्तत्कवयो वदन्तीति' श्रुतिः ॥

७५३. सिद्धान्तैर्निश्चिताय –

सिद्धान्तैः शून्यवादादिसिद्धान्तैर्निश्चितः । संशयादिनिरसन-पूर्वकं सम्यक् ज्ञातः ।

स्वभक्तहृदयाम्भोजकर्णिकामध्यवर्तिने ।
सकलागमसिद्धान्तसाररूपाय ते नमः ॥

इति ब्रह्माण्डपुराणे ॥

अन्यत्र च —

"सौराणां भास्कराकारं ब्रह्म च ब्रह्मवादिनाम् ।
सौगतानां च विज्ञानं महाशम्भुमुपास्महे ॥

लोकायतिकविख्यातानां स्वभावमथविग्रहम् ।
क्षणिकानां क्षयाकारं महाशम्भुमुपास्महे ॥

कारूणां विश्वकर्माणं शैवानां शिवरूपिणम् ।
विष्णुं च पाञ्चरात्राणां महाशम्भुमुपास्महे ॥

अर्थेश्वरं निधिविदां कामेशं कामसूत्रिणाम् ।
वैश्वानरं च वैद्यानां महाशम्भुमुपास्महे ॥

दयावतां धर्मदेवं उग्राणां चण्डदैवतम् ।
कर्मठानामपूर्वाख्यं महाशम्भुमुपास्महे ॥

विप्राणामग्निनिलयं हृत्स्थं योगवतामपि ।
प्रतिमास्थमबुद्धानां महाशम्भुमुपास्महे ॥

सर्वेषामादिभूतं च स्वयमादिविवर्जितम् ।
सर्वान्तं च स्वतो नान्तं महाशम्भुमुपास्महे ।"

इति ज्ञानवासिष्ठेऽपि ॥

"यःसर्वशास्त्रसिद्धान्तो यत्सर्वहृदयानुगम् ।
यत्सर्वं सर्वगं वस्तु यत्तत्त्वं तदसौ स्थित ॥" इति ॥

'सर्वे वेदा यत्पदमामनन्ति तपांसि सर्वाणि च यद्वदन्ति' इत्यादिश्रुतिः ॥

७५४. श्रीमते –

श्रीमान्कान्तिमान् ।

'सस्पिञ्जराय त्विषीमत' इति श्रुतिः ॥

७५५. मुक्तिबीजाय –

मुक्तेः कर्म – अविद्याऽस्मितादिक्लेशतन्मूलभूताज्ञानरूपपाश-मुक्तेर्बीजं कारणं साधकैः सम्यग्ज्ञातः ।

'ज्ञात्वा देवं सर्वपाशापहारिणमि'ति श्रुतिः ॥

७५६. कुशलाय –

सर्वेषामविशेषेण दुःखनिवृत्तिसुखप्राप्तिकरः कुशलः ।

'नमःशङ्कराय च मयस्कराय चे'ति श्रुतिः ।

७५७. विवासिने –

लोकविरुद्धदेशे काले च वासोऽस्यास्तीति विवासी । महाप्रलये ब्रह्मादिपिपीलिकान्तप्राणिरहिते देशे महास्मशाने, तदुपसंहारानन्तर-काले च विद्यमानत्वात् ।

'यदा तमस्तन्न दिवा न रात्रि-
र्न सन्न चासच्छिव एव केवल' इति श्रुतिः ॥

७६८. प्रेरक्षाय —

प्रकर्षेण सर्वेषां प्राणिनां स्थितिकाले शुभाशुभकर्मप्रवर्तनं, तत्कर्मफलभूतस्वर्गनरकादिप्रवर्तनमन्तकालेक्षयश्च स्वकर्तव्यत्वेनास्यास्तीति प्रेरक्षः मत्वर्थीयाच्प्रत्ययः ॥

यद्वा अश्च इश्च ए विष्णुब्रह्माणौ, प्रकृष्टयोर्विष्णुब्रह्मणो रक्षा रक्षणं परस्परं युद्ध समये येन सः प्रेरक्षः ।

स्कान्दे —

"तयोर्युद्धं महद्दिव्यं (तयोर्युद्धमभूद्दिव्यं) अब्दानां च शतं पुरा ।
ब्रह्मणा प्रेरितास्त्रस्य ज्वालाः पेतुः समन्ततः ।
तदस्त्रज्वालया दग्धं त्रैलोक्यमखिलं तथा ।
विष्णुना प्रेरितं चास्त्रं ब्रह्माणं हन्तुमागमत् ।
ज्वालामालासमाक्रान्तौ ब्रह्मविष्णू तदा स्थितौ ।
हिताय सर्वलोकानां ब्रह्मविष्ण्वोश्च यःपिता ।
स शिवः सर्वलोकानां कृपां चक्रे तयोरपि" इति ॥

'एष लोकाधिपतिरेष लोकपाल' इति श्रुतिः ॥

७५९. विशोकाय —

विगतः शोकः यस्येति विशोकः ।

'विशोको विजिघित्स' इति श्रुतिः ॥

७६०. हविर्धानाय —

पञ्चविधसृष्टिरूपहविरस्मिन्धीयत इति हविर्धानः ॥

'विश्वस्यायतनं महदि'ति श्रुतिः ॥

मानसाद्युद्भिज्जान्तसृष्टेर्हवि(वी)रूपत्वं **ब्रह्माण्डपुराणे** वर्णितम् । महायाग: प्रकर्तव्य इति प्रस्तुत्य

"मानसी प्रथमा सृष्टिरथ जारायत्री परा ।
आण्डी चैव तृतीया स्यात्स्वेदजान्या तथोद्भिजा ।
एषा पञ्चविधा सृष्टिः पुरोडाशतया भवेदि"ति ॥

७६१. गम्भीराय –

अगाधत्वात्तलस्पर्शपुर:सरंसमुद्र: निर्धारयितुमशक्य: । एवं ज्ञानैश्वर्यादिभि: परमेश्वरोऽपि निर्धारयितुमशक्यत्वाद्गम्भीर: । गूढाभिप्रायत्वाद्वा ।

'सा (स) वेत्ति वेद्यं न च तस्यास्ति वेत्ता
तमाहुरग्र्यं पुरुषं महान्तमि'ति श्रुति: ॥

७६२. सहायाय –

सहाय: ब्रह्मादीनामप्यापत्काले रक्षक इत्यर्थ: ।

७६३. भोजनाय –

स्वाभिन्नपराशक्तिविलासभूताकाशादिभूतभौतिक: सर्वोऽपि प्रपञ्च: विषय: भोजनम् । सर्वप्रपञ्चभक्षण इत्यर्थ: ॥

'विषयी भगवानीशो विषय: परमेश्वरी'ति **शैवे** । तत्रैव —

'यथा देवस्तथा देवी, यथा देवी तथा शिव:' ।
नानयोरन्तरं विद्याच्चन्द्रचन्द्रिकयोरिवे'ति ॥

भोक्ता भोग्यं प्रेरितारं च मत्वा
सर्वं प्रोक्तं त्रिविधं ब्रह्ममे(चै)तदि'ति श्रुतिः ॥

७६४. सुभोगिने –

शोभना भोगाः सुधापारावारमध्ये, मन्दारपारिजातादिपरिवृते रत्नमये द्वीपे नीपोपवनवति चिन्तामणिगृहे शिवाकारे मञ्चे स्वाङ्कस्थपरमानन्दमय्या पराशक्त्या सह सल्लापादिरूपा अनुभवा अस्य सन्तीति सुभोगी ।

'उमासहायं परमेश्वरं प्रभुमि'ति श्रुतिः ॥

७६५. महायज्ञाय –

महान् यज्ञो यागः पञ्चहविर्होमरूपो यस्य सः महायज्ञः ।

ब्रह्माण्डपुराणे देवान्प्रति महाशम्भुः —

महायागः प्रकर्तव्यो महायागविधानतः ।
महायागे च कर्तव्ये पञ्चहव्यानि देवता ॥ इति ॥

श्रुतिरुक्ता ॥

७६६. तीक्ष्णाय –

विरोधिनो नाशयितुं क्रोधयुक्तस्तीक्ष्णः ।

'तीक्ष्णाय तीक्ष्णरूपिण' इति श्रुतिः ॥

७६७. भूतचारिणे –

भवन्तीति भूताः, ते च देवांशविशेषाः । तैरनुचरभूतैः सह चरति दुष्टनिग्रहार्थमिति भूतचारी ।

'नमो गणेभ्यो गणपतिभ्यश्चे'ति श्रुतिः ॥

७६८. प्रतिष्ठिताय –

लिङ्गरूपतया सेतुप्रभृतिषु रामादिभिः प्रतिष्ठितत्वात्प्रतिष्ठितः ।

'नमः काट्याय चे'ति श्रुतिः ॥

यद्वा सर्वजनानां हृदये प्रत्यगात्मत्वेन तिष्ठति इति प्रतिष्ठितः ।

'सदा जनानां हृदये सन्निविष्ट' इति श्रुतिः ॥

यद्वा स्वात्मन्येव प्रतिष्ठितः ।

'स भगवान्कस्मिन्प्रतिष्ठित इति—स्वे महिम्नी'ति श्रुतिः ॥

७६९. महोत्साहाय –

जगदुत्पत्तिस्थितिलयकारणे उद्युक्तत्वान्महोत्साहः ।

'यतो वा इमानि भूतानि जायन्त' इति श्रुतिः

७७०. परमार्थाय –

परमश्चासावर्थश्च परमार्थः । उत्कृष्टपरमार्थरूपः । अविद्या-तत्कार्यविनिर्मुक्तमोक्षस्वरूप इति यावत् ।

निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनमि'ति श्रुतिः ।

७७१. **शिशवे** –

बालरूपधरः शिशुः ।

लैङ्गे गौरीस्वयंवरे —

कथं हिमवतःपुत्री बभूवाम्बा सती सुता ।
कथं वा देवमीशानमवाप पतिमीश्वरमिति प्रस्तुत्य

अथ दृष्ट्वा शिशुं देवास्तस्या उत्सङ्गवर्तिनम् ।
कोऽयमत्रेति सम्मन्त्र्य चुक्रुशुर्भृशमागता '। इति

स्तम्भितः शिशुरूपेण देवदेवेन लीलया ।
वज्रं क्षेप्तुं न शशाक बाहुं चालयितुं तथेति च ।

'नमो मध्यमाय चापगल्भाय चे'ति श्रुतिः ॥
अपगल्भोऽत्यन्तशिशुरिति वेदभाष्यकाराः ॥

७७२. **प्रांशवे** –

प्रांशुः सर्वोन्नतः । केनाप्यलङ्घ्यस्वरूप इति भावः ॥
आदित्यपुराणे ब्रह्मविष्णुसन्निधौ —

"माघकृष्णचतुर्दश्यां तयोर्मध्ये महानिशि ।
आत्मानं दर्शयामास लिङ्गरूपी महेश्वरः ॥
कोटिसूर्यप्रतिकाशं मध्ये लिङ्गमुपस्थितम् ।"

इति प्रस्तुत्य —

"तदूर्ध्वं गतवान्ब्रह्मा हंसरूपी तदा किल ।
वराहरूपमास्थाय ह्यधो द्रष्टुं गतो हरिः ।
बहुवर्षसहस्राणि गत्वाऽदृष्ट्वाऽऽगतौ पुनः ॥" इति ॥

"हरिब्रह्ममृग्यं परब्रह्मरूपं

मनोवागतीतं महःशैवमीडे" इति **भाष्यकाराः** ॥

'नमो बृहते च वर्षीयसे चे'ति श्रुतिः ॥

७७३. कपालिने –

कपालमस्यास्तीति कपाली ।

ब्रह्माण्डपुराणे शक्रं प्रति द्वारपालाः —

"कश्चित्कपालमादाय चन्द्रमण्डलसन्निभम् ।

आयाति भगवन्नाथ भूतिभूषितविग्रह" इति ॥

उपरि **ब्रह्माण्डपुराणे** —

कालमेघसमच्छायः स्कन्धे शूलकपालभृत् ।

द्विभुजश्च त्रिणेत्रश्च स्मयमानमुखाम्बुज इति ॥

'नमःस्वायुधाय च सुधन्वने चे'ति श्रुतिः ॥

७७४. सहजाय गृहस्थाय –

इदं पदद्वयं सविशेषणमेकं नाम । देव्या सहैव जायत आविर्भवतीति सहजः । गृहे चतुर्दशलोकात्मके तिष्ठतीति गृहस्थः । उक्तं **चागमे** —

पावकस्योष्णतेवेयमुष्णांशोरिव दीधितिः ।

चन्द्रस्य चन्द्रिकेवेयं शिवस्य सहजा ध्रुवेति ॥

वायव्यसंहितायाम् —

चन्द्रो न खलु भात्येव यथा चन्द्रिकया विना ।

न भाति विद्यमानेऽपि तथा शक्त्या विना शिवः इति ॥

तत्रैव —

"यथा न जायते पुत्रःपितरं मातरं विना ।
तथा भवं भवानीं च विना नैतच्चराचरमि"ति ॥

'सहस्रसाम्बिकये'ति श्रुतिः ॥

७७५. **सन्ध्यानाथाय –**

सान्ध्यायास्तदुपलक्षितस्नानजपादेर्नाथः । ईश्वरार्पणबुध्यैव कर्मणां कर्तव्यत्वात् । "स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः" इति भगवद्वचनात् ॥

'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ती'ति श्रुतिः ॥

७७६. विष्णवे –

(वेवेष्टि) व्याप्नोतीति विष्णुः । यथोक्तं **वायव्यसंहितायाम्**–

"शिवतत्त्वादिभूम्यन्तं शरीरादि घटादि च ।
व्याप्याधितिष्ठतीशश्च ततो विष्णुरुदाहृतः ॥" इति ॥

'सर्वव्यापी सर्वभूतान्तरात्मे'ति श्रुतिः ॥

७७७. **सद्भिः सम्पूजिताय –**

सद्भिः सात्विकैर्देवर्ष्यादिभिः सम्पूजितः । भक्तिश्रद्धादिना गन्धपुष्पादिभिः प्रदक्षिणनमस्कारादिभिश्च पूजितः सम्पूजितः ॥

स्कान्दे —

"भगवन्कः सुरैः सर्वैरसुरैः सिद्धकिन्नरैः ।
मुनिभिर्यक्षगन्धर्वैस्तथान्यैः सर्वजन्तुभिः ।
भुक्त्यर्थं च विमुक्त्यर्थं पूज्यः पुण्यवतां वरः ॥ इति
प्रस्तुत्य —

"ततो विश्वाधिकं रुद्रं महर्षिं सर्वसाक्षिणम् ।
ब्रह्मविष्ण्वादयो देवाः पूजयामासुरादरात् ।
तथा लक्ष्म्यादयो देव्यस्तथान्ये सर्वजन्तवः ।
पूजयामासुरीशानं पुरुषं कृष्णपिङ्गलमि"ति ॥

'तवश्रिय' इति श्रुतिः ॥

७७८. वितलासुरघातिने -

वितलोपलक्षितपाताललोके विद्यमानदुष्टदैत्यसंहर्ता — वितलासुरघाती । दुष्टदैत्या जलन्धरान्धकत्रिपुरादयः ॥

'नमः सहमानाय निव्याधिन' इति श्रुतिः ॥

७७९. जनाधिपाय –

जनानां लोकानां अधिपो जनाधिपः ।

'एष लोकाधिपतिरि'ति श्रुतिः ॥

७८०. योग्याय -

सर्वविद्यावत्त्वान्महाब्रह्मणत्वाच्च योग्यः ।

'त्वं देवेषु ब्राह्मण' इति श्रुतिः ॥

७८१. कामेशाय -

काम्यन्त इति कामाः पुत्रपशुस्वर्गादयस्तेषामीशः कामेशः ।

'नित्यो नित्यानां चेतनश्चेतनाना-

मेको बहूनां यो विदधाति कामानि'ति श्रुतिः ॥

७८२. किरीटिने -

किरीटमस्यास्तीति किरीटी । किरीटं केयूराङ्गदकटकाङ्गुलीयादीनामुपलक्षणम् । सर्वाभरणहेतुभूतस्य हिरण्यस्य परमेश्वराधीनत्वादाप्रणखात्सर्व एव सुवर्णः ॥

'नमो हिरण्यबाहव' इति श्रुतिः ॥ विद्यारण्यस्वामिभिः हिरण्यनिमित्तान्याभरणानि बाह्वोर्यस्य स हिरण्यबाहुरिति व्याख्यातम् । भट्टभास्करैस्तु — हिरण्यबाहव इति व्याख्यानावसरे उपलक्षणपरतया आप्रणखात्सर्व एव सुवर्ण इति व्याख्यातम् ।

७८३. अमोघविक्रमाय -

अमोघः अवन्ध्यः फलपर्यवसायीति यावत् । तादृशो विक्रमः पराक्रमो यस्य सः तथा ।

'अ(आ)भित्वा शूरनो नम' इति श्रुतिः ॥

७८४. नम्राय -

नम्रः यतिविषयः तद्रूपधरः ॥

स्कान्दे —

तेष्वेवं तप्यमानेषु महर्षिषु महेश्वरः ।
रागद्वेषगतिं तेषां परीक्षेऽहमिति स्मरन् ।

नग्नवेषो जटाधारी भस्मोद्धूलितविग्रहः ।
भिक्षुरूपप्रतिच्छन्नः तापसाश्रममाययाविति ॥

अत्र श्रुतिः 'तत्र परमहंसनाम परिवर्तक आरुणि श्वेतकेतु-दुर्वासा' इति ॥

७८५. दलघातिने -

दलं सेना — असुरसम्बन्धिनी, तां वृषभरूपेण घातितवान् इति श्वेतारण्यमाहात्म्ये प्रसिद्धम् ।

वेगेन कांश्चिदपरान्नादेन भ्रमणेन च ।
निःश्वासपवनेनान्यान्नाशयामास दानवान् (तान्गणान्) ॥

इत्यादि ॥

'निव्याधिन' इति श्रुतिः ॥

७८६. सङ्ग्रामाय -

सङ्ग्राम आहवः, तद्रूपी ।

नम इषुमद्भ्यश्च इत्यादिना विध्यद्भ्यश्च वो नमः इत्यन्तेन युद्धं कुर्वतां धानुष्काणामवस्थाभेदो वर्णितः । तथा च सङ्ग्रामावस्था-विशेषवत्त्वात्परमेश्वरस्य सङ्ग्रामरूपीचेत्युक्तो(क्तिः) भवति । अथवा सङ्ग्रामशब्दो मत्वर्थीयाच्प्रत्ययान्तः । अस्मिन्पक्षे 'इषुमद्भ्यश्च' इत्यादिरेव श्रुतिः ॥

७८७. **नरेश्वराय –**

नरा नेतारो ब्रह्मविष्ण्वादयस्तेषामीशः स्वामी नरेशः ।

'तमीश्वराणामि'ति श्रुतिः ॥

७८८. **शुचिभस्मने –**

शुचि अविद्याकार्यहीनं तदेव भस्म प्रकाशकं तच्छुचिभस्म । अनेन महाभस्मोक्तम् । **स्कान्दे सूतः —**

"अथातः सम्प्रवक्ष्यामि भस्मधारणवैभवम् ।
यस्य विज्ञानमात्रेण नरो मुच्येत बन्धनात् ॥

भस्म नानाविधं प्रोक्तं धार्मिकैस्तत्वचिन्तकैः ।
एकं विप्रा महाभस्म स्वल्पमन्यत्प्रकीर्तितम् ॥

महाभस्म महादेवो महायागावभासकः ।
भर्त्सनात्सर्वपापानां भासनं तस्य विद्यया ॥

विद्या वेदोद्भवा साक्षान्मुनयः संशितव्रताः ।
अविद्याफलदाश्चान्याः सत्यमेव द्विजोत्तमाः ॥

यस्य साक्षान्महाभस्म भाति स्वात्मतया स्वतः ।
न तस्य भस्मना कार्यं न जटाभिश्च चीरकैः ॥

यस्य भस्म स्वतो भाति स्वात्मना मुनिपुङ्गवाः ।
न तस्य वर्णधर्मेण कार्यं नाश्रमधर्मतः ॥

यस्य भस्म स्वरूपेण विभाति परयोगिनः ।
न तस्य तपसा कार्यं नदाने न न चेज्यया ॥" इति ॥

'आनन्दं ब्रह्मणो विद्वान् । न बिभेति कुतश्चनेति' इति श्रुतिः ॥

७८९. भूतिप्रियाय –

उद्धूलनरूपेण त्रिपुण्ड्रूपेण च धृता भूतिः प्रिया यस्य स भूतिप्रियः ॥ अनेन भूतिधारणजनप्रिय इति सूचितम् । यद्वा भूतिः स्वार्चनसाधनत्वेन प्रिया यस्येति ॥

नव्यं भस्म समादाय विशुद्धं श्रोत्रियालयात् ।
अग्निरित्यादिभिर्मन्त्रैरभिमन्त्र्य यथाविधि ॥
उद्धूलयति गात्राणि तेनार्चयति मामपि ।
तस्मात्परतरो भक्तो मम राम न विद्यते ॥ इति ॥

'त्रिपुण्ड्रं भस्मना करोति यो विद्वानिति प्रस्तुत्य शिवसायुज्यमाप्नोति' इति श्रुतिः ॥

७९०. भूम्ने –

भूमा महान्निरतिशयस्वरूपः परमात्मेत्यर्थः ।

'यो वै भूमा तत्सुखमि'ति श्रुतिः ॥

७९१. सेनाय –

सेना – प्रमथसङ्घातात्मिका अस्यास्तीति सेनः । मत्वर्थीयाच्प्रत्ययान्तः ॥

'हिरण्यबाहवे सेनान्य' इति श्रुतिः ॥

७९२. चतुराय –

चतुरः समर्थः दुष्टदैत्यादिनिग्रहे भक्ताभीष्टप्रदाने जगत्सृष्टिस्थितिलयकरणे वा ।

'यतो वा इमानि भूतानि जायन्त' इति श्रुतिः ॥

७९३. मनुष्यबाह्यगतये -

मनुष्यापेक्षया बाह्याः पशुपक्षिकीटादयः तेषामपि गतिः प्राप्यस्थानम् । इदं च कालहस्तिमाहात्म्यादौ प्रसिद्धम् ॥

'पशूनां पतये नम' इति श्रुतिः ॥

७९४. कृतज्ञाय -

सर्वैः सर्वप्रकारेण सर्वावस्थासु कृतं लौकिकं वैदिकं च कर्म जानातीति कृतज्ञः ।

'कर्माध्यक्षः सर्वभूताधिवास' इति श्रुतिः ॥

७९५. शिखण्डिने -

शिखण्डः काकपक्षः सोऽस्यास्तीति शिखण्डी । बालरूपधर इति यावत् ।

'नमो ज्येष्ठाय च कनिष्ठाय चे'ति श्रुतिः ॥

७९६. निर्लेपाय -

आगन्तुकस्वाभाविकदोषद्वयरहितो निर्लेपः ।

'आलेपो ऽयम्' इति श्रुतिः ॥

७९७, जटार्द्राय -

जटासु कपर्दनामिकासु गङ्गाप्रयुक्तमार्द्रं यस्य स जटार्द्रः ।

'नमः कपर्दिने चे'ति श्रुतिः ॥

७९८. महाकालाय –

महाकालो नाम गणश्रेष्ठो नन्दिभृङ्गितुल्यः, तद्रूपी ।

'नमो गणेभ्यो गणपतिभ्यश्चे'ति श्रुतिः ।

७९९. मेरवे —

मिनोति भूरादिलोकानात्मप्रभावेणोत्तरोत्तरतयोर्ध्वं क्षिपति इति मेरुः । यद्वा मेरुवदचलत्वादाह्लादकरत्वात्सौवर्णरूपत्वाद्वा ।

'तं शान्तमचलमद्वयानन्दविज्ञानघन एवास्ती'ति श्रुतिः । 'आप्राणखात्सर्व एव सुवर्ण' इति च ॥

८००. विरूपरूपाय —

विरूपो नग्नमुण्डादिस्तस्य रूपमिव रूपं यस्य सः विरूपरूपः । भैरवदुर्वासादिरूप इति यावत् । यद्वा विरूपो रूपरहितः निर्गुण इति यावत् । विरूपशब्दो मत्वर्थीयाच्प्रत्ययान्तः । परमार्थतो रूपरहितत्वेऽपि मायाशक्तिवशाद्रूपवान्य· स विरूपः ।

ब्रह्माण्डपुराणे —

सन्धाता सर्वलोकानां प्रकृतेः परतःस्थितः ।
अस्माकममरेशानामिच्छया रूपवान्भवान् ॥ इति ॥

'असद्वा इदमग्र आसीत्ततो वै सदजायते'ति श्रुतिः ॥

॥ इत्यष्टमशतकविवरणम् ॥

८०१. शक्तिगम्याय —

शक्त्या सामर्थ्येन ब्रह्मचर्यवैराग्यशमदमोपरतितितिक्षासमाधानश्रद्धाश्रवणमनननादिरूपेण गम्यः प्राप्यः शक्तिगम्यः ।

'नायमात्मा बलहीनेन लभ्यः' इत्यादिश्रुतिः ॥

८०२. सर्वाय —

सर्वः सर्वस्वरूपः । क्षितिसलिलहुतवहपवनगगनहिमकरदिनमणियजमानात्मभिर्मूर्तिभिः सर्वं व्याप्य व्यवस्थितः ॥

विष्णुपुराणे —

"नमामि सर्वसर्वेशमनन्तमजमव्ययम् ।
लोकाधारमनाधारमप्रकाशमभेदिनमि"ति ॥

'सर्वो वै रुद्र' इति श्रुतिः ॥

८०३. सदसत्सत्याय —

सदसतोः कार्यकारणयोः सत्यः अधिष्ठानभूतः । अधिष्ठानस्यैव सत्यत्वात् । अध्यस्तयोः सदसतोः कार्यकारणयोरव्याकृतनामकाव्यक्त — तत्कार्यभूताव्यक्तस्वरूपाकाशादिप्रपञ्चयोरधिष्ठानब्रह्मसत्तयैव सत्तावत्त्वात् आनन्दरूपः सर्वाधिष्ठानसत्तामात्रः इति श्रुतिः ।

८०४. सुव्रताय —

शोभनानि व्रतानि दुष्टनिग्रहशिष्टपरिपालनादीनि यस्य स सुव्रतः ।

'नमामि त्वां महादेव महाभयविनाशन (शिनी) ।
महादारिद्र्यशमन(नी) महाकारुण्यरूपिण(णी)' इति श्रुतिः ॥

७०५. भक्तप्रियाय –

भक्तः प्रियो यस्य स भक्तप्रियः ।

"यो वेदाध्ययनं नित्यं दानानि च तपांसि च ।
मदर्पणधिया कुर्यात्स मे भक्तः स मे प्रियः ।
सर्वदा शिरसा कण्ठे रुद्राक्षं धारयेत्तु यः ।
पञ्चाक्षरजपरतः स मे भक्तः स मे प्रियः ॥" इति ॥

"अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च ।
निर्ममो निरहङ्कारः समदुःखसुखः क्षमी ।
सन्तुष्टः सततं योगी यतात्मा दृढनिश्चयः ।
अनपेक्षः शुचिर्दक्षः उदासीनो गतव्यथः ।
सर्वारम्भपरित्यागी यो मद्भक्तः स मे प्रियः ॥"
इति शिवगीताभगवद्गीतादिषु ॥

'यमेवैष वृणुते तेन लभ्य-
स्तस्यैव आत्मा वृणुते तनुं स्वामि'ति श्रुतिः ॥

८०६. श्वेतरक्षापराय –

श्वेतो नाम कुरुवंशाधिपः कश्चन राजा मोक्षार्थी सन् अनेकतीर्थाटनपुरःसरं श्वेताटवीं प्राप्तः तत्रत्यतीर्थेषु स्नात्वा श्वेताटवीनाथं स्तुत्वा तदनु तद्वरदानार्थमागतं देवं प्रति मोक्षं प्रार्थितवान् ।

तदनु —

प्रत्यक्षमगमत्तस्य वरं दातुं महेश्वरः ।
यथाध्यातः पुरा देवो राज्ञा श्वेतेन भूभृता ॥

तादृग्रूपधरो भूत्वा स्वप्रकाशो निरञ्जनः ।
उवाच कृपया राजन् दर्शयन्भक्तवश्यताम् ॥

इति प्रस्तुत्य

"मामुपैष्यसि राजेन्द्र शाश्वतं मामकं पदम् ।
तस्मादुग्रगणो भूत्वा मत्सायुज्यमुपैष्यसि" इति

ब्रह्मकैवर्ते प्रसिद्धम् । यस्मादेवं, तस्माच्छ्वेतनामकस्य राज्ञो रक्षां कृतवानिति श्वेतरक्षापरः ॥ किञ्च, ज्योतिष्मा(म)न्नाकस्य नर्मदा-तीरवासिनः पुत्रं श्वेतकुष्ठिनं श्वेतकुष्ठरोगादक्षितवानिति तत्रैव पुराणे प्रसिद्धम् । किञ्च श्वेतकेतुं मृत्युभयादरक्षेति पाद्मे प्रसिद्धम् ।

'अध्यवोचदधिवक्ता प्रथमो दैव्यो भिषगि'ति श्रुतिः ॥

८०७. सुकुमारमहापापहराय –

सुकुमारस्य ब्राह्मणस्य महापापानि हरतीति सुकुमारमहापापहरः ।

शैवे ईशानसंहितायाम् —

शिवरात्रिव्रतं दृष्ट्वा कथं पातककोटिभिः ।
मुक्तः शिवपुरं प्राप्तस्तन्मे विस्तरतो वदे"ति ॥

प्रस्तुत्य सिन्धुनदीतीरे कुब्जनामके पुरे कश्चिद्ब्राह्मणकुमारः सुकुमारनामकः कामशास्त्रकलाभिज्ञः षडङ्गप्रवरः अनुलोमप्रति-

लोमजसर्वनारीमोहको राज्ञा तद्देशान्निःसारितः कस्मिंश्चिद्वने चण्डालीरतिपरस्तया सह मधुमांसादिभक्षणपरस्तत्र वृत्त्यर्थमनेकब्राह्मण-क्षत्रियादिकं(कान्) हत्वा तद्द्रव्येण चण्डाल्यां तदुत्पन्नपुत्रपञ्चकेन कन्याद्वयेन च सह स्वशरीरपोषणं कुर्वन् कदाचित्पुष्पग्रहणार्थं समीपे विद्यमाननागेश्वरालयसमीपे शिवचतुर्दश्यां रात्रौ गतवान् । तदानीमनेकजनकृतशिवपूजां दृष्ट्वा दैवात् तत्र मृतः । तदनु यमदूतैर्नीतस्तदनु तन्निवारणपुरःसरं शिवदूतैः शिवपुरं नीतः । तदनु अयमधिकारो ममास्त्विति वदन्तं यमं प्रति शिवः —

"आश्चर्यमत्र माकार्षीः सुकुमार कृते यम ।
मय्येव क्षम्यता नास्ति शृणु वक्ष्यामि कारणम् ॥

अनेन सुकुमारेण यदेतद्दुरितं कृतम् ।
सङ्ख्यातुमप्यशक्यं यद्व्योम्नि तारकषण्डवत् ।

न तस्य दुरितं दृष्टं सर्वशास्त्रेषु चान्तक ।
तथाविधं महत्पापं सर्वं दग्धं क्षणेन तु ॥

शिवरात्रिव्रतं दृष्ट्वा मत्सामीप्यमुपागम"दिति ।
सन्देहं मा कृथाः किञ्चित्सुकुमारकृते यम ॥

महापातकलक्षाणि नष्टान्येतत्कृतानि च ।
शिवरात्रिव्रतं दृष्ट्वा यत्पुण्यं प्राप्तवान्निशि ॥

तत्पुण्याग्निप्रदग्धा हि महापातककोटयः ।
राजसूयसहस्रस्य चाश्वमेधायुतस्य च ॥

कपिलाकोटिदानस्य भूमि(मेः) दानस्य यत्फलम् ।
दशवर्षसहस्रान्ते तपःकृत्वा तु यत्फलम् ॥

पुण्यक्षेत्रनिवासाच्च सर्वतीर्थावगाहनात् ।
एतेषां यत्फलं प्रोक्तं शास्त्रेषु विविधेषु च ॥

तत्पुण्यं कोटिगुणितं सुकुमारो हि लब्धवान् ।
शिवरात्रिव्रतं दृष्ट्वा पुष्पव्याजेन चागतः ॥

तपस्विभ्योऽधिको ह्येष यज्वभ्योऽप्यधिको मतः ।
सर्वेभ्यः पुण्यकृद्भ्यश्च सुकुमारोऽधिको मतः ॥

तेन पुण्येन महता गणेश्वरपदं गतः ।
भोगान्भुक्त्वा तु विपुलान्कल्पान्ते मम सन्निधौ ॥

ततश्च प्रच्युतः कालाद्दधीचाख्यो भविष्यति ।
ततो महेश्वरो भूत्वा ज्ञानं लब्ध्वा च मामकम् ॥

देवानामुपकारार्थं तनुं त्यक्त्वा सुदुस्त्यजाम् ।
महिम्ना विष्णुना तुल्योऽजेयो(मम)सायुज्यमेष्यति ॥ इति ॥

'धर्मावहं पापनुदं महेशमि'ति श्रुतिः ॥

८०८. रथिने –

रथस्वामी रथी ।

आदित्यपुराणे —

अथ रुद्रस्य देवस्य निर्मितो विश्वकर्मणा ।
सर्वलोकमयो दिव्यो रथो यत्नेन सादरम् ॥

सर्वभूतमयश्चैव सर्ववेदमयस्तथा ।
सर्वदेवमयश्चैव सौवर्णः सर्वसम्मतः ॥

रथाङ्गं दक्षिणं सूर्यो वामाङ्गं सोम एव च ।
दक्षिणं द्वादशारं हि षोडशारं ततोत्तरम् ।। इत्यादि ।।

'नमो रथिभ्यो रथेभ्यश्च वो नम' इति श्रुतिः ॥

८०९. धर्मराजाय –

धर्मराजो यमः, तद्रूपी ।

'यो देवानां .... एक एवे'ति श्रुतिः ॥

यद्वा धर्मस्य वृषभस्य राजा स्वामी । अयमर्थः पूर्वमेवोपपादितः ।

८१०. धनाध्यक्षाय –

धनानामध्यक्षोऽधिष्ठाता अधिपतिरिति यावत् ।

'नमो हिरण्यबाहवे हिरण्यपतय' इति श्रुतिः ।।

८११. सिद्धये –

सर्ववस्तुसंसिद्धिरूपत्वात्सिद्धिः । परमेश्वरस्यैव सर्ववस्तुरूपेणाविर्भूतत्वात् । यद्वा सर्ववस्तुविषयप्रकाशरूपत्वात् ।

'सर्वस्य साक्षी'ति श्रुतिः ।।

८१२. महाभूताय –

महान्ति भूतानि आकाशादीनि सृज्यत्वेनास्य सन्तीति महाभूतः ।

'तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः' इति श्रुतिः ।

८१३. कल्पाय –

कल्पः संहारकालः । तद्रूपी ॥

'कालाय नमः' इति श्रुतेः ॥

८१४. कल्पनारहिताय –

कल्पना प्रपञ्चसृष्टिः, तद्रहितः (अ)वास्तवप्रपञ्चनिर्मुक्तः ॥

'नेह नानास्ति किञ्चने'ति श्रुतिः ॥

८१५. ख्याताय –

श्रुति-स्मृति-इतिहास-पुराणागमेषु लोकेषु च प्रसिद्धःख्यातः ।

'सर्वे वेदा यत्पदमामनन्ति' इत्यादिश्रुतेः ॥

८१६. जितविश्वाय –

जितः विश्वः सर्वं येन सः तथा ।

'जेतारमपराजितमि'ति श्रुतिः ॥

८१७. गोकर्णाय –

गोकर्णनामकः क्षेत्रविशेषः पश्चिमसमुद्रतीरस्थः अस्यास्तीति गोकर्णः । मत्वर्थीयाच्प्रत्ययान्तः ।

'क्षेत्राणां पतये नम' इति श्रुतिः ॥

८१८. सुचारवे –

सुतरां दर्शनीयश्चारुः, निरतिशयपरमानन्दरूपत्वात् ।

'विज्ञानमानन्दं ब्रह्मे'ति श्रुतिः ॥

८१९. श्रोत्रियाय –

महाब्राह्मणत्वाच्छ्रोत्रियः* ।

'त्वं देवेषु ब्राह्मण' इति श्रुतिः ॥ यद्वा श्रोत्रियः अधीतवेदः तद्रूपी ॥ 'नारुद्रः क्रमपाठक' इति स्मरणात् ॥

८२०. वदान्याय –

योगिभ्यः स्वस्वरूपदातृत्वाद्वदान्यः ।

'यमेवैष वृणुते तेन लभ्य' इति श्रुतिः ॥

८२१. दुर्लभाय –

दुर्लभः भक्त्या (भक्तिमात्रेण) लभ्यत्वाद्दुर्लभः ।
"कोटिजन्मार्जितैः पुण्यैः शिवे भक्तिः प्रजायत" इति वचनात् ।

'भावग्राह्यमनीडाख्यमि'ति श्रुतिः ॥

८२२. कुटुम्बिने –

जायाऽपत्यपरिजनबन्धवभ्यागतातिथ्यादिबहुजनपोषकः कुटुम्बी, तद्रूपी ॥ यद्वा भार्यास्थानीयपराशक्तिज्ञानेच्छाक्रियाशक्त्यादि-

---

* "जन्मना जायते शूद्रः कर्मणा जायते द्विजः । वेदाभ्यासेन विप्रः स्याच्छ्रोत्रियो यज्ञकर्मणा" इत्यभियुक्तोक्तेः सर्वाऽवरपतेः परमेश्वरस्य श्रोत्रियत्वं सिद्धमेव ॥

पुत्रस्थानीयब्रह्मविष्णुरुद्रेन्द्रादिभृत्यस्थानीयनन्दिभृङ्गिमहाकालादिबन्धुस्थानीयगौतमाद्यभ्यागतातिथिस्थानीयागस्त्यादिदीनान्धकृपणस्थानीयस्थावरादिसमस्तप्राणिपोषकत्वात् कुटुम्बी ।

'एष लोकाधिपतिरेष लोकपालः' इति श्रुतिः ॥

यद्वा श्रोत्रियाय कुटुम्बिन इति दानप्रकरणे दानपात्रत्वेन प्रसिद्धाः श्रोत्रियादयः । एवं परमेश्वरमुद्दिश्य पत्रपुष्पफलसलिलादिकं दातव्यमक्षय्यफलत्वसिद्धय इत्येतादृशानि नामानि श्रुतिसाधनत्वेनोपात्तानि ॥

८२३. विरजाय (विरजसे) –

विरजो निर्मलः ।

'विरजं ब्रह्म निष्कलमि'ति श्रुतिः ॥

८२४. सुगन्धाय –

सोभनश्चासौ गन्धश्च सुगन्धः । यथा सुगन्धः पुष्पेषु चक्षुरिन्द्रियाग्राह्यः एवं परमेश्वरोऽपि सर्वभूतेषु सर्वेन्द्रियमनःप्राणेषु अधिष्ठानत्वेन सत्तास्फूर्तिप्रदत्वेन वर्तते इति सुगन्धः ।

तदुक्तं **स्कान्दे** —

सर्वभूतेषु सर्वत्र गुणेषु प्रकृतौ तथा ।
इन्द्रियेषु तथान्येषु देवेषु च गणेषु च ॥
पुष्पेषु गन्धवत्सूक्ष्मं सुलिङ्गं पारमेश्वरम् ।

'सुगन्धिं पुष्टिवर्धनम्, एको देवः सर्वभूतेषु गूढ इत्यादि-श्रुतयः ॥

८२५. विश्वम्भराय –

विश्वं बिभर्ति इति विश्वम्भरः ।

'विश्वं बिभर्ति भुवनस्य नाभिः' इति श्रुतिः ॥

८२६. भवातीताय –

भवात्संसारादतीतोऽगतिः भवातीतः ।

'योऽशनायापिपासे शोकमोहं जरामृत्युमत्येति' इति श्रुतिः ॥

८२७. तिष्याय –

तिष्यः कलियुगं तद्रूपी य इति । तिष्ये पापवशाद्वैदिकत्वेन प्रसिद्धभस्मरुद्राक्षधारणशिवलिङ्गपूजापरमेश्वरभजनशिवक्षेत्रवासादिकं न रोचते यतः, तस्माद्राजाज्ञया एतत्सर्वं कर्तव्यमित्येतन्नाम प्रवृत्तम् । तिष्यः पूज्यः इति ॥

स्कान्दे —

कलौ जगद्विधातारं शिवं सत्यादिलक्षणम् ।
नार्चयिष्यन्ति मोहेन पाषण्डोपहता जनाः ॥

वेदोक्तेनैव मार्गेण भस्मनैव त्रिपुण्ड्रकम् ।
नोद्धूलनं चरिष्यन्ति पाषण्डोपहता जनाः ॥

रुद्राक्षधारणं भक्त्या वेदोक्तेनैव वर्त्मना ।
न करिष्यन्ति मोहेन पाषण्डोपहता जनाः ॥

लिङ्गे दिने दिने देवं शिवरुद्रादिसंज्ञितम् ।
नार्चयिष्यन्ति मोहेन पाषण्डोपहता जनाः ॥

वेदसिद्धं महादेवं साम्बं चन्द्रार्धशेखरम् ।
नार्चयिष्यन्ति मोहन पाषण्डोपहता जनाः ॥

एवं शिवक्षेत्रवास–आचार्यमुखाद्वेदान्तश्रवणपरमहंससन्न्यास – वैदिकस्मार्तकर्मानुष्ठानादिकं न करिष्यन्ति, एतद्विरुद्धाचारं पूर्वोक्तेषु प्रद्वेषं च करिष्यन्ति इत्युक्त्वा

धीरा विशिष्टाश्च महेश्वरस्य
प्रसादयुक्ताश्च महत्तराश्च ।
वेदोदितं केवलमेव देवा
मुदा चरिष्यन्ति विमुक्तिसिध्यै ॥

'आवो राजानमि'ति श्रुतिः ॥

८२८. सामगाय –

साम्ना समीचीनस्तोत्रेण लौकिकेन वैदिकेन वा गम्यत इति सामगः ।

"आदरेण यथा स्तौति धनवन्तं धनेच्छया ।
तथा चेद्विश्वकर्तारं को न मुच्येत बन्धनात् ॥"

इति महाभारते । "यः शतरुद्रमधीत" इति प्रस्तुत्यानेन ज्ञानमाप्नोति संसारार्णवनाशनमि"ति कैवल्योपनिषदि ॥ यद्वा साम्ना सामविशेषेण बृहद्रथन्तरवामदेव्यादिना स्वसन्निधौ गीयमानेन गम्यत इति सामगः ।

तदुक्तं शिवगीतायाम् —

बृहद्रथन्तरं वामदेव्यं देवव्रतानि च ।
तद्योगा आज्यदोहांश्च ये गायति ममाग्रतः ।
इह श्रियं परमां भुक्त्वा मम सायुज्यमाप्नुयात् ॥ इति ॥

८२९. चिन्मयाय -

चिन्मयश्चिद्रूपः ।

'चिन्मयो ह्ययमि'ति श्रुतिः ॥

८३०. शुक्लज्योतिषे -

शुक्लमविद्यातत्कार्यविनिर्मुक्तं ज्योतिः स्वयंप्रकाशरूपम् । शुक्लं च तज्ज्योतिश्च शुक्लज्योतिः ।

ननु ज्योतिरित्येवालम् प्राणेषु हृद्यन्तर्ज्योतिः पुरुष इति श्रुतेः । शुक्लमित्येवालं यच्छुक्लमिति श्रुतेः । न । ज्योतिरित्युक्ते सूर्यादिकमपि स्यात् । शुक्लमित्युक्ते वस्त्रादिकमपि स्यात्, अतः शुक्लज्योतिरिति ॥

८३१. क्षेत्रगाय -

क्षेत्रं शरीरं, तत्र गच्छति अभिव्यक्तो भवति इति क्षेत्रगः ।

'परात्परं परशिवं (पुरिशयं) पुरुषमीक्षत' इति श्रुतिः ॥

८३२. अद्वैताय -

भेदविकल्परहितोऽद्वैतः ।

'प्रपञ्चोपशमःशिवोऽद्वैत' इति श्रुतिः ॥

८३३. द्वितीयाय –

आत्मनो भेदाभावे परमात्मन एव भोक्तृत्वं प्राप्तम् । तन्निवृत्त्यर्थं इदं नाम । परमात्मापेक्षया द्वितीयो जीवः । ननु तर्ह्यद्वैतत्वहानिः । न । परशिवापेक्षया द्वितीयवस्तुनः सर्वस्यापि मायिकत्वात् । 'माया मात्रमिदं द्वैतमद्वैतं परमार्थत' इति श्रुतेः ।

८३४. कल्पराजाय –

कल्पः संहारकालः, तस्य राजा, तदानीं रुद्ररूपेण सर्वसंहर्तृत्वात् ।

'तस्मा उपसंहर्त्रे महाग्रासाय वै नम' इति श्रुतिः ॥

८३५. भोगिने –

सुखदुःखानुभवो भोगः । सोऽस्यास्तीति भोगी । भोक्ता सर्वो जीवः तद्रूपी ।

'भोक्ता भोग्यं प्रेरितारं च मत्वा सर्वं प्रोक्तं त्रिविधं ब्रह्ममेत'दिति श्रुतेः ॥ यद्वा दिव्यभोगसम्पन्नो भोगी, परमेश्वरध्यानपूजादिना शिवलोकं प्राप्तः गणविशेषः ।

तदुक्तं शिवगीतायाम् —

मां पूजयति निष्कामः सदा ज्ञानविवर्जितः ।
स मे लोकं समासाद्य भुङ्क्ते भोगान्यथेप्सितान् ॥
ज्ञात्वा मां पूजयेद्यस्तु सर्वकामविवर्जितः ।
मया समानरूपःसन् मम लोके महीयते ॥

इष्टापूर्तानि कर्माणि मत्प्रीत्यै कुरुते तु यः ।
यत्करोति यदश्नाति यज्जुहोति ददाति यत् ॥
यत्तपस्यति तत्सर्वं यःकरोति मदर्पणम् ।
मल्लोके स श्रियं भुङ्क्ते मत्तुल्यप्राभवं भजन् ॥ इति ॥

'नमो गणेभ्यो गणपतिभ्यश्च' इति श्रुतिः ॥

८३६. सर्वभोगसमृद्धाय –

सर्वे भोगाः, भोगसाधनभूतदिव्यनृत्तगीतवादित्रादिरूपाः, दिव्यस्रक्चन्दनवस्त्रान्नपानादिरूपाश्च समृद्धाः सम्पूर्णा यस्य सः तथा । अयमर्थः **शिवरहस्यादौ** प्रसिद्धः ।

'सर्वैश्वर्यसम्पन्नः सर्वेश्वर' इति श्रुतिः ॥

८३७. साम्परायाय –

सम्परायः परलोकः कैलासादिः ध्यातः पूजितः स्तुतः कीर्तितः स्मृतो वा, तत्प्राप्तिसाधनभूत इति वा साम्परायः परमेश्वरः ।

पाद्मे —

ज्ञात्वा मां पूजयेद्यस्तु सर्वकामविवर्जितः ।
मया समानरूपः सन्मम लोके महीयते ॥ इति ॥

वायवीयसंहितायाम् —

न तत्तपोभिरत्युग्रैर्न च सर्वैर्महामखैः ।
गच्छेच्छिवपुरं दिव्यं मुक्त्वा भक्तिं शिवात्मिकाम् ॥
भक्त्या पञ्चाक्षरेणैव यः शिवं सकृदर्चयेत् ।
सोऽपि गच्छेच्छिवस्थानं शिवमन्त्रस्य गौरवात् ॥ इति ॥

तत्रैव —

"एककालं द्विकालं वा त्रिकालं नित्यमेव वा ।
येऽर्चयन्ति महादेवं विज्ञेयास्ते गणेश्वराः" इति ॥

'न साम्परायः प्रतिभाति बाल'मिति श्रुतिः ॥

८३८. **स्वप्रकाशाय** –

प्रकाशा(प्रमाणा)न्तरनैरपेक्ष्येण स्वयमेव प्रकाशत इति स्वप्रकाशः । **ब्रह्मकैवर्ते** —

"नमः स्वयंप्रकाशाय नमो मायाविभेदिने ।
नमो वेदान्तवेद्याय नमोऽनन्तसुखाय ते" इति ॥

'स्वयमीश्वरः स्वप्रकाश' इति श्रुतिः ॥

८३९. **स्वच्छन्दाय** –

स्वेच्छावृत्तिः स्वच्छन्दः, स्वतन्त्र इति यावत् ।

वासिष्ठे लैङ्गे – अरुन्धतीं प्रति शिवः —

"नागतोऽहं महाप्राज्ञे व्योमवत्सर्वगः सदा ।
तथापि मण्डलात्तस्मात्सौराद्वेदमयादहम् ॥
आगतो लीलया सार्धमनया धर्मचारिणि ।
स्वच्छन्दवृत्तिराचारो मम चास्याश्च सुन्दरि" इति ॥

तत्रैव **वसिष्ठं** प्रति शिवः —

"उमया सहितः शक्त्या मुने विद्यास्वरूपया ।
नग्नो नृत्तप्रियश्चाहं हसन् नदन् क्वचित्क्वचित् ।
स्वच्छन्दवृत्तिर्भिक्षार्थं देवदारुवनं गत" इति ॥

'शाश्वतोऽजोऽनन्यःस्वतन्त्र' इति श्रुतिः ॥

८४०. सुतन्तवे –

शोभनस्तन्तुः विस्तीर्णः प्रपञ्चः अस्येति सुतन्तुः ।

'विश्वं भूतंभुवनं बहुधा जातं जायमानं च यत् ।
सर्वो ह्येष' इति श्रुतिः ॥

८४१. सर्वज्ञमूर्तये –

सर्वज्ञा अनन्तकल्याणगुणविशिष्टा मूर्तिः तनुः यस्य सः तथा ।

'तस्यैते तनुवौ घोरान्या शिवान्या' इति श्रुतिः ॥

८४२. गुह्येशाय –

निधिं गुह्यन्तीति गुह्याः माणिभद्रादयः, तेषामीशो गुह्येशो धनदः तद्रूपत्वात् ।

'यो देवानां नामधा एक एवे'ति श्रुतिः ॥

यद्वा माणिभद्रप्रभृतिभिः प्रतिष्ठापितः लिङ्गरूपी गुह्येश्वरः ॥

'तवश्रिया' इति श्रुतिः' ॥

८४३. सुशान्तये –

शोभना नाशरहिता परमानन्दरूपा च (शान्तिः) शान्तिरूप-रतिस्वभावा च सुशान्तिः, नित्यमुक्तं ब्रह्मेत्यर्थः ।

'तेषां शान्तिःशाश्वती नेतरेषामि'ति श्रुतिः ॥

८४४. शारदाय –

शारदाः श्रुतिस्मृतीतिहासादिवाग्रूपाः अस्य सन्तीति शारदः, मत्वर्थीयाच्प्रत्ययान्तः ।

'ईशानः सर्वविद्याना'मिति श्रुतिः ॥

८४५. सुशीलाय –

शोभनं शीलं (यस्य सः) अस्यास्तीति सुशीलः ज्ञानवैराग्यतपः-सत्यादिदशकवान् ।

'यः सर्वज्ञः स सर्ववि'दिति श्रुतिः ॥

८४६. कौशिकाय –

कुशिकस्यापत्यं कौशिकः महर्षिः तद्रूपत्वात् ।

'विश्वाधिको रुद्रो महर्षिः' इति श्रुतिः ॥

८४७. धनाय –

धनं वस्त्रादि, यथा सर्वेषां प्रियमेवं परशिवोऽपि सर्वप्रत्यगात्म-त्वाद्धनवद्धनं प्रियतरत्वात् ।

'तदेतत्प्रेयः पुत्रात्प्रेयो वित्ता'दिति श्रुतिः ॥

८४८. अभिरामाय –

सर्वे सर्वत्र रमन्तेऽनेनेति अभिरामः । नित्यरमणीय इति यावत् ।

'एष ह्येवानन्दयाति' इति श्रुतिः ॥

८४९. तत्वाय –

परमार्थसत् ॥

"साक्षात्परतरं तत्वं स्वभावादेव निर्मलम् ।
उत्पत्त्यादिविनिर्मुक्तं स्वतन्त्रं पूर्णमद्वयमि"ति

पराशरोपपुराणे ॥

"यत्सर्वशास्त्रसिद्धान्तो यत्सर्वहृदयानुगम् ।
यत्सर्वं सर्वगं वस्तु यत्तत्त्वं तदसौ स्थितः" इति ॥

वासिष्ठे ॥

'तत्त्वं नारायणः पर' इति श्रुतिः ॥

८५०. व्यालकल्पाय –

व्यालः सर्पः परहिंसाद्योगवान् वा । तत्कल्पः तत्सदृशः व्यालकल्पः ।

यद्यपि परमेश्वरः सौम्यः तथापि शठानां दुष्टानां च व्यालवद्भासते वर्तते चेति यावत् ।

'तस्यैते तनुवौ घोरान्ये'ति श्रुतिः ॥

८५१. अरिष्टमथनाय –

अरिष्टान्यशुभानि । अरिष्टे तु शुभाशुभे इत्यमरः । तेषां तत्कारणानां च मथनः, कर्तरि ल्युट् ।

'अहींश्च सर्वाञ्जम्भयन्' इति श्रुतिः ॥

८५२. सुप्रतीकाय –

शोभनाः स्थिरतया चारवः, प्रतीकाः अवयवाः यस्य सः 'स्थिरेभिरङ्गैः पुरुरूप उग्र' इति श्रुतिः ॥

८५३. आशवे –

आशुः पीनः ।

'नम आशवे चे'ति श्रुतिः ॥

८५४. ब्रह्मगर्भाय –

ब्रह्मा पितामहः । यद्वा ब्रह्म–वेदाः, गर्भे यस्य सः ब्रह्मगर्भः ।

'यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मा' इति श्रुतिः ॥

८५५. वरुणाय –

वृणोत्याकाशादिकं सर्वमिति वरुणः परमेश्वरः ।

'येनावृतं खं च महीं चे'ति श्रुतिः ॥

८५६. अद्रये –

अद्रिः अद्रिवदप्रकम्प्यः, परैरचल इति यावत् ।

'तं शान्तमचलमिति श्रुतिः' ॥ यद्वा श्रीशैलारुणाचलादिपर्वत-रूपत्वादद्रिः ।

श्रीशैलशिखरं दृष्ट्वा पुनर्जन्म न विद्यते इति, काश्यां तु मरणान्मुक्तिः स्मरणादरुणाचलमिति च स्मरणात् ॥

वनानि शम्भुर्गिरयश्च शम्भुरिति **स्कान्दे** ।

'सर्वो ह्येष रुद्र' इति श्रुतिः ॥

८५७. **कालाग्निरुद्राय –**

प्रलयकालरुद्रः सर्वसंहारसमर्थः, ज्वलद्दावाग्निसन्निभः ।

भुसुण्डादिकं प्रत्युपदेशकर्ता कालाग्निरुद्रः ।

कालाग्निरुद्रं दूरस्थं ज्वलद्दावाग्निसन्निभमिति **पाद्मे** ।

"अथ कालाग्निरुद्रं भगवन्तं सनत्कुमारः पप्रच्छाधीहि भगवन् त्रिपुण्ड्रविधिमिति । स एतं भुसुण्डःकालाग्निरुद्रमगम"दिति च श्रुतिः ॥

८५८. **श्यामाय –**

कृष्णवर्णः श्यामः ।

'कृष्णपिङ्गलाये'ति श्रुतिः ॥

८५९. **सुजनाय –**

शोभना जना अगस्त्यगौतमप्रभृतयो भक्तत्वेन यस्य वर्तन्ते सः सुजनः ।

'प्रोवाच सम्यगृषिसङ्घजुष्टमि'ति श्रुतिः ॥

८६०. अहिर्बुध्न्याय –

अहये बुध्न्याय इति वक्तव्ये विभक्तिव्यत्यय आर्षः । इदं पदद्वयं सविशेषणमेकं नाम । बुध्न्यो मूलम् । मूलं बुध्न्योऽङ्घ्रि-नाम चेत्यमरः । तत्र बुध्ने ब्रह्माण्डमूलभूते पाताले साधुर्बुध्न्यः, पातालवर्तीति यावत् । तादृशोऽहिः सर्पः, शेष इति यावत् । शेषस्य चाव्यक्ततामसमूर्तित्वं रुद्रात्मकसङ्कर्षणाविर्भावस्थानत्वं च **श्रीविष्णुपुराणे**ऽभिहितम् । यथा —

"पातालानामधश्चास्ते विष्णोर्या तामसी तनुः ।
शेषाख्या तद्गुणान्वक्तुं न शक्ता दैत्यदानवाः ॥
कल्पान्ते यस्य वक्त्रेभ्यो विषानलशिखोज्ज्वलः ।
सङ्कर्षणात्मको रुद्रो निष्क्रम्यैतज्जगत्त्रयमि"ति ॥

'अहिर्बुध्निय मन्त्रं मे गोपाये'ति श्रुतिः ॥

८६१. जाराय –

ऋषिपत्नीनां पातिव्रत्यभङ्गकरत्वाज्जारः ।

स्कान्दे—"शिवस्य भिक्षाटनसमये शिवं प्रति –

आलोलकबरीभारा बाला मौक्तिकभूषणाः ।
भिक्षासमागतं दृष्ट्वा जग्मुस्तत्पार्श्वमागताः ॥

अन्याः काश्चन पद्माक्ष्यो गलत्काञ्चीगुणाम्बराः ।
पुष्पचापशराविद्धा निपेतुरुपरि क्षणात् ॥

सर्वास्तत्र तथाभूतास्तपोधनमनोरमाः ।
बालाश्च यौवनोन्मत्ताः प्रौढाश्च जरतीर्वने ॥

विमोह्य सुतरां तत्र शुभैर्भ्रूक्षेपणैः क्षणात् ।
विहस्य नितरामुच्चैरालोकति पिनाकिनी''ति ॥

'मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरमि'ति श्रुतिः ॥

यद्वा भक्तानां पापानि जरयति' इति जारः ।

'धर्मावहं पापनुदं भगेशमि'ति श्रुतिः ॥

८६२. दुष्टानां पतये –

दुष्टा रागद्वेषादिमन्तः, अतिक्रान्तधर्माः स्तेनतस्करस्तायुप्रभृतयः तेषां पतिः स्वामी, पापनाशकरो वा (दुष्टशिक्षको वा) दुष्टानां पतिः ।

'स्तेनानां पतये नम' इति श्रुतिः ॥

८६३. समयनाथाय –

समयः कालः तस्य नाथः ।

'कर्ताज्ञः कालकाल' इति श्रुतिः ॥

८६४. समयाय –

समयः कालः ।

'कालाय नम' इति श्रुतिः ॥

८६५. गुहाय –

गुहः स्कन्दः, तद्रूपत्वात् । यद्वा गुहा बुद्धिः, साऽस्याभिव्यक्तिस्थानत्वेनास्तीति मत्वर्थीयाच्प्रत्ययान्तः शब्दः ।

'यो वेद निहितं गुहायामि'ति श्रुतिः ॥

'यो वै रुद्रः स भगवान्यश्च स्कन्द' इति श्रुतिः ॥

८६६. दुर्लङ्घ्याय –

अस्याऽऽज्ञालङ्घनं कर्तुमशक्यमग्निवाय्वादीनामिति दुर्लङ्घ्यः ।

'भयादस्याग्निस्तपती'ति श्रुतिः ॥

८६७. छन्दस्साराय –

छन्दसां वेदानां सारत्वेन प्रतिपाद्यः छन्दस्सारः ॥

'सर्वे देवा यत्पादमामनन्ति' इति श्रुतिः ॥

८६८. दंष्ट्रिणे –

दंष्ट्रास्यास्तीति दंष्ट्री ।

"वज्रदंष्ट्रं त्रिणयनं कालकण्ठमरिन्दमम् ।
सहस्रकरमत्युग्रं वन्दे शाम्भुमुमापतिम्" इति ॥

सहस्रमुखदंष्ट्राकराल इति च प्रसिद्धम् ।

'तस्यैते तनुवौ घोरान्या शिवान्ये'ति श्रुतिः ॥

८६९. ज्योतिर्लिङ्गाय –

ज्योतीरूपमेव लिङ्गं ज्योतिर्लिङ्गम् ।

लीनमर्थं गमयतीति लिङ्गम्, जडप्रकाशकमिति ।

'चिन्तयन्नेवमात्मस्थं ज्योतिर्लिङ्गं सदाशिवमि'ति लैङ्गे ।

'अत्रायं पुरुषः स्वयंज्योतिरि'ति श्रुतिः ॥

८७०. मित्राय –

मित्रः सूर्यस्तद्रूपी ।

यो देवानां नामधा .... इति श्रुतिः । जगन्मित्रमिति वा, सर्वेषां प्रत्यगात्मत्वेन परमास्पदत्वात् ।

'प्रेयं पुत्रात्प्रेयो वित्तादि'ति श्रुतिः ॥

८७१. जगतां हितकारिणे –

जगच्छब्देन हितोपदेशयोग्याः प्राणिन उच्यन्ते । तेषां हितकारिणे । 'अहरहः सन्ध्यामुपासीत, न कलञ्जं भक्षयेत् न सुरां पिबेदित्यादिविधिनिषेधोपदेशनहितकरत्वाज्जनानां हितकरत्वाद्धितकारी । यद्वा सर्वप्राणिनां स्वप्रेरितवह्निवायुसूर्यादिरूपेण हितं नराणां करोति इति ।

'भीषास्माद्वातः पवत' इत्यादिश्रुतिः ॥

८७२. कारुण्यनिधये –

कारुण्यं कृपा अस्मिन्निधीयत इति कारुण्यनिधिः । अतिसुलभचुलुकजलदूर्वादितृणस्वीकारेण भोगमोक्षप्रदत्वात् ।

"दलं किञ्चित्समादाय चुलुकं जलमेव वा ।
यो दत्ते नियमेनासौ तस्मै दत्ते जगत्त्रयमि"ति ॥

शिवगीतायाम् ॥

'घृणिने कपर्दिन' इति श्रुतिः ॥

८७३. श्लोकाय –

श्लोको 'यतो वाचो निवर्तन्त' इत्यादिः, तेन लक्ष्यत्वेन (लभ्यत्वेन) प्रतिपाद्यत्वात् परमेश्वरोऽपि श्लोकः ।

'सर्वे वेदा यत्पदमामनन्ति' इति प्रस्तुत्य ओमित्येतत् एतद्ध्यक्षरं ब्रह्मेत्यादिवत् । अथवा श्लोकशब्दो मत्वर्थीयाच्प्रत्ययान्तः । श्लोकोऽस्यास्ति प्रतिपादकत्वेनेति श्लोकः । (श्लोकशब्दस्य कीर्तिवाचकत्वं 'पुण्यश्लोको नलो नामे'त्यादिवत् प्रसिद्धम् । मत्वर्थीयाच्प्रत्ययान्तत्वं स्वीकृत्य श्लोकः यशस्वी सर्वविख्यातः परशिव इति ।) श्रुतिरुक्तैव ॥

८७४. जयशालिने –

सर्वत्र विजयी जयशाली ।

'जेतारमपराजितमि'ति श्रुतिः ॥

८७५. ज्ञानोदयाय –

ज्ञानस्य उदयः येनाराधितेन परमेश्वरेण स ज्ञानोदयः । 'ज्ञानं महेश्वरादिच्छेदिति' स्मरणात् ।

"यस्य देवे पराभक्तिर्यथा देवे तथा गुरौ ।
तस्यैते निखिला ह्यर्थाः प्रकाशन्ते महात्मन" इति श्रुतिः ॥

८७६. बीजाय –

बीजं भूतसूक्ष्ममव्याकृतादिशब्दवाच्यं जगत्कारणम् ।

'स कारणं कारणाधिपाधिप' इति श्रुतिः ॥

८७७. जगद्विभ्रमहेतवे –

जगद्विभ्रमस्य मायामयस्य हेतुः, पारमार्थिकानुष्ठानरूपः ।

'मायामात्रमिदं द्वैतमद्‌वैतं परमार्थत' इति श्रुतेः ॥

मिथ्याजगदधिष्ठानेति ब्रह्माण्डपुराणे ॥

८७८. अवधूताय –

परित्यक्त(ा) वास्तवसर्वप्रपञ्चोऽवधूतः ।

'अथात आदेशो नेति नेह नानास्ति किञ्चनेत्यादि' श्रुतिः ॥

८७९. शिष्टाय –

महाप्रलय एक एव सन् सर्वोपसंहारानन्तरं परिशिष्य इति । उक्तं च वासिष्ठे —

"न शोकोऽस्ति न मोहोऽस्ति न जन्मास्ति जरादयः ।
यदस्तीह तदेवास्ति विज्वरो भव राघवे"ति ॥

'न निरोधो न चोत्पत्तिर्न बन्धो न च साधकः ।
न मुमुक्षुर्नवै मुक्त इत्येषा परमार्थतः' इति श्रुतिः ॥

८८०. छन्दसां पतये –

छन्दसां गायत्र्युष्णिगनुष्टुब्बृहतीपङ्क्तित्रिष्टुप्जगत्यात्यादीना-मुपलक्षणमेवैतत्, यजुषां लौकिकवचसां च तद्वाच्यभूतानां च पतिः, तत्कारणत्वेन सर्वात्मकत्वादोङ्कारस्य ।

'ओमित्येतदक्षरमिदं सर्वमोङ्कार एवेदं सर्व' इत्यादि श्रुतेः । एवं परमेश्वरोऽपि ओङ्कारः ।

'एतद्वै सत्यकामः परं चापरं च ब्रह्म यदोङ्कार' इतिश्रुतेः ॥

८८१. फेन्याय –

नदीमध्यगतं यत्फेनं तदुत्पन्नम्, तत्र भवः । फेन्यः तदर्हतीति वा ।

'नमः शष्प्याय च फेन्याय चे'ति श्रुतिः ॥

८८२ गुह्याय –

गुह्यो गोप्यः । अभक्तान्प्रत्युपदेशानर्हः ।

हन्त न इदं प्रवक्ष्यामि गुह्यं ब्रह्मे'ति श्रुतिः ॥

८८३. सर्वबन्धविमोचिने –

सर्वेषां बन्धानां बन्धहेतूनां पाशरूपाणामविद्यास्थितरागद्वेषादीनामहमस्मीति प्रत्यगात्मत्वेन ज्ञातः सन् विमोचकः सर्वबन्धविमोची ।

'ज्ञात्वा देवं सर्वपाशापहानिः । क्षीणैः क्लेशैः जन्ममृत्युप्रहानिरि'ति श्रुतिः ॥

८८४. उदारकीर्तये –

उदारा उत्कृष्टा—श्रुतिस्मृतीतिहासपुराणलोकेषु एष सर्वज्ञ एषोऽन्तर्यामी एष योनिरित्यादिना प्रथिता कीर्तिः यस्य सः उदारकीर्तिः ।

८८५. शश्वत्प्रसन्नवदनाय –

शश्वत् सर्वदा प्रसन्नं प्रसादयुक्तस्वरूपनिरतिशयपरमानन्दानुभवप्रयुक्तं वदनं यस्य स तथा ।

नीलग्रीवं शरच्चन्द्रचन्द्रिकावद्विराजितम् ।
गोक्षीरधवलाकारं चन्द्रबिम्बसमाननम् ॥
सुस्मितं सुप्रसन्नं च स्वात्मतत्त्वैकसंस्थितम् ।
गङ्गाधरं शिवं शान्तं लसत्केयूरमण्डितम् ॥ इति ॥

'आनन्दो ब्रह्मेति व्यजानादि'ति श्रुतिः ॥

८८६. वसवे —

वसतीति वसुः । जातावेकवचनम् —

"धर्मो ध्रुवश्च सोमश्चापश्चैवानलोऽनिलः ।
प्रत्यूषश्च प्रभातश्च वसवोऽष्टावुदीरिताः ॥" इति

भविष्योत्तरपुराणे ॥ तद्रूपत्वाद्वसुः । सर्वत्र सर्वदा पूर्णो वसतीति वा ।

'तेनेदं पूर्णं पुरुषेण सर्वमि'ति श्रुतिः ॥

८८७. वेदकाराय —

विद्येते धर्मब्रह्मणी एभिरिति वेदाः आम्नायाः तान् करोति निःश्वसितरूपतया उच्चारयति इति वेदकारः ।

'अस्य महतो भूतस्येत्या'दि श्रुतिः ॥

८८८. भ्राजिष्णुजिष्णवे —

भ्राजते प्रकाशत इति भ्राजिष्णुः, जयशीलः । भ्राजिष्णुश्चासौ जिष्णुश्च भ्राजिष्णुजिष्णुः । स्वप्रकाशः सर्वोत्कृष्टत्वं च सर्वदेशसर्वकालसर्ववस्तुव्यापित्वम् ।

'सत्यं ज्ञानमनन्तं ब्रह्मे'ति श्रुतिः ॥

८८९. चक्रिणे –

जलन्धरवधार्थं स्वपादाङ्गुष्ठेन निर्मितं चक्रमस्यास्तीति चक्री ।

आदित्यपुराणे — विष्णुं प्रति शिवः

"आविर्भूतो महादेवो मण्डलात्तिग्मदीधितेः ।
कोटिसूर्यप्रतीकाशस्त्रिणेत्रश्चन्द्रशेखरः ।
शूलटङ्कगदाचक्रकुन्तपाशधरो विभुः ।
वरदाभयपाणिश्च सर्वाभरणभूषितः" ॥ इति प्रस्तुत्य ॥

"दिव्यं ददामि ते चक्रमद्भुतं यत्सुदर्शनम् ।
जलन्धरवधार्थाय निर्मितं यन्मया पुरा ।
गृहीत्वा तद्रणे दैत्याञ्जहि विष्णो ममाज्ञया ।
एवमुक्त्वा ददौ चक्रं सूर्यायुतसमप्रभम् ।
नेत्रं च पद्मसदृशं विष्णवे प्रभविष्णवे" इति ॥

'नमः स्वायुधाय चे'ति श्रुतिः ॥

८९०. देवदेवाय –

देवानां ब्रह्मादीनामपि देवः अधिपःदेवदेवः ।

"देवदेव महादेव जगत्कारणकारण ।
अनादिमध्यनिधन नमस्तुभ्यं महेश्वरे"ति **पाद्मे** ॥

'तं देवानां परमं च दैवतमि'ति श्रुतिः ॥

८९१. गदाहस्ताय –

गदा हस्ते यस्य स गदाहस्तः ।

श्रुतिश्च 'चक्रिण' इति नाम्न्युक्तैव ॥

८९२. पुत्रिणे –

विघ्नेश्वरस्य सर्वपूज्यत्वाद्विष्ण्वादिपराक्रमतुल्यगणानां पतित्वात्सकलविघ्ननिरासकत्वात् सर्वज्ञत्वाद्ब्रह्मादिपतित्वाच्च ।

"गणानां त्वा गणपतिं हवामहे कविं कवीनामुपमश्रवस्तमम् । ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पते" इति श्रुतिः ।

स्कन्दस्यापि लोकोत्तरसौन्दर्यशौर्यवीर्यगाम्भीर्यवत्वान्महायोगित्वेन प्रसिद्धसनत्कुमारस्यापि श्रुतौ "तं स्कन्द इत्याचक्षत" इति स्कन्दत्वेन श्रुतत्वात् ब्रह्मादीन्प्रति अतिकण्टकत्वेन प्रसिद्धतारकशूरपद्मादिविनाशकत्वादेवं महाशास्तुर्दुष्टभूतप्रेतपिशाचादिनिग्राहकत्वात्सर्वाभीष्टफलप्रदत्वाच्च । एवं ललितोपाख्यानादिषु परमेश्वरापत्यानि द्रष्टव्यानि । तस्मात्परमेश्वरस्यैव पुत्रवत्त्वम् ।

'लम्बोदरायैकदन्ताय विघ्ननाशिने शिवसुताये'ति श्रुतिः ॥
'वैष्णवीं स्कन्दमातरमि'ति च ॥

८९३. पारिजातसुपुष्पाय –

पारिजातः देवतरुः । पञ्चैते देवतरवो मन्दारः पारिजातकः । सन्तानः कल्पवृक्षश्च पुंसि वा हरिचन्दनमित्यमरः । तथा च पारिजातपदं देवतरूणामुपलक्षणम् । एवं च पारिजातोपलक्षितदेवतरुसम्बन्धीनि शोभनानि सद्योविकसितादीनि दिव्यपरिमलमकरन्दयुक्तानि मलयमारुतात्स्ववृन्ताच्चलितानि घुमुघुमायमानानि पुष्पाणि देव्या सह सुरतरूद्याने विहरणसमये स्वाङ्गे पतितानि यस्य सः पारिजासुपुष्पः । उक्तं च भाष्यकारैः —

"मन्दारकल्पहरिचन्दनपारिजात-
मध्ये शशाङ्कमणिमण्डपवेदिसंस्थ" इति ॥

"सुधासिन्धोर्मध्ये सुरविटपिवाटीपरिवृते
मणिद्वीपे नीपोपवनवति चिन्तामणिगृहे" इति च ॥

'सुगन्धिं पुष्टिवर्धनमि'ति श्रुतिः ॥

८९४. गणाधिपतये –

गणानां वीरभद्रनन्दिभृङ्गिमहाकालप्रभृतीनां पतिः परिवृढः ।

'नमो गणेभ्यो गणपतिभ्यश्चे'ति श्रुतिः ॥

८९५. सर्वशाखाधिपतये –

ऋग्वेदस्यैकविंशतिः शाखाः, यजुर्वेदस्य शतसङ्ख्याकाः सामवेदस्य सहस्रसङ्ख्याकाः, अथर्ववेदस्य नवतिसङ्ख्याकाः । एतासां शाखानामधिपतिः । निःश्वसितपदप्रयत्नेन परमेश्वरादुत्पन्नत्वात् ॥

'अस्य महतो भूतस्येत्यादि श्रुतेः ॥ अतः सर्वशाखाधिपतिः ॥

८९६. प्रजनेशाय –

प्रकृष्टा जनाः प्रजना भक्ताः, दधीचिप्रभृतयः । नन्दिभृङ्ग्यादयो वा, तेषामीशः । ज्ञानवैराग्यदानादिना क्रीडासल्लापादिना चानुग्राहकत्वात् । यद्वा प्रकृष्टा जना ब्रह्मादयः तेषामीशः, सृष्टिस्थितिसंहाराद्यधिकारप्रदत्वात् ।

'तमीश्वराणां परमं महेश्वरमि'ति श्रुतिः ॥

८९७. सूक्ष्मप्रमाणभूताय –

सूक्ष्ममाकाशादि, तच्च तत्प्रमाणं च सर्वप्रकाशकम् । आत्मनः सूक्ष्मत्वं "इन्द्रियेभ्यः परा ह्यर्था" इत्यारभ्य "पुरुषान्न परं किञ्चित्सा काष्ठा सा परागतिः" । इत्यन्तेन प्रतिपादितम् । अतः सूक्ष्मप्रमाणं सूक्ष्मप्रमाणस्वरूपं सूक्ष्मप्रमाणभूतं प्रत्यक्षानुमानादीनां यथा प्रमाणत्वमवगम्यते न तथाऽऽत्मनः प्रमाणत्वं गम्यते ।

'परमसूक्ष्मत्वात् सर्वस्य साक्षी'ति श्रुतिः ॥

८९८. सुरपार्श्वगताय

इन्द्रादिपक्षपाती सुरपार्श्वगतः ।

इदं च **स्कान्दे** प्रसिद्धम् ।

"पुरा सुराणां सर्वेषामसुराणां दुरात्मनाम् ।
महामोहेन सङ्ग्रामः सञ्जातो दुर्निवारकः ॥
असुरैः पीडिता देवा बलवद्भिःसुरा भृशम् ।
तद् दृष्ट्वा भगवानीशः सर्वज्ञः करुणाकरः ॥
देवानां विजयं देवो ह्यसुराणां पराभवम् ।
ददौ तेन सुरैः शीघ्रं असुरास्तु पराजितः" ॥ इति ॥

'ब्रह्म ह देवेभ्यो विजिग्य' इति श्रुतिः ॥

८९९. अशरीरशरीराय –

न विद्यते शरीरं यस्य तदशरीरं ब्रह्म ।
अशरीरं शरीरेष्वनवस्थेष्ववस्थितम् ॥

महान्तं विभुमात्मानमि'ति श्रुतेः । तदेव शरीरं यस्य सोऽशरीर-शरीरः ।

'अशरीरो निरिन्द्रियोऽप्राण' इति श्रुतेः ॥

यद्वा वस्तुतस्त्वशरीरोऽपि भक्तानुग्रहार्थमिच्छया शरीरवान् । अस्मिन् पक्षे शरीरशब्दो मत्वर्थीयाच्प्रत्ययान्तः । तदुक्तं सुप्रभेदे —

"यतीनां मन्त्रिणां चैव ज्ञानिनां योगिनां तथा ।
ध्यानपूजानिमित्तार्थं तनुं गृह्णाति चेच्छये''ति ॥

परमेश्वरस्याशरीरत्वे सशरीरत्वे च ।

"तदादिमध्यान्तविहीनमेकं
विभुं चिदानन्दमरूपमद्भुतम् ।
उमासहायं परमेश्वरं प्रभुं
त्रिलोचनं नीलकण्ठं प्रशान्तम् ।
ध्यात्वा मुनिर्गच्छति भूतयोनिं
समस्तसाक्षी तमसः परस्तादि''ति श्रुतिः ॥

१००. अपगल्भाय —

अपगल्भोऽप्रौढो बालः ।

'नमो मध्यमाय चापगल्भाय चे'ति श्रुतिः ॥

॥ इति नवमशतकविवरणम् ॥

९०१. सुकेशाय –

शोभनाः केशाः यस्य सः सुकेशः नीलकेशः नित्ययुवेति यावत् ।

'स्तुहिश्रुतं गर्तसदं युवानमि'ति श्रुतिः ।

९०२. सुपुष्पाय –

शोभनानि पुष्पाणि भक्तैरभ्यर्चितानि नीलोत्पलादीनि यस्य सः तथा । अनेन नाम्ना शोभनपुष्पगन्धादिभिः परमेश्वरः पूज्य इत्युक्तं भवति । **शैवे** —

"दुर्लभं प्राप्य मानुष्यं येऽर्चयन्ति पिनाकिनम् ।
तेषां तु सफलं जन्म कृतार्थास्ते नरोत्तमाः ॥ इति ॥
यावन्नायाति मरणं यावन्नाक्रमते जरा ।
यावन्नेन्द्रियवैकल्यं तावत्पूज्यो हि शङ्करः" ॥ इति ॥

'ब्रह्म देवेभ्यो विजिग्य इति प्रस्तुत्य किमिदं यक्षमि'त्यादि श्रुतिः ॥
यक्षं-पूज्यम् ॥

९०३. श्रुतये

शब्दविषया श्रोत्रजन्या या मनोवृत्तिः तत्प्रकाशिका चैतन्यस्वरूपा श्रुतिः ॥

'न हि श्रोतृश्रुतेर्विपरिलोपो विद्यत' इति श्रुतिः ॥

१०४. पुष्पमालिने –

नीलोत्पलादिभिराचिता भक्तैर्भृत्यैर्वा समर्पिता माला यस्य सः (अस्य सन्तीति) पुष्पमाली ।

श्रुतिरुक्ता ॥

१०५. मुनिध्येयाय –

मुनिभिर्मननशीलैर्योगिभिर्हृदयादौ सदा ध्येयः । मुनिध्येयः । **आदित्यपुराणे** भानुः —

> आत्मभूते महादेवे योगिध्येये सनातने ।
> भक्तिमास्थाय परमां परं निर्वाणमाप्नुहीति ॥

'योगिध्येयं परं पदमि'ति श्रुतिः ॥

१०६. मुनये –

मननान्मुनिः सर्वदा स्वात्मानुसन्धानपरत्वात् ॥

स्वात्मतत्वसुखस्फूर्तिः प्रमोदात्ताण्डवप्रिय इति **स्कान्दे** ॥

'विश्वाधिको रुद्रो महर्षिरि'ति श्रुतिः ॥

१०७. बीजसंस्थमरीचये –

बीजसंस्थो मरीचिः तत्तुल्य इत्यर्थः ।

इदं च नाम परमेश्वरस्य सर्वाधिष्ठानत्वात् सर्वात्मकत्वात् सर्वावभासकत्वाच्च किमित्यवभासो न स्यादित्याशङ्कानिवृत्यर्थम् । यथा भानुसम्बन्धो मरीचिः सर्वव्यापी, सर्वप्रकाशकः स चेद्बीजादिषु

तिरोहितस्तदा न प्रकाशते एवमुक्तलक्षणः परमशिवः जगद्बीज-स्थानीयमायया तिरोहितः सन्नविदुषां न प्रकाशते । अनेक-जन्माराधितपरमेश्वरानुग्रहवतां पुरुषधौरेयाणां सर्वाधिष्ठानतया सर्वात्मतया सर्वप्रकाशकतया प्रत्यगात्मत्वेन च सदा करतलामलक-वद्भासते । उक्तं च **स्कान्दे** —

तमहम्प्रत्ययव्याजात्सर्वे जानन्ति जन्तवः ।
तथापि शिवरूपेण न विजानन्ति मोहिताः ॥

प्रसादादेव रुद्रस्य श्रुत्युत्पन्नात्मविद्यया ।
बहूनां जन्मनामन्ते जानन्त्येव शिवं बुधाः ॥ इति

बीजसंस्थमरीचिरित्यभूतोपमा ।

तिलेषु तैलं दधिनीव सर्पि-
राप: स्रोतस्स्वरणीषु चाग्निः ।
एवमात्मात्मनि गृह्यतेऽसौ
सत्येनैनं तपसा योऽनुपश्यति ॥

'सर्वव्यापिनमात्मानं क्षीरे सर्पिरिवार्पितम्' इति श्रुतिः ॥

१०८. चामुण्डाजनकाय —

चण्डश्च मुण्डश्च–चण्डमुण्डौ असुरौ । तौ वध्यत्वेन अस्याःस्त इति चामुण्डा । अत्र **देवीमाहात्म्ये** —

"यस्माच्चण्डं च मुण्डं च गृहीत्वा त्वमुपागता ।
चामुण्डेति ततो लोके ख्याता देवि भविष्यसि" ॥ इति ॥

चण्डमुण्डा तु चामुण्डा इति नैघण्टुकाः । पृषोदरादित्वात्साधु । तस्या जनकः चामुण्डाजनकः ।

यद्यपि **देवीमाहात्म्ये** सुम्भनिसुम्भवधार्थं देव्याः शरीरकोशात् निर्गता कौशिकीति समाख्याता नारायणीति स्तुता या देवी तस्या निटिलादुत्पन्ना इयं कालीति च समाख्याता तथापि —

"न शिवेन विना शक्तिर्न शक्तिरहितः शिवः ।
उमाशङ्करयोरैक्यं यः पश्यति स पश्यति" ॥ इति

शिवपुराणवचनात् देवीशिवयोरभिन्नत्वाद्देव्या कृतं शिवेन कृतमितीदं नाम प्रवृत्तम् ।

'सर्वे वै देवा देवीमुपतस्थुः, कासि त्वं महादेवी । साब्रवीदहं ब्रह्मस्वरूपिणी । मत्तः प्रकृतिपुरुषात्मकं जगत्' इति श्रुतिः ॥

९०९. कृत्तिवाससे –

कृत्तिः दारुकावनस्थमुनिकृताऽऽभिचारोत्पन्नव्याघ्रस्य चर्म वासो यस्य स तथा ।

अथवा काश्यां शिवभक्तजिघांसयागतस्य गजासुरस्य कृत्तिरत्र विवक्षिता ।

'प्राणेश्वरः कृत्तिवासाः पिनाकी'ति श्रुतिः ॥

९१०. व्युप्तकेशाय –

मुण्डितकेशो व्युप्तकेशः यजमानमूर्तिः । यद्वा मुण्डितकेशो व्युप्तकेशः, पाशुपतादिवेषेण कपर्दित्वं यत्यादिवेषेण मुण्डितकेशत्वम् ।

'नमः कपर्दिने च व्युप्तकेशाय चे'ति श्रुतिः ॥

८११. योग्याय -

योगः समाधिः, तदर्हः; तेन ज्ञातुं योग्यः । योगिध्येय इत्यर्थः ।

'योगिध्येयं परं पदमि'ति श्रुतिः ॥

८१२. धर्मपीठाय -

धर्माणां ज्ञानादीनां अनश्वराणां पीठमाधारः । ज्ञानादिमानिति यावत् । तदुक्तं **पुराणे** —

ज्ञानं विरागमै(तै)श्वर्यं तपः सत्यं क्षमा धृतिः ।
स्रष्टृत्वमात्मसंबोधो ह्यधिष्ठातृत्वमेव च ।
अव्ययानि दशैतानि नित्यं तिष्ठन्ति शङ्करे ॥ इति ॥

'एष सर्वेश्वर एष सर्वज्ञ' इत्यादिश्रुतिः ॥

८१३. महावीर्याय -

महत्सु मेरौ धनुषि, मौर्व्यां सर्पराजे, नारायणात्मकशरसन्धाने पटीयः वीर्यं सामर्थ्यं यस्य सः तथा । यद्वा महद्ब्रह्माण्डप्रकृतिभूतं वीर्यं तेजो यस्य स तथोक्तः ।

८१४. दीप्ताय -

दीप्तः प्रकाशरूपः ।

'दीप्ताय दीप्तरूपिण' इति श्रुतिः ॥

अत एव ससर्जादौ तासु वीर्यमुपासृजत् ।
तदण्डमभवत् हैमं सहस्रादित्यसन्निभम् ॥ इति ॥

रुद्रो वै क्रूरः इति प्रथमार्थे श्रुतिः । क्रूरो बलवान् । द्वितीयार्थे तु संरक्षते लोकान् इति ।

'स इमाल्लोकानसृजते'ति श्रुतिः ॥

९१५. बुद्धाय –

बोधस्वभावो बुद्धः । प्रपञ्चासंस्पृष्टः इत्यर्थः ।

'नित्यः शुद्धो बुद्धः सत्य' इति श्रुतिः ॥

९१६. अशनये –

अशनिर्वज्रं तद्वत्सर्वभयङ्करः । सर्वेषां मर्यादातिक्रमेण शिक्षकत्वात् ।

'महद्भयं वज्रमुद्यतमि'ति श्रुतिः ॥

९१७. विशिष्टेष्टाय –

वसिष्ठादयः शिष्टाः, तदपेक्षया विशेषेण शिष्टो विशिष्टः । इष्टश्च परमप्रेमास्पदत्वात् (विशेषेण शिष्टः विशिष्टः, विशिष्टश्चासौ शिष्टश्च विशिष्टः) ।

'आत्मनस्तु कामाय सर्वं प्रियं भवती'ति श्रुतेः ॥

अथवा विशिष्टा इदानीन्तनशिष्टापेक्षया शिष्टा वसिष्टगौतमादयस्ते इष्टाः प्रिया यस्येति "प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः" इति भगवद्वचनात् ॥

'यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा वृणुते तनुं स्वामि'ति श्रुतिः

९१८. सेनान्ये

सेनाः सङ्घाता देवमनुष्यासुररक्षोयक्षपिशाचकिन्नरविद्याधरादयः, पृथिव्यादयस्तत्त्वसङ्घाताश्च तासां स्वस्वाधिकाररूपेण स्वामित्वेन नेता सेनानीः । यद्वा सङ्ग्रामेषु सेनां नयतीति तद्रूपी ।

'नमो हिरण्यबाहवे सेनान्य' इति श्रुतिः ॥

९१९. द्विपदे –

द्वौ पादौ यस्य स द्विपात् । एकेन पादेन सर्वाज्ञानभूतापस्मारस्य निगृहीतत्वात् अन्येन सर्वसंहर्तृयमस्य निगृहीतत्वात्स एव परमेश्वरो द्विपात् । अन्ये तु चतुष्पात्पशुतुल्या ब्रह्मादयः । 'ब्रह्माद्याः स्थावरान्ताश्च पशवः परिकीर्तिताः' इति वचनात् ॥ तथा च ब्रह्मादीनां पशुस्थानीयत्वात् पशुपालनवत्परमेश्वरस्य पशुपतित्वाद् द्विपात्त्वम् ।

'पशूनां पतये नम' इति श्रुतिः ॥

९२०. कारणानां कारणाय –

जगत्कारणत्वेन प्रसिद्धानां विराड्ढिरण्यगर्भेश्वराणां ब्रह्मविष्णु-रुद्राणां वा कारणमुत्पादकः । **स्कान्दे** —

"ब्रह्मा विष्णुश्च रुद्रश्च परतत्वविभूतयः ।
तेषां त्रयाणामधिकः सर्वकारणमीश्वर" इति ॥

'यः कारणानि निखिलानि तानि कालात्मयुक्तान्यधितिष्ठत्येक' इति श्रुतिः ॥

९२१. भगवते –

निरतिशयैश्वर्यसम्पन्नो भगवान् ।

"ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः ।
ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणा" ॥ इति
उत्पत्तिं च विनाशं च भूतानामागतिं गतिम् ।
वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति ॥

'सर्वव्यापी स भगवान् तस्मात्सर्वगतःशिवः' इति श्रुतिः ॥

९२२. बाणदर्पहराय –

बाणस्य बाणासुरस्य दर्पं गर्वं श्रीकृष्णद्वारा हरतीति बाणदर्पहरः । इदं च हरिवंशभागवतादौ प्रसिद्धम् ।

'कृष्णाय पिङ्गलाये'ति श्रुतिः ॥

९२३. अतीन्द्रियाय –

इन्द्रियागोचरत्वादतीन्द्रियः ।

"हृत्पुण्डरीकान्तरसन्निविष्टं
स्वतेजसा व्याप्तनभोऽवकाशम् ।
अतीन्द्रियं सूक्ष्ममनन्तमाद्यं
ध्यायेत्परानन्दमयं महेशम्" ॥

इति ब्रह्मोत्तरखण्डे ॥

न चक्षुषा गृह्यते नापि वाचा,
नान्यैर्देवैस्तपसे'ति श्रुतिः ॥

देवैः—इन्द्रियैः ॥

९२४. रम्याय –

सुखरूपत्वाद्रम्यः ।

यो वै भूमा तत्सुखमि'ति श्रुतिः ॥

९२५. जनानन्दकराय –

जनानामानन्दं करोतीति जनानन्दकरः ।

'एष ह्येवानन्दयाती'ति श्रुतिः ॥

९२६. सदाशिवाय –

सदा–सर्वकालेषु वर्तमानः सदाशिवः ।

किं कदाचित्–कोऽपि शिवोऽस्ति । यद्वा वृत्तये सदेति विशेषणम् । अस्त्येव(वं) वायवीयसंहितायाम् ॥

"आयुषोऽत्र निमेषाख्यमादिमानं प्रचक्षते" । इति प्रस्तुत्य

"चतुर्युगसहस्रं यस्य कल्प इति कथ्यते" ।

इति प्रसिद्धं कल्पपरिमाणमुक्त्वा

कल्पो नाम दिवा प्रोक्तो ब्रह्मणोऽव्यक्तजन्मनः ।
कल्पानां वै सहस्रं च ब्राह्मो वर्ष इहोच्यते ॥
वर्षाणामष्टसाहस्रं यच्च तद्ब्रह्मणो युगम् ।
सवनं युगसाहस्रं ब्रह्मणः पद्मजन्मनः ॥
सवनानां सहस्रं च गुणितं त्रिविधं तथा ।
कल्प्यते सकलःकालो ब्रह्मणःपरमेष्ठिनः ॥
तस्यैकदिवसे यान्ति चतुर्दश पुरन्दराः ।
शतानीमानि चत्वारि विंशत्या सहितानि च ॥

चत्वारिंशत्सहस्राणि पञ्चलक्षाणि चायुषि ।
ब्रह्मा विष्णुदिने चैको विष्णू रुद्रदिने तथा ॥

ईश्वरस्य दिने रुद्रः सदाख्यः स तथेश्वरः ।
साक्षाच्छिवस्य तत्सङ्ख्यस्तथा सोऽपि सदाशिवः ॥
तस्मिन् साक्षाच्छिवेनैव कालात्मा सम्प्रवर्तते" ॥ इति ॥

अयमर्थः — कल्पः प्रसिद्धः । तादृशकल्पसहस्रमेको वत्सरः । तादृशवत्सराणामष्टसहस्राण्येकं युगम् । तादृशयुगसहस्र(मे)एकं सवनम् । तादृशसवनसहस्राणि त्रिगुणानि सन्ति । त्रिविधानि नवसङ्ख्याकानीति यावत् । सहस्रस्य प्रथमं त्रैगुण्ये त्रीणि सहस्राणि, ततस्तस्यास्त्रिसहस्राः । पुनस्त्रैगुण्ये नवसहस्रपर्यवसानात् । एवं च तादृशसवनानां नवसहस्राणि ब्रह्मणः परमायुः । तादृशब्रह्मपरमायुः विष्णोरेकं दिनम् । तादृशविष्णुपरमायुः रुद्रस्यैकं दिनम् । तादृशरुद्रपरमायुः महेश्वरस्यैकं दिनम् । तादृशमहेश्वरस्य परमायुः सदाशिवस्यैकं दिनम् । तादृशसदाशिवस्य परमायुः परमशिवस्यैकं दिनम् । परमशिवस्य कालकृतपरिच्छेद एव नास्ति । अत एव प्रदेशान्तरेऽपि तत्रैव,

"कालावच्छेदयुक्तानां गुरूणामप्यसौ गुरुः ।
सर्वेषामेव सर्वेशः कालावच्छेदवर्जित" ॥

यद्यप्युदाहृतवचनैः सदाशिवस्यापि कादाचित्कत्वमागतमिति सदेति विशेषणान्वयः । तथापि ब्रह्माद्यपेक्षया अधिककालवर्तित्वेन ब्रह्मादिकालेषु सदावर्तत इति तदभिप्रायो बोध्यः । परमशिवो केवलयौगिको द्रष्टव्यः । न च तस्यापि कालावच्छेदोऽस्त्येव, सदाशिवस्य परमायुः परमशिवस्यैकं दिनमिति परिच्छिन्नव्यवहार-

योगात् इति वाच्यम् । दिनव्यवहारवदिति क्षुद्रःकाल इत्यौपचारिकतया प्रवृत्तत्वात् । अत एवोक्तं तत्रैव किञ्चिदुत्तरतः –

अहर्न विद्यते तस्य न रात्रिरिति धारयेत् ।
उपचारस्तु क्रियते लोकानां हितकाम्यया ।। इति

सनत्कुमारसंहितायाम् ।।

ईशानः सर्वविद्यानां भूतानामहमीश्वरः ।
ब्रह्माधिपो ब्रह्मणश्च ब्रह्मा सोऽहं सदाशिवोमिति ।।

'ब्रह्मा शिवो मे अस्तु सदाशिवोमि'ति श्रुतिः ।।

१२७. सौम्याय –

सोमो भवानीपतिः । तेनानन्यः सौम्यः, प्रियदर्शनो वा ।

'प्राजापत्यं सूक्ष्मं सौम्यमि'ति श्रुतिः ।।

१२८. चिन्त्याय –

चिन्तार्हश्चिन्त्यः परमानन्दरूपत्वात् ।

तथा च परमशिव एव कर्मेन्द्रियज्ञानेन्द्रियमनोबुध्यहङ्कारनिरोधपूर्वकं धारणाध्यानसमाधिभिः साक्षात्कर्तव्य इत्यर्थः ।

तदुक्तं **मनुना** —

"कर्मेन्द्रियाणि संयम्य पञ्च बुद्धीन्द्रियाणि च ।
दशेन्द्रियाणि मनसि (ह्य) अहङ्कारे तथा मनः ।।
अहङ्कारं तथा बुद्धौ बुद्धिमात्मनि योजयेत् ।
यतो बुद्धीन्द्रियः पश्यन्बुध्या बुध्येत्परात्परमि"ति ।।

'न चिन्त्यं चिन्त्यमेव तदि'ति श्रुतिः ।।

९२९. शशिमौलिने (लये) –

शशी चन्द्रः मौलौ यस्य सः शशिमौलिः ।

'नमश्चन्द्रललाटाये'ति श्रुतिः ॥

९३०. जातुकर्णाय –

जतुकर्णस्य महर्षेरपत्यं जातुकर्णः (?) तद्रूपत्वात् ।

'विश्वाधिको रुद्रो महर्षिरि'ति श्रुतिः ॥

९३१. सूर्याध्यक्षाय –

सूर्यस्य अध्यक्षः पालयिता ।

'एतस्य वा अक्षरस्य प्रशासने, सूर्याचन्द्रमसौ विधृतौ तिष्ठत' इति श्रुतेः ॥

९३२. ज्योतिषे –

ज्योतिः प्रकाशरूपत्वात् ।

'प्राणेषु हृदयं तज्ज्योतिःपुरुष' श्रुतिः ॥

९३३. कुण्डलीशस्य वरदाय –

कुण्डलीशः सर्पराजः शेषः, स पतञ्जलिरूपः सन् परमेश्वर-नटनदर्शनार्थं तिल्ववननामके पुण्डरीकपुराख्ये तपः कृतवान् । तं प्रति नटनदर्शनपूर्वकं वरदानार्थमाविर्बभूवेति **चिदम्बरमाहात्म्यादौ** प्रसिद्धम् ।

'तमीशानं वरदं देवमीड्यमि'ति श्रुतिः ॥

९३४. अभयाय –

भयरहितोऽभयः ।

'अभयं तितीर्षतां पारमि'ति श्रुतिः ॥

९३५. वसन्ताय –

वसन्त्यस्मिन्सुखमिति वसन्तः पुष्पसमयः । तद्रूपत्वात् ।

'कालाय नम' इति श्रुतिः ॥

९३६. सुरभये –

सुष्ठु रभते आरभते तृप्तिमिति सुरभिः । घ्राणतर्पणो गन्धः तद्रूपी ।

'सर्वो वै रुद्र' इति श्रुतिः ॥

यद्वा — सुष्ठु रभते आरभते भक्तान्प्रति मङ्गलमिति ।

'अन्नादो वसुदान' इति श्रुतिः ॥

९३७. जयारिमथनाय –

जययुक्ता अरयः जयारयः, त्रिपुरजलन्धरादयः, तान् मथ्नाति नाशयति इति जयारिमथनः ।

'जेतारमपराजितमि'ति श्रुतिः ॥

९३८. प्रेम्णे –

प्रेम सर्वेषां प्रियत्वात् । भावभवित्रोरभेदविवक्षया प्रिय इत्यर्थः ।

'सर्वस्मात्प्रियतम आनन्दघन' इति श्रुतिः ॥

९३९. पुरञ्जयाय

पुरं त्रिपुरं, जयतीति पुरञ्जयः ।

'तेषामसुराणामि'ति श्रुतिः ॥

९४०. पृषदश्वाय –

पृषदश्वो वायुः, पृषदाख्यो मृगोऽश्वो यस्य सः पृषदश्वः । पृषन्त्यम्बुकणास्तान्यश्वो यस्येति वा । श्रुतिरुक्तैव ॥

९४१. रोचिष्णवे –

प्रमाणं विना सदा प्रकाशशीलो रोचिष्णुः ।

'प्रकाशः प्रकाशेभ्य' इति श्रुतिः ॥

९४२. असुरजिते –

शास्त्रीयप्रकाशवृत्त्यभिभवनाय प्रवृत्ताः स्वाभाविक्यस्तमआत्मिका इन्द्रियप्रवृत्तयोऽसुराः तान् जयतीति असुरजित् । "नहि स्वात्मारामं विषयमृगतृष्णा भ्रमयती"ति न्यायोपबृंहितशिवरहस्यवचनात् ।

'अनिच्छोऽलेपोऽव्यग्र' इति श्रुतिः ॥

९४३. श्वेतपीताय –

श्वेतः सर्वाङ्गे ललाटनेत्रे पीतो यस्य स श्वेतपीतः ।

"गोक्षीरसदृशाकारः कुन्देन्दु(धवल) सदृशः परः ।
संसारभयभीतानामेकेनैवाभयप्रद" ॥ इति स्कान्दे ॥

'नमो नीलग्रीवाय शितिकण्ठाय नमो नमः कृष्णपिङ्गलाये'ति श्रुतिः ॥

१४४. चञ्चरीकाय –

चञ्चरीको भृङ्गः, भृङ्गो यथा पुष्पास्वादनपरः, एवं परशिवोऽपि भक्तभक्तिरसास्वादनपरः । यद्वा गौरीमुखाम्भोजाधररसमधुपानलम्पटः ।

'यमेवैष वृणुते तेन लभ्यः, पक्षान्तरेऽम्बिका पतय' इति श्रुतिः ॥

१४५. तमिस्रमथनाय –

तमिस्रमन्धकारः, तन्मथ्नातीति तमिस्रमथनः, सूर्यः । तद्रूपी

'सूर्यायादित्याये'ति श्रुतिः । यद्वा तमिस्रं नाम अज्ञानं, तन्मथ्नाति, वेदान्तमहावाक्यजन्यवृत्त्यारूढः सन्नाशयति इति ।

'निचाय्य (विचार्य) तन्मृत्युमुखात् प्रमुच्यत' इति श्रुतिः ॥

१४६. प्रमाथिने –

भक्तजनविरोधिबलजातमविद्यां च प्रमथ्नातीति प्रमाथी ।

'बलप्रमथनाय नम' इति श्रुतिः ॥

१४७. निदाघाय —

नितरां दह्यतेऽनेनेति निदाघः ग्रीष्मः, निदाघवत्प्रलयकाले सर्वप्राणिदाहकत्वान्निदाघः परमेश्वरः ।

'तस्मादुपसंहर्त्रे महाग्रासाय वै नम' इति श्रुतिः ॥

९४८. चित्रगर्भाय -

चित्रा अनेकभेदभिन्ना आकाशादिरूपाः प्रपञ्चाः गर्भे यस्य सः चित्रगर्भः ।

'एतस्माज्जायत प्राण इति (इत्यादि) श्रुतिः ।

९४९. शिवालयाय -

शिवानां मङ्गलानामालयः स्थानम् । भक्तानां सर्वाभीष्टप्रदत्वात् ।

'एतं हि सर्वाणि वामान्यभिसंयन्ति' इति श्रुतिः ॥

९५०. स्तुत्याय -

स्तुत्यः स्तोत्रार्हः ।

आदरेण यथा स्तौति धनवन्तं धनेच्छया ।
तथैव विश्वकर्तारं को न मुच्येत बन्धनात् ॥

तमुष्टुहि इति ।

'यः स्विषः सुधन्वा यो विश्वस्य क्षयति भेषजस्य । यक्ष्वामहे सौमनसाय रुद्रं नमोभिर्देवमसुरं दुवस्येति' श्रुतिः ॥

९५१. तीर्थदेवाय -

तरन्त्येभिः पापानि इति तीर्थानि, शास्त्रपुण्योदकक्षेत्रपात्रादीनि

तीर्थं मन्त्राद्युपाध्यायशास्त्रेष्वम्भसि पावने ।
पात्रोपायावतारेष्विति "वैजयन्ती" ।

तेषु द्योतते इति तीर्थदेवः ॥

'नमस्तीर्थ्याय चे'ति श्रुतिः ॥

९५२. पत्तीनां पतये –

एको रथो गजश्चैको नराः पञ्च पदातयः ।
त्रयश्च तुरगास्तदज्ञैः पत्तिरित्यभिधीयत ॥ इति ॥

तासां (पत्तीनां) पतिः स्वामी तद्रूपी । पादचारिणो योधाः पत्ति-शब्दवाच्याः । तेषां पालको वा ।

'पत्तीनां पतय नमः' इति श्रुतिः ॥

९५३. विचित्रशक्तये –

विचित्रा विविधाः ब्रह्मादिस्थावरान्ताः कार्यानुमेयाः शक्तयो यस्य सः तथा ।

'परास्य शक्तिर्विविधैव श्रूयत' इति श्रुतिः ॥

९५४. निस्तुलरूपाय —

उपमारहितस्वरूपो निस्तुलरूपः स्वस्य सच्चिदानन्दपरिपूर्ण-रूपत्वात् । अशनायापिपासादिरहितत्वाच्च । स्वान्यस्य बद्धजीव-समुदायस्य अशनायापिपासादिमत्त्वान्मुक्तात्मनां तु स्वापेक्षया भेदा-भावात् । अचेतनात्मकस्य गिरिनदीसमुद्रादेरनृतजडदुःखपरिच्छिन्न-स्वरूपत्वात्तस्मात्स्वसमानवस्त्वन्तराभावादत एवाधिकवस्त्वन्तराभावः ।

'न तत्समश्चाभ्यधिकश्च दृश्यत' इति श्रुतिः ॥

९५५. सवित्रे –

सवितृरूपेण जगदनुग्रहं कुर्वन् परमात्मा सवितेत्युच्यते । अथवा सर्वजगतः प्रसविता जनयिता सविता ।

'नृचक्षसमि'ति श्रुतिः ॥

१५६. तपसे –

अत्र तपःशब्देन परमेश्वरस्य जगत्सृष्टौ सहकारकारिणीभूता मायावृत्तिः सङ्कल्पात्मिकोच्यते । तया तद्वान्परमेश्वरो लक्ष्यते । तत्र श्रुतिः — "स तपोऽतप्यत । स तपस्तप्त्वा । इदं सर्वमसृजत" इति ॥ यद्वा तपःशब्दवाच्यचित्तैकाग्र्यपर्यालोचन-प्राप्यत्वात् ब्रह्मणः, ब्रह्म तपःशब्देन लक्ष्यते ।

'तपसा ब्रह्म विजिज्ञासस्व । तपो ब्रह्मेति' इति श्रुतेः ॥ 'मनसश्चेन्द्रियाणां च ह्यैकाग्र्यं परमं तप' इति स्मरणाच्च ॥

१५७. अहङ्कारस्वरूपाय –

अहङ्कारस्याभिमानात्मकस्य प्रथमाध्यासभूतस्य स्वरूपं, तस्या-धिष्ठानत्वेन तत्सत्तास्फूर्तिप्रदत्वात् । यद्वा अहङ्कारस्वरूप एव परमेश्वरः ।

नन्वहङ्कारस्याध्यस्तत्वात् कथमिदं–अहमश्चातुर्विध्यात् ।

तदुक्तं वासिष्ठे —

आपादमस्तकमहं मातापितृविनिर्मितः ।
इत्येको निश्चयो राम बन्धायासविलोकनात् ॥

अतीतः सर्वभावेभ्यो वालाग्रादप्यहं तनुः ।
इति द्वितीयो मोक्षाय निश्चयो जायते सताम् ॥

जगज्जालपदार्थात्मा सर्वमेवाहमक्षयः ।
तृतीयो निश्चयश्चेत्थं मोक्षायैव रघूद्वह ॥

अहं जगद्वा सकलं शून्यं व्योमसमः सदा ।
एवमेव चतुर्थोऽपि निश्चयो मोक्षसिद्धये ॥

एतेषां प्रथमः प्रोक्तः तृष्णया बन्धयोग्यया ।
शुद्धतृष्णात्रयः शुद्धा जीवन्मुक्तिविलासिनः ।

सर्वमात्माहमेवेति निश्चयो यो महामते ।
तमादाय विषादाय न भूयो जायते मतिः इति ॥

अयं भावः — तत्र आपादमस्तकमहमेवेति प्रथमः । सर्वातीतः परमसूक्ष्मोऽहमिति द्वितीयः । सर्वात्मकोऽहमिति तृतीयः । अहमिति जगदिति सकलं शून्यमेवातो व्योमवत् सकलविकल्पातीतोऽहमिति चतुर्थः । एतेषां मध्ये प्रथमो बन्धाऽयोग्यः । तृष्णाप्रोतत्वा-द्बन्धायैव । अन्ये तु त्रिविधाः शुद्धतृष्णार्जितत्वात् जीवन्मुक्तेष्वेव विलसन्ति । उपादेयेष्वपि त्रिषु सर्वात्मकोऽहमिति निश्चयः श्रेयानित्याह । सर्वमहं चात्मैवेति यो निश्चय इत्यन्वयः । अत एवोक्तं सूतगीतायाम्—पञ्चमाध्याये—ब्रह्मविष्ण्वादीन्प्रति ईश्वरः —

"अहं हि सर्वं न च किञ्चिदन्य-
न्निरूपणायामनिरूपणायाम् ।
इयं हि देवस्य परा हि निष्ठा
ममानुभूतिश्च न संशयश्च ॥

अहं तथाऽधश्च तथाहमूर्ध्वं
त्वहं पुरस्तादहमेव पश्चात् ।
अहं च सर्वोत्तरमास्तिकस्तथा
त्वहं सदेवोदितमन्तरं बहिः" इति ॥

अथातोऽहङ्कारादेश एवाहमेवाधस्तादहमुपरिष्ठादहं पश्चादहं पुरस्तादि त्यादि । देवा हि सर्वे स्वर्गं लोकमगमन् तदेव रुद्रमपृच्छन्

कोभवानिति, सोऽब्रवीत् "अहमेकः"। प्रथममासंवर्तमिह भविष्यामि । न चान्यः कश्चिन्मत्तो व्यतिरिक्तोऽस्ति । इति श्रुतिः ॥

९५८. मेघाधिपतये –

मेघस्य वारिवाहस्याधिपतिस्तत्रान्तर्यामिरूपेण स्थित्वा वृष्ट्यर्थं प्रेरकत्वान्मेघाधिपतिः ।

'यामिषुं गिरिशन्तहस्त' इति श्रुतिः ॥

अस्यायमर्थः — गिरिः कैलासः तत्राविर्भूतः प्राणिनां शं तनोतीति गिरिशन्तः । यद्वा गिरिर्मेघः, तत्र स्थितः पर्जन्यरूपेण शं तनोतीति भट्टभास्करैः व्याख्यातम् ॥

९५९. अपाराय –

अवधिरहितोऽपारः ।

'अनन्तमपारमि'ति श्रुतिः ॥

९६०. तत्वविदे –

तत्त्वं सर्वं जगत्स्वरूपं सामान्यतो विशेषतश्च वेत्तीति तत्त्ववित् ।

'यः सर्वज्ञः स सर्वविदि'ति श्रुतिः ॥

९६१. क्षयद्वीराय –

क्षयन्ति निवसन्ति वीरा वीरभद्रादयो यमाश्रित्य स क्षयद्वीरः ; यं प्राप्य वीराः क्षयन्ति संक्षयन्ति इति वा ।

'इमं रुद्राय तवसे कपर्दिने क्षयद्वीराये'ति श्रुतिः ।

९६२. पञ्चास्याय

पञ्च आस्यानि मुखानि यस्य सः तथा ।
पञ्चवक्त्रत्वं सदाशिवरूपस्य परमेश्वरस्य पुराणागमादिषु प्रसिद्धम् ।

'ब्रह्मा शिवो मे अस्तु सदाशिवो'मिति श्रुतिः ॥

९६३. अग्रगण्याय –

अग्रे गण्यते इत्यग्रगण्यः – सर्वेश्वरत्वसर्वज्ञत्वादौ ।

'तमीश्वराणां परमं महेश्वरमि'ति श्रुतिः ॥

९६४. विष्णुप्राणेश्वराय –

विष्णोः प्राणाः विष्णुप्राणाः । उपलक्षणमेतत् इन्द्रादिप्राणानाम् । तेषामीश्वरः ॥ तदुक्तं **स्कान्दे** कमलालयमाहात्म्ये –

"ततः कदाचिद्बलिनः कालेया इति विश्रुताः ।
दानवा अपि देवानां पीडां चक्रुः समन्ततः ॥"

इति प्रस्तुत्य ।

अथ भग्नान् सुरान् दृष्ट्वा दानवैर्मधुसूदनः ।
आरुह्य गरुडं तूर्णं कालप्रभुमुपाद्रवत् ।

ततः सुदर्शनं चक्रं दैत्याय मुरशासनः ।
मुमोच सहसा क्रुद्धो ज्वालामालासमावृतम् ।

सोऽपि तच्चक्रमाहृत्य वासुदेवकरेरितम् ।
अब्रवीच्च महादैत्यस्तिष्ठ तिष्ठेति चाब्रवीत् ।

ततो विष्णुं समुद्दिश्य सायकान् ज्वलनोपमान् ।
मुमोच दैत्यस्तैर्विद्धो निश्चेष्टोऽभवदच्युतः ॥

एतस्मिन्नन्तरे स्थित्वा भगवांस्त्रिपुरान्तकः ।
दृष्ट्वा हरिं तथाभूतं चक्रं चापि पराङ्मुखम् ।

सद्यः शूलप्रहारेण तं निहत्य दनोः सुतम् ।
शरैः पिनाकनिर्मुक्तैर्जघानोच्चैस्तथा परान् ।

ततो हतप्रधानास्ते दानवा भयविह्वलाः ।
पलायनपरा जाता निरुत्साहा द्रवन्ति ते ॥

ततो विष्णुश्च शक्रश्च लब्धसंज्ञो तदा युधि ।
प्रणम्य तु महादेवं किञ्चिद्व्रीळासमन्वितौ" इति ॥

'प्राणेश्वरः कृत्तिवासाः पिनाकी'ति श्रुतिः ॥

९६५. अगोचराय –

इन्द्रियाविषयत्वादगोचरः ।

'न चक्षुषा गृह्यते वापि वाचा
नान्यैर्देवै'रिति श्रुतिः ॥

९६६. याम्याय –

यमलोके पापिनां शिक्षकरूपेण भवो याम्यः ॥

९६७. क्षेम्याय –

क्षेमो मोक्षः, तमर्हतीति क्षेम्यः ।

'नमो याम्याय च क्षेम्याय चे'ति श्रुतिः ॥

९६८. बडवाग्नये –

बडवाया अग्निरनलः बडवानलः, तद्रूपी ।

'पावकाय पावकवर्णाये'ति श्रुतिः ॥

९६९. विक्रमाय –

सर्वान् लोकान् विशेषेण क्रमते इति विक्रमः । अथवा विक्रमः शौर्यं स अस्यास्तीति विक्रमः । मत्वर्थीयाच्प्रत्ययान्तः ।

'आभित्वा शूर नो नुम' इति श्रुतिः ॥

'पादोऽस्य विश्वाभूतानि, त्रिपादस्यामृतं दिवि' इति च श्रुतिः ।

९७०. स्वतन्त्राय –

सृष्टिस्थितिसंहारेषु अन्यानपेक्षः ।

९७१. स्वतन्त्रगतये –

स्वतन्त्रा स्वेच्छानुरूपा गतिः, विषयेषु गमनव्यापारो यस्य सः स्वतन्त्रगतिः ।

मार्कण्डेयस्य षोडशसंवत्सरमायुर्दत्वा पुनरनेककल्पपरिमितमायुर्दत्तं, ऋषिपत्नीमोहनं, ब्रह्मपञ्चमशिरश्छेदनं सर्वेषां देवादीनां महायागे हवनमित्येवमादि पुराणप्रसिद्धम् ।

'शाश्वतोऽजोऽनन्यः स्वतन्त्र' इत्युभयत्र श्रुतिः ।

९७२. बनानां पतये –

वनानां अरण्यानां श्मशानानां पतिःपालकः ।

'वनानां पतये नम' इति श्रुतिः ॥

९७३. जमदग्नये –

जमतीति ज्वलनः, जमदग्निः ज्वलदग्निः । तत्सदृशः ऋषि-(मुनि)रपि जमदग्निः ।

"वसिष्ठःकाश्यपोऽत्रिश्च जमदग्निश्च गौतमः ।
विश्वामित्रो भरद्वाजः सप्तैते ऋषयोऽभवन्" इति ॥

किञ्च, निखिलक्षत्रियवरोपसंहारपरो नारायणावताररूपः परशुरामो यस्य कुमारः । यश्च जमदग्निः पुष्टिकामश्चतूरात्रेणायजत, (यौ) विश्वामित्रजमदग्नी वसिष्ठेनास्पर्धेतां स एतज्जमदग्निर्हव्यमपश्यदिति च श्रुतिप्रसिद्धः । एवंभूतः परमर्षिः जमदग्निः । तद्रूपी ॥

'विश्वाधिको रुद्रो महर्षिरि'ति श्रुतेः ॥

यद्वा जमदग्निः ज्वलदग्निः कालाग्निरुद्रः ॥

"कालाग्निरुद्रं दूरस्थं ज्वलद्दावाग्निसन्निभम्" ।

इति पाद्मे ॥

यद्वा – सर्वतः पाणिपादाब्जं विश्वतोऽक्षिशिरोमुखम् ।
ज्वलन्तं विश्वमावृत्य तेजोराशिं शिवं स्मरेदिति ॥

शिवरहस्ये ॥

'तेजोदास्त्वमस्यग्ने वर्चोदास्त्वमसि सूर्यस्य द्युम्नोदास्त्वमसि चन्द्रमस' इति श्रुतिः ॥

१७४. अनावृताय –

अविद्यादिभिरावृतो न भवतीत्यनावृतः ।

'निरस्ताविद्यातमोमोह' इति श्रुतिः ॥

१७५. मुक्ताय –

मुक्तः पारवश्यरहितः ।

'नित्यशुद्धाय बुद्धाय मुक्ताय सुखरूपिणे' इति नित्यशुद्धो बुद्धो मुक्त इति श्रुतिः ॥

१७६. मातृकापतये -

मातॄणां (मातृकाणां) ब्राह्मयादीनां पतिः स्वामी ॥

ब्राह्मी मां चतुराननावतु सदा माहेश्वरी शूलिनी
कौमारी वरशक्तिषण्मुखवती श्रीवैष्णवी चक्रिणी ।
वाराही हलशूलपाशामुसला वज्रायुधैन्द्री तत-
श्चामुण्डा गजवक्त्रशस्त्रसहितास्ताः पान्तु मां मातरः ॥ इति परमेश्वरपरिवारत्वेन प्रसिद्धाः ब्रह्माण्डपुराणे ॥

'सर्वाँल्लोकानीशत ईशिनीभिः' इति श्रुतिः ॥

यद्वा मातृकाणां अकारादिवर्णानां पञ्चाशत्सङ्ख्याकानां पतिःवाच्यः श्रीकण्ठादिरूपेण शर्वः पूर्णोदर्यादिरूपेण शक्तिरपि वाच्या । मातृकायाः सूक्ष्मभूतपरापश्यन्त्यात्मना निष्कलपरशिवोऽपि इति मातृकापतिः ।

तदुक्तं सूतसंहितायाम् यज्ञवैभवखण्डे चतुर्थाध्याये —

यथा परतरः शम्भुर्द्विधा शक्तिशिवात्मना ।
तथैव मातृकादेवी द्विधा भूता भवेत्स्वयम् ।

एकाकारेण शक्तेस्तु वाचकश्चेतरेण तु ।
शिवस्य वाचकः साक्षाद्द्विधेयं पदगामिनी ॥

अपादं पदमापन्नं पदं चाप्यपदं भवेत् ।
पदापदाविभागं च यः पश्यति स पश्यति ॥

अस्य व्याख्या तात्पर्यदीपिका लिख्यते– ननु अक्षरात्मिकाया मातृकाया एकरूपाया एव कथं श्रीकण्ठादिमूर्तिप्रतिपादकत्वं, पूर्णोदर्यादिशक्तिमूर्तिप्रतिपादकत्वं च तत्राह – यथा परतरं इति, उत्तरादपि परो निष्कलः यश्च परतरः स यथा – स्वप्रतिष्ठितेन रूपेण निष्कलः शिवः, यश्च परतरः स यथा - स्वप्रतिष्ठितेन रूपेण निष्कलः शिवः कार्याभिमुखेन शक्तिप्रतियोगिनीरूपकेण शक्तिरिति द्विरूपो जातः ।

एवमियं पञ्चाशदक्षरात्मिका मातृकापि स्वकारणतया स्वानुगतशिवप्राधान्येन शिवमूर्तीनां तथाविधशक्तिप्राधान्येन च शक्तिमूर्तीनां अपि प्रतिपादिका किं न स्यादित्यर्थः ।

ननु सा मातृका वाङ्मनसातीतशिवशक्त्यात्मकपरमशिवस्वरूपं कथं प्रतिपादयेत् इत्यत आह –अपदं पदमापन्नमिति । पद्यते प्राप्यत इति पदम् । इन्द्रियगोचरं वस्तु । अपदं अविषयं वाङ्मनसातीतं सच्चिदानन्दमखण्डैकरसं परशिवस्वरूपम् विदुषः पुरुषस्य पदं भवेत् । अपदस्य अपदनीयस्य वाङ्मनसागोचरस्य प्रागुक्तशिवस्वरूपस्य प्रतिपादयित्री भवतीत्यर्थः । अविषयमपि तत्स्वरूपं अविद्योपादाने विषयीकृत्य प्रकाशयति । मातृकाविद्या स्वविषयावरणभूतामविद्यां समूलमुन्मूलयन्ती यथोदीरितपरशिवस्वरूपं विदुषः स्वात्मतया प्रतिपादयतीत्यर्थः ।

यद्वा—अपदमपदात्मकं शब्दब्रह्म तत्परापश्यन्तीमध्यमावैखरीत्येवं पदं जातम् । अस्ति हि परापश्यन्त्यवस्थस्यापि पदाभिधेयता । श्रूयते हि—चत्वारि वाक्परिमिता पदानीति । तत्पदं सम्यग्ज्ञातं मूलभूतशब्दब्रह्मकारणत्वेन अवगमयेत् तत्प्राप्तिहेतु भवतीत्यर्थः ।

इत्थमुक्तं पदापदं यो जानाति स एव परशिवस्वरूपं साक्षात्करोति इति तत्रैवान्यत्र ।

"मातृकाधारभूताय मातृकामूलरूपिणे ।
महामन्त्रैकवाच्याय महसे ब्रह्मणे नमः" इति ॥

मातृकाधारेति—परशिवविवर्तरूपत्वान्मातृकायास्तां प्रति तस्य शिवस्याधारत्वम् । मातृकामूलेति—मातृकामूलं शब्द ब्रह्म तदुपादानतया तद्रूपिणे ॥ महामन्त्रेति-मातृकामन्त्रादुद्धृताः प्रणवहृल्लेखाद्यक्षरादयो मन्त्रास्तेषां पृथक्पृथग्वाच्यास्तत्तद्देवतामूर्तयः तद्द्वारा चिदानन्दैकरसः शिव एक एव तात्पर्येण प्रतिपाद्यते इति ॥

'तं त्वौपनिषदं पुरुषमित्यात्मतो वागात्मतो नामे'ति श्रुतिः ॥

९७७. **बीजकोशाय** –

बीजानां जगत्कारणानां ब्रह्मविष्णुरुद्राणां कोश आधारभूतस्तत्कारणत्वात् ।

'ब्रह्मविष्णुरुद्रेन्द्रास्ते सम्प्रसूयन्त' इति श्रुतिः ।

यद्वा बीजमव्याकृताकाशं कोशः आवरणभूतो यस्य । यथा खड्गादेः दारुचर्मादिनिर्मिते कोशे विद्यमानत्वेऽपि तल्लेपराहित्यमेवं प्रपञ्चकारणाव्याकृताकाशादिशब्दवाच्ये तत्सत्तास्फूर्तिप्रदत्वेन तदधिष्ठानत्वेन विद्यमानत्वेऽपि तेन साकं वास्तवसम्बन्धरहितः ।

"सिद्धान्तोऽध्यात्मशास्त्राणां सर्वापह्नव एव हि ।
नाविद्यास्तीह नो माया शान्तं ब्रह्मेदमक्लमम् ॥"

इति वासिष्ठे ॥

'नेह नानास्ति किञ्चन तदेतद्ब्रह्मापूर्वमनपरमि'ति श्रुतिः ॥

१७८. दिव्यानन्दाय –

दिव्यः विषयसम्बन्धरहितः स्वयं प्रकाशमानो वा, आनन्द स्वरूपत्वेन यस्य सः दिव्यानन्दः ।

'विज्ञानमानन्दं ब्रह्मे'ति श्रुतिः ॥

१७९. विश्वदेवाय –

विश्वस्य सर्वस्य देवोऽधिपतिः प्रकाशको वा ।

'एष सर्वेश्वरः सर्वस्य साक्षी'ति श्रुतिः ॥

१८०. शान्तरागाय –

शान्त उपरतः रागः इच्छा यस्य सः तथा ।

ज्ञानं विरागतेति ज्ञानवैराग्ययोश्चेति परमेश्वरधर्मे पठितत्वात् ।

'अनिच्छोऽलेपोऽव्यग्र' इति श्रुतिः ।

१८१. विलोचनसुदेवाय –

लोकापेक्षया विशेषयुक्तानि त्रीणि पञ्चदशसङ्ख्याकानि विलोचनानि यस्य सः विलोचनः । शोभनो देवः सुदेवः, परमेश्वर्यादि

सम्पन्न उमास्कन्दादियुक्तश्च । विलोचनश्चासौ सुदेवश्च विलोचन-सुदेवः ।

'उमासहायं परमेश्वरं प्रभुं त्रिलोचनं नीलकण्ठं प्रशान्तमि'ति श्रुतिः ॥

९८२. हेमगर्भाय –

हेम गर्भे यस्य स हेमगर्भः । हिरण्यरेतस्त्वाद्धिरण्यगर्भत्वम् । हिरण्यरेतस्त्वं च स्कान्दे प्रसिद्धम् ।

'नमो हिरण्यबाहवे हिरण्यपतय' इति श्रुतिः ॥

९८३. अनाद्यन्ताय –

न विद्येते आद्यन्तौ यस्य सोऽनाद्यन्तः । उत्पत्तिनाशरहित इत्यर्थः ।

'अनाद्यनन्तमहं परं ध्रुवमि'ति श्रुतिः ॥

९८४. चण्डायनाथाय –

सविशेषणमेकं नाम । चण्डःक्रोधयुक्तः, नाथः शासकः, चण्डनाथ उग्रशासन इति यावत् ।

'भीषास्माद्वातः पवत' इति श्रुतिः ॥

९८५. ज्ञानस्कन्दाय –

भक्तेभ्यो ज्ञानामृतरूपेण स्कन्दति स्रवति इति स्कन्दः । भक्तानां ज्ञानोपदेष्टेति यावत् ।

'ईशानः सर्वविद्यानामि'ति श्रुतिः ॥

९८६. तुष्टाय –

परमानन्दैकरूपत्वात्तुष्टः ।

'विज्ञानमानन्दं ब्रह्मेति श्रुतिः ॥

९८७ कपिलायमहर्षये –

एतत्पदद्वयविशिष्टमेकं नाम । महांश्चासावृषिश्च महर्षिः योगबलात्सर्वज्ञः, कपिलो नामतः कपिलनामको महर्षिः, साङ्ख्य-शास्त्रप्रवर्तकः सगरपुत्राणां प्रतप्ता, वासुदेवावतार इति च पुराणे प्रसिद्धः, तद्रूपी ।

'विश्वाधिको रुद्रो महर्षिरि'ति श्रुतिः ॥

९८८. त्रिकाग्निकालाय –

त्रित्वविशिष्टोऽग्निस्त्रिकाग्निः, गार्हपत्यो दक्षिणाग्निराहवनीय श्चेति श्रुतिप्रसिद्धः ।

'जाठराग्निर्भूताग्निर्दैवताग्निरित्यादिरूपश्चासौ कालश्च पावकाय पावकरूपिण' इति श्रुतिः ॥

'कालाय नम' इति च श्रुतिः ॥

९८९. देवसिंहाय –

देव्यत इति देवः, स्वयंप्रकाशः, सिंहः, 'षिङ्बन्धन' इति धातोःरूपं सिः इति ।

कार्यकारणसम्बन्धस्य स्वस्य सर्वदृश्यसम्बन्धो वा तं सम्बन्धं तत्वमस्यादिवाक्यवृत्त्यारूढः सन्नसौ परमेश्वरः हन्ति नाशयति इति सिंहः इत्युच्यते । 'ह' इति हनहिंसागत्योरित्यस्य रूपम् । अत्र सिंह; पृषोदरादित्वात्साधुः । देवश्चासौ सिंहश्च देवसिंहः । चक्षुःश्रोत्रं क उ देवो युनक्ति सिंहोऽसौ परमेश्वरः इति च श्रुतिः । यद्वा पुरुषसिंह इतिवद्देवसिंहः देवश्रेष्ठः ।

'तं देवानां परमं च देवमि'ति श्रुतिः ॥

९९०. मणिपूराय –

मणिपूराख्यः षट्चक्रमध्ये, नाभिस्थानीयः दशदलकश्चक्रविशेषः । अकारात्मकब्रह्मस्वरूपेण विद्यमानस्य परमेश्वरस्याभिव्यक्तिस्थानविशेषः । अत्र मणिपूरकशब्दो मत्वर्थीयाच्प्रत्ययान्तः ॥

स्कान्दे —

अन्ये च योगिनो विप्रा आमनन्ति शिवस्य तु ।
आधारेषु शरीरेऽस्मिन्लिङ्गानि परमात्मनः ॥

अधोमुखमनाद्यन्तमपिण्डं पिण्डसंश्रितम् ।
ज्वलत्कालानलप्रख्यं स्वयम्भु ब्रह्मसंज्ञितम् ॥

मध्यमस्थं महामन्त्रैरर्चनीयं तु योगिभिः ।
गुरूपदेशतो ज्ञेयं लिङ्गमेकं प्रकीर्तितमि'ति ॥

अस्य **तात्पर्यदीपिका** लिख्यते —

विश्वप्रकाशकत्वेन वा विश्वाधिष्ठानत्वेन वा परशिव एव मुख्य-लिङ्गमित्युक्तम् । तस्यैव परशिवस्योपासनार्थमौपाधिकानि रूपाणि

श्रुत्यनुसारादागमानुसारात् वा लिङ्गतया व्यवहारवतां मतमाह — अन्ये चेति ॥ मूलाधारो, मणिपूरकः अनाहतः आज्ञा द्वादशान्तः षोडशान्तश्चेति अस्मिन्शरीरे आधाराः शिवस्योपासनास्थानानि । अष्टवितस्तिपरिमितस्य शरीरस्य वितस्तिचतुष्टयानन्तरं मूलाधारः । तत्त्रिगुणसामान्योपाधिकं परतत्वलिङ्गं उपासनीयम् । नाभौ मणिपूरकः । तत्र देवपरतत्वं रजोगुणोपाधिकं सृष्टिव्यापारं ब्रह्म-संज्ञिनमुपासनीयम् । हृदये अनाहतम् । तत्र सत्वगुणोपाधिकं जगत्पालनव्यापारं विष्णुसंज्ञितम् । भ्रूमध्ये आज्ञा, तत्र तमोगुणो-पाधिक तदेव तत्वं संहारव्यापारं रुद्रसंज्ञितम् । ब्रह्मरन्ध्रं द्वादशान्तम् । तत्र तदेव तत्वं साक्षिरूपम् । ततः पश्चाच्चतुरङ्-गुलानन्तरं षोडशान्तम् । तत्र तदेव तत्वं स्वप्रतिष्ठं लिङ्गस्वरूप-मुपासनीयमित्युक्तम् । उत्तरतापनीये ॥

उत्तरतापनीयोपनिषदि —

मूलाग्नावग्निं संदध्यादित्यारभ्य लिङ्गरूपान् एव सम्पूजयेदि-त्युक्तम् । अतस्तामुपनिषदमागममनुसरन्तश्च योगिनः अस्मिन् शरीरे उक्तेष्वाधारेषु यथोदितलिङ्गानि आमनन्तीत्यर्थः । तत्र मणिपूरक उपासनीयस्य ब्रह्मलिङ्गस्य स्वरूपमाहाधोमुखमिति यदनाद्यन्तं स्वयम्भु स्वप्रतिष्ठमपिण्डमशरीरं ब्रह्मसंज्ञितम् । परं तत्वं तदेव पिण्डसंज्ञितम् । पिण्डेन स्थूलशरीरेण समष्टिरूपेण उपाधिना सम्बन्धात् प्राप्तपरिपालनाय प्राजापत्यादिनामकम् । संज्ञा सञ्जाता अस्येति संज्ञितम् । तारकादित्वादितच् ।

ज्वलत्कालानलप्रख्यं स्वर्णवर्णमधोमुखम् । स्रष्टव्यजगल्लक्षण-कार्याभिमुखम् ॥ कारणकार्ययोरूर्ध्वाधःशब्दौ प्रसिद्धौ । गीतासु "ऊर्ध्वमूलमधःशाखमिति" ॥ मध्यस्थम्—उदरमध्ये नाभि-

स्थाने स्थितं मणिपूरकचक्रं मध्यमं तत्र स्थितमित्यर्थः । महामन्त्रैः प्रणवप्रथमावयवभूतः अकार एको मन्त्रः । स हि एकाक्षरमात्रत्वेन परिमाणतोऽल्पोऽपि परापरपुरुषार्थप्राप्तिसाधनत्वेन महतो महत्त्वात् महामन्त्रः । श्रूयते च – अकारस्य महाफलत्वम् ॥ जागरितस्थानो वैश्वानरोऽकारः । आप्नोतीह वै सर्वान्कामानादिश्च भवति । य एवं वेदेति प्रणवसमानार्थस्य हृल्लेखामन्त्रस्य प्रथमावयवो हकारोऽपि अकारसमानार्थो द्वितीयोऽपि महामन्त्रः । अपरे बहवो मन्त्रा महामन्त्रा उत्तरतापनीयोपनिषद्भाष्ये प्रपञ्चिताः । अकारादिमन्त्राणां ब्रह्माद्यात्मकता च श्रुत्यैवोक्ता । अकारं ब्रह्माणं नाभौ उकारं विष्णुं हृदये मकारं रुद्रं भ्रूमध्ये ओङ्कारं सर्वेश्वरं द्वादशान्त इति ॥

बाह्योपकरणनिरपेक्षमनोमात्रसाधने उक्तलिङ्गार्चने योगिनामेवाधिकार इत्याशयेनोक्तम् योगिभिरिति । ब्रह्मलिङ्गस्य सरस्वतीशक्तिसाहित्यं परिवारान् महामन्त्रांश्च साम्प्रदायिकानभिसन्धायोक्तं गुरूपदेशत इति ॥

९९१. चतुर्वेदाय –

चत्वारो वेदा निष्पन्नतया आवेदकतया च यस्य स चतुर्वेदः ।

'अस्य महतो भूतस्य निश्वसितमेतदृग्वेदो यजुर्वेदः सामवेदोऽथर्ववेद इति । वेदैरनेकैरहमेव वेद्य' इति च श्रुतिः ॥

९९२. स्वरूपाणां स्वभावाय –

स्वं स्वीयं रूपं सच्चिदानन्दात्मकं येषां पदार्थानां आकाशादीनां ते स्वरूपाः ।

"अस्ति भाति प्रियं रूपं नाम चेत्यंशपञ्चकम् ।
आद्यत्रयं ब्रह्मरूपं जगद्रूपं ततो द्वयमि"त्यभियुक्तोक्तेः ॥

सद्धीदं सर्वं सदसदिति । चिद्धीदं सर्वं काशते, काशते चेति श्रुतेः । तेषां स्वभावो वास्तवं रूपम् । ननु आकाशादिस्वरूपाये-त्येवालम् स्वभावायेत्यधिकम् । नविवर्तवाद—प्रक्रियाद्वारा सर्व-स्यापि प्रपञ्चस्य मिथ्यात्वप्रतिपादनेन परशिवस्वरूपमेव वर्तते । तद्व्यतिरिक्तं कालत्रयेऽपि नास्तीति ववतुमिति भ्रमः ॥ तथाहि, आकाशादिस्वरूप इत्युक्ते यथा दधिघृतादीनां क्षीरस्वरूपत्वेऽपि यथा आकारतो वर्णतो रसतो भेदः एवं सच्चिदानन्दरूपत्वेऽपि प्रपञ्चस्या-त्मापेक्षया भेदोऽपि स्यात्तन्निवृत्त्यर्थम् । स्वरूपाणां स्वभाव इति यथा स्वप्नदृगपेक्षया स्वाप्निकपदार्थस्य भेदेन प्रतीयमानत्वेऽपि तदपेक्षया अभावः । प्रबोधे सर्वस्यापि स्वात्ममात्रत्वात् । एव-मज्ञानदशायामेव भेदेनावभासनम् । तथा च सर्वथा परशिव-मात्रत्वमेव पदार्थानाम् अत एव श्रुतिः —

प्रपञ्चोपशमः शिवोऽद्वैतमिति । यत्र त्वस्य सर्वमात्मैवाभूत् तत्केन कं पश्येत् इति च ॥

९९३. अन्तर्यागाय -

इज्यत इति यागः । अन्तः शरीरान्तः हृदयपुण्डरीकादिषु इज्यत इत्यन्तर्यागः । अथवा य एषोऽन्तर्हृदय आकाशस्तस्मिन् शेते सर्वस्य वशी, सर्वस्येशान इति बृहदारण्यके । अथ यदिद-मस्मिन्ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽ(ऽस्मिन्न)न्तराकाश-स्तस्मिन्यदन्तस्तदन्वेष्टव्यम् । तद्वा विजिज्ञासितव्यमिति छान्दोग्ये ।

यो देवानां प्रथमं पुरस्ताद्विश्वाधिको रुद्रो महर्षिरिति प्रस्तुत्य –

"दहरं विपापं परवेश्मभूतं
यत्पुण्डरीकं पुरमध्यसंस्थम् ।
तत्रापि दहरं गगनं विशोक-
स्तस्मिन्यदन्तस्तदुपासितव्यम् ॥"

इति चोक्त्वा, यः परः स महेश्वर इति **तैत्तिरीयके** ॥

हृत्पुण्डरीकं विरजं विशुद्धं
विचिन्त्य मध्ये विशदं विशोकम् ।

अचिन्त्यमव्यक्तमनन्तरूपं शिवमिति प्रस्तुत्य —

"उमासहायं परमेश्वरं प्रभुं
त्रिलोचनं नीलकण्ठं प्रशान्तम् ।
ध्यात्वा मुनिर्गच्छति भूतयोनिम्" इति

कैवल्ये ॥ भारतशिवरहस्यस्मृतिपुराणागमेषु परशिवस्य हृदय-पुण्डरीकोपास्यत्वं बहुधा प्रपञ्चितं द्रष्टव्यम् ॥

९९४. श्लोक्याय –

अक्षरसङ्घातः श्लोकः तत्र भवः श्लोक्यः । वैदिकमन्त्रा वा श्लोकाः ।

'तदप्येष श्लोको भवति' इति श्रुतेः ॥

'नमः श्लोक्याय चे'ति श्रुतिः ॥

९९५. वन्याय –

वने अरण्ये भवो वन्यः ।

'नमो वन्याय च कक्ष्याय चे'ति श्रुतिः ॥

९९६. महाधर्माय –

महान् परिपूर्णो धर्मः सर्वप्रपञ्चधारकः । महांश्चासौ धर्मश्च महाधर्मः ।

ननु महानित्येवालं, धर्म इत्यधिकम् । यद्वा धर्म इत्येवास्तु महानिति मास्तु–उच्यते–महानित्युक्ते साङ्ख्याद्यभिमत आत्मापि महान्स्यादतो धर्म इति । धर्म इत्येवोक्ते सर्वप्रपञ्चाधारभूत-वाय्वादिरपि धर्मः स्यादतो महाधर्म इति ॥ अनेनाध्यस्तसर्व-प्रपञ्चाधिष्ठानभूतः कालतो वस्तुतः परिच्छेदरहितः सर्वप्रत्यगात्मा परशिव उक्तो भवति ।

'सर्वस्यापि सर्वभूतान्तरात्मे'ति श्रुतिः ॥

९९७. प्रसन्नाय –

कामक्रोधादिरहितः भक्तानुग्रहार्थं मङ्गलस्वरूप इति यावत् ।

'या ते रुद्र शिव तनूरिति' श्रुतिः ॥

९९८. सर्वात्मज्योतिषे –

सर्वेषां चेतनानामचेतनानां चात्मस्वरूपभूतः सर्वात्मा । सर्वात्मा चासौ ज्योतिश्च स्वयंप्रकाशश्च सर्वात्मज्योतिः ।

'सर्वभूतान्तरात्मा कर्माध्यक्षः सर्वभूताधिवासः साक्षी'ति श्रुतिः ।

९९९. त्रिमूर्तीनां स्वयम्भुवे –

त्रिमूर्तीनां ब्रह्मविष्णुरुद्राणां स्वयमेवात्मा भवतीति स्वयम्भूः । उपलक्षणमेतत् । सर्वेषां चेतनाचेतनास्वरूपाणामात्मत्वात् ।

सर्वो वै रुद्रस्तस्मै रुद्राय नमो अस्तु । पुरुषो वै रुद्रः सन्महो नमो नमः ।

'विश्वं भूतं भुवनं चित्रं बहुधा जातं जायमानं च यत् । सर्वो ह्येष रुद्रस्तस्मै रुद्राय नमो अस्तु' इति ॥

'एक एव रुद्रो न द्वितीयाय तस्थ' इति च श्रुतिः ॥

१०००. अध्वातीताय –

अध्वभ्यः कालादिनामकेभ्यः अतीतः । उक्तं च **वायवीयसंहितायाम्** —

अध्वस्वरूपः

"कलातत्वं च भुवनं वर्णःपदमतः परम् ।
मन्त्राश्चेति समासेन षडध्वा परिपठ्यते" इति ॥

अध्वातीतत्वं च परशिवस्य तत्रैवोपरिभागे सप्तविंशाध्याये प्रपञ्चितम्—तत्र हि—धातृविष्ण्वोः कलहनिवृत्त्यर्थं ज्वालामयमहालिङ्गरूपेणाविर्भूते परशिवे ताभ्यामविज्ञाते, तयोःसन्निधौ तस्मिन् **लिङ्गे** –

अथाविरभवत्तत्र सनादं शब्दलक्षणम् ।
ओमित्येकाक्षरं ब्रह्म ब्रह्मणः प्रतिपादकम् ॥

तदप्यविदितं तावद्ब्रह्मणा विष्णुना तथा ।
रजसा तमसा चित्तं तयोर्यस्मात्तिरस्कृतम् ॥

तदा विभक्तमभवच्चतुर्धैकं तदक्षरम् ।
अ–उ–म इति च मात्राभिः
परस्ताच्चार्धमात्रया ।

तत्राकारश्रितो भागो ज्वालालिङ्गस्य दक्षिणे ।
उकारश्चोत्तरे तद्वन्मकारस्तस्य मध्यमे ।

अर्धमात्रात्मके नादः श्रूयते लिङ्गमूर्धनि ।
विभक्तेऽपि ततस्तस्मिन्प्रणवे परमाक्षरे ।

विभागार्थं ततो देवौ न किञ्चिदत्रजग्मतुः ।
वेदात्मना ततो व्यक्तःप्रणवो विकृतिं गतः ॥

तत्राकारो ऋगभवदुकारो यजुरव्ययः ।
मकारः साम सञ्जातः नादस्त्वाथर्वणश्रुतिः ॥

ऋगुपस्थापयामास समासात्स्वार्थमात्मनः ।
रजोगुणेषु ब्रह्माणं मूर्तिष्वाद्यक्रियास्वपि ।

सृष्टिं लोकेषु पृथिवीं तत्वेष्वात्मनमव्ययम् ।
कलाध्वनिनिवृत्तिं च सद्यो ब्रह्मसु पञ्चसु ।

लिङ्गभागेष्वधोभागं बीजाख्यं कारणत्रये ।
चतुष्षष्टिगुणैश्वर्यं बौद्धं यदणिमादिषु ।

तदित्थमर्थैर्दशभिर्व्याप्तं विश्वमृचा जगत् ।
अथोपस्थापयामास स्वार्थं दशविधं यजुः ।

सत्वं गुणेषु विष्णुं च मूर्तिष्वाद्यक्रियास्वपि ।
स्थितिं लोकेष्वन्तरिक्षं विद्यां तत्वेषु च त्रिषु ।

कलां ध्वनिप्रतिष्ठां च वामं ब्रह्मसु पञ्चसु ।
मध्यमं लिङ्गभागेषु योनिं च त्रिषु हेतुषु ।

प्राकृतं च तदैश्वर्यं तस्माद्विध्वं यजुर्मयम् ।
अतो विस्तारयामास सामार्थं दशधात्मनः ।

तमोगुणोऽवधो रुद्रं मूर्तिमाद्यक्रियासु च ।
संहृतिं त्रिषु लोकेषु तत्वेषु शिवमुत्तमम् ।

विद्याकलास्वघोरं च घोरं ब्रह्मसु पञ्चसु ।
लिङ्गभागेषु पूर्वार्धं बीजानां कारणत्रये ।

पौरुषं च तथैश्वर्यं इत्थं साम्ना ततं जगत् ।
अथाथर्वाह नैर्गुण्यं स्वार्थं प्रथममात्मनः ।

ततो माहेश्वरं साक्षान्मूर्तिष्वपि सदाशिवम् ।
क्रियासु निष्क्रियस्यापि शिवस्य परमात्मनः ।

भूतानुग्रहणं चैव मुच्यन्ते येन जन्तवः ।
लोकेष्वपि यतो वाचो निवृत्ता मनसा सह ।

तदूर्ध्वमुन्मना लोका(?)सोमलोकमलौकिकम् ।
सोमः सहोमया शक्त्या नित्यं निवसतीश्वरः ।

तदूर्ध्वमुन्मना(?)यं प्राप्तो न निवर्तते ।
शान्तिं च शान्त्यतीतां च व्यापिकां च कलास्वपि ।

तत्पुरुषमयेशानं ब्रह्मब्रह्मसु पञ्चसु ।
मूर्धानमपि लिङ्गस्य भागं भागेष्वनुत्तमम् ।

यत्रावाह्य समाराध्यः केवलो निष्कलः शिवः ।
तत्वेऽपि च तथा बिन्दोर्नादाच्छक्तेः ततःपरात् ।

तत्वादपि परं तत्वं अतत्वं परमार्थतः ।
कारणेषु त्रयातीता मया विक्षोभकारणात् ।

अतश्च शुद्धविद्याया परस्ताच्च महेश्वरात् ।
सर्वविद्येश्वरातीतात् तत्पराच्च सदाशिवात् ।

सर्वमन्त्रतनोर्देवात् शक्तित्रयसमन्वितात् ।
पञ्चवक्त्राद्दशभुजात् साक्षात्सकलनिष्कलात् ।

तस्मादपि पराद्बिन्दोरर्धेन्दोश्च तत.परात् ।
ततः परान्निरोधीशान्नादाख्याच्च(?) ततःपरात् ।

सुषुम्नेशात् ब्रह्मरन्ध्रे .... ईश्वरादपि ।
ततः परस्ताच्छक्तेश्च परस्ताच्छिवतत्त्वतः ।

परमं कारणं साक्षात् स्वयं निष्कारणं शिवम् ।
कारणानां च धातारं धातारं ध्येयमव्ययम् ।

परमाकाशमध्यस्थं परमात्मोपरि स्थितम् ।
सर्वैश्वर्येण सम्पन्नं सर्वेश्वरमनीश्वरम् ।

ऐश्वर्याच्चापि मायेयादशुद्धान्मानुषादिकात् ।
अपराच्च पराच्चाद्यात् अशुद्धाच्छुद्धगोचरात् ।

तत्पराच्छुद्धविद्याख्यात्समनन्ता (?) त्परात्परात् ।
परमं परमैश्वर्यमुन्मनात् यमना (समना)दि च ।

अपारमपराधीनं निरस्तातिशयं स्थितम् ।
इत्थमर्थैर्दशविधैरियमाथर्वणी श्रुतिः ॥

यस्माद्गरीयसी तस्माद्विश्वं व्याप्तमथर्वणा ।
ऋग्वेदः पुनराहेदं जाग्रद्रूपं मयोच्यते ।

येनाहमात्मतत्वस्य नित्यमस्म्यभिधायकम् ।
यजुर्वेदोऽवदत्तद्वत्स्वप्नावस्था मयोच्यते ।

भोग्यात्मना परिणता विद्या वेद्या मनोमयी ।
साम चाह सुषुप्ताख्यं साधु सर्वं मयोच्यते ।
ममार्थेन शिवेनेदं तामसेनाभिभूयते ॥

अथर्वाह तुरीयाख्यं तुरीयातीतमेव च ।
मयाभिधीयते यस्मादध्वातीतः परोऽस्म्यहम् ।

अध्वात्मकं हि त्रितयं शिवविद्यात्मसंज्ञितम् ।
तत्त्रैगुण्यं त्रयीसाध्यं शोध्यं पतिपदैषिणाम् ।

अध्वातीतं तुरीयाख्यं निर्वाणं परमं पदम् ।
तदतीतं च नैर्गुण्यादध्वनोऽस्य विशोधकमिति ॥

'अध्वनामध्वपते श्रेष्ठस्याध्वनः पारमशीये'ति श्रुतिः ॥

अथवा – अध्वानं संसारमार्गं सुरनरपशुपक्षिकृमिकीटादियोनिरूपमहारण्यगर्भदुःख जन्मदुःख जरादुःख मरणदुःखरूप क्षुद्रपाषाणकण्टकादियुक्तमशनायापिपासा शोकमोहादि व्याघ्रसर्पादिदूषितं कामक्रोधादिचोरभूयिष्ठमविद्या तम आदिमहान्धकारावृतम्, शुभकर्मफलभूत ब्रह्मादिलोकप्राप्तिकरं (प्राप्त्यादियुक्तं), एवं भूतादिभिः

कदाचिदप्यस्पृष्टत्वात्परशिवस्य निर्मृष्टनिखिलदुःखानुषङ्गपरमानन्द-रूपत्वाच्च ।

तदुक्तं **ब्रह्मगीतायाम्** —

"विज्ञानसारथिर्यस्तु मनःप्रग्रहवान्नरः ।
सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम् ॥

पदं यत्परमं विष्णोस्तदेवाखिलदेहिनाम् ।
पदं परममद्वैतं स शिवः साम्बविग्रहः ॥

रुद्रविष्णुप्रजेशानामन्येषामपि देहिनाम् ।
ऋते साम्बं महादेवं किं भवेत्परमं पदम्" इति ॥

अस्मिन्नेव **पाद्मे पुराणे शिवगीतायाम्** —

"विज्ञानसारथिर्यस्तु मनःप्रग्रहवान्नरः ।
सोऽध्वनः पारमाप्नोति ममैव परमं पदमि"ति ॥

शिवेनोक्तम् ॥

ब्रह्मगीतावचनस्य श्रीविद्यारण्यस्वामिभिः कृता **तात्पर्यदीपिका** लिख्यते —

"पुनस्तत्पदं विशिनष्टि-विज्ञानेति । निश्चयरूपा आत्मानात्म-विवेकबुद्धिर्विज्ञानं सङ्कल्पविकल्पात्मकं मनः । तथा च विज्ञान-रूपसारथिना नीयमानः प्रगृहीतमनस्कश्च सन् विद्वान् अध्वनः संसारगतेः पारमन्तं प्राप्नोति स्वस्वरूपयथार्थज्ञानेन संसाराद्विमुच्यते । तच्च परमं-विष्णोर्व्यापनशीलस्य ब्रह्मणः परमं प्रकृष्टं पदं पदनीयं प्राप्तव्यं सच्चिदानन्दैकरसं स्वरूपमिति यावत् । "तद्विष्णोः परम

पद''मिति श्रुतिवाक्यं स्वयं व्याकरोति – पदं तदिति । यत्र नान्यत्पश्यति नान्यच्छृणोति इत्येवं त्रिपुटीहीनं यदद्वितीयं तत्त्वं तदेवाखिलदेहिनां देवमनुष्यादीनां सर्वेषां परमं पदं, निरतिशयानन्दरूपतया सर्वैरभिलषितत्वात् । ईदृग्विधं परमं पदमेव लीलया अर्धनारीश्वरविग्रहः शिवः सम्पन्नः ।।''

एतदेव सच्चिदानन्दरसं परशिवस्वरूपं रुद्रविष्ण्वादीनां गुणमूर्तीनामन्येषां इन्द्रा(दी)नां च परमं पदं भवतीत्यर्थः ।।

'सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदमि'ति श्रुतिः ।।

।। इति दशमशतकविवरणम् ।।

सदाशिव उवाच –

जपन्तु मामिकां देवा, नाम्नां दशशतीमिमाम् ।
मम चातिप्रियकरीं महामोक्षप्रदायिनीम् ।।

इमां वेदसारसहस्राख्यां मामिकां मम सगुणनिर्गुणस्वरूपकथनपराम् । महामोक्षप्रदायिनीं भक्तिज्ञानवैराग्यद्वारा निर्गुणसायुज्यप्रदानकरीम् ।

सङ्ग्रामे जयदात्रीं तु सर्वसिद्धिमयीं शुभाम् ।
यः पठेच्छृणुयाद्वापि सर्वपापैः प्रमुच्यते ।।
सर्वसिद्धिमयीं सर्वाभीष्ट....प्रदाम् । (सर्वाभीष्टार्थफलदायिनीम्)
पुत्रकामो लभेत्पुत्रं राज्यकामस्तु राजताम् ।
प्राप्नुयात्परया भक्त्या धनधान्यादिकं बहु ।।

श्लो. – "शिवालये नदीतीरेऽश्वत्थमूले विशेषतः ।
पूजये(प्रजपे)त्सिद्धिदां देवाः शुचौ देशे शमीतले ॥"

शमीनाम वृक्षविशेषः । **समे** इति वा पाठभेदः ॥

श्लो. – "धनकामस्तु जुहुयाद्घृताक्तैर्बिल्पत्रकैः ।
मोक्षकामस्तु गव्येन घृतेन प्रतिनामतः ।"

जुहेयात् ॥ स्वगृह्योक्तविधानेनाग्निं प्रतिष्ठाप्य बिल्वपत्रकैः त्रिदलैः कृमिकीटादिभि (रदूषितैरच्छिद्रैः)–रदूषिताच्छिद्रैः "पराय देवाय स्वाहा", "शङ्कराय स्वाहा" इत्यारभ्याध्वातीताय स्वाहेत्यन्तेन ॥

श्लो. – "पुत्रकामस्तु जुहुयात्तिलाक्तेनान्धसा तथा ।
आयुष्कामस्तु जुहुयादाज्येन मधुना तथा ।"

तिलाक्तेन तिलमिश्रितेन अन्धसा अन्नेन तथा प्रतिनाम इत्यर्थः । एवमुत्तरत्रापि आज्येन मधुना वेति विकल्पः । अथवा आज्येनैकावृत्तिः मधुना आवृत्यन्तरम् ।

श्लो. – "मत्समीपे प्रदोषे च नत्वा भक्त्या जपेन्नरः ।
जीवन्स्वरूपतां प्राप्य सायुज्यं मम चाप्नुयात् ।"

नत्वेत्युपलक्षणम् । प्रदक्षिणत्रयपुरःसरं शिवदर्शनस्य जपे —

नमः पराय देवाय शङ्कराय महात्मन इत्यारभ्य अध्वातीताय नम इत्यन्तम् । जीवन्स्वरूपतां - जीवन्मुक्तिरूपताम् । वैराग्यज्ञानद्वारेति सम्बन्धः । सायुज्यं निर्गुणसायुज्यम् ।

श्लो. – "कालोऽपि जनशास्ता हि मम भक्तं न पश्यति ।
अहं पुरःसरंस्तस्य नेष्यामि गमनस्थलम् ॥"

पुरः सरन्—अग्रेसरः । तस्य—नामजपशीलस्य गमनस्थलं—कैलासादिस्थानम् ।

श्लो. – "त्रिसन्ध्यं प्रजपेद्भक्त्या वत्सरं नियमान्वितः ।
मच्चित्तो मन्मना भूत्वा साक्षान्मोक्षमवाप्नुयात् ॥"

नियमान्वितः – शिवक्षेत्रवास – शिवप्रदक्षिणनमस्कार – शिवपूजादियुक्तः । श्रवणादियुक्तः, मन्मनाः – ज्ञानध्यानपरः ॥

श्लो. – "रुद्रपाठेन यत्पुण्यं यत्पुण्यं वेदपाठतः ।
तत्पुण्यं प्राप्यते पुम्भिरेकावृत्त्या पठेदिमाम् ॥
(एकावृत्त्यैव पाठतः)

रुद्रपाठेन आवृत्तियुक्तेन । इमां विद्याम् । अर्थज्ञानपुरःसरं पठनेन । नामपाठस्यैव विद्यात्वात् ।

श्लो. – कन्याकोटिप्रदानस्य यत्फलं लभते नरः ।
तत्फलं लभते सम्यङ्नाम्नां दशशतं जपन् ।

अर्थज्ञानपुरःसरमिति शेषः ।

अश्वमेधसहस्रस्य यत्फलं लभते नरः ।
कपिलाशतदानस्य तत्फलं पठनाद्भवेत् ॥

स्पष्टम् ॥ एवमुत्तरश्लोका अपि —

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमदभिनवनारायणेन्द्र-
सरस्वतीपूज्यपादशिष्यश्रीमत्परमशिवेन्द्रसरस्वती-
विरचिता **वेदसारसहस्रनामव्याख्या**

सम्पूर्णा. ॥

ॐ तत्सत् । साम्बशिवार्पणमस्तु । हरिः ॐ ।

श्लो. – "यः शृणोति सदा दिव्यां श्रावयेद्वाऽथ भक्तितः ।
सोऽपि मुक्तिमवाप्नोति यत्र गत्वा न शोचति ॥

यक्षराक्षसवेतालग्रहकूश्माण्डभैरवाः ।
पठनादस्य नश्यन्ति जीवेच्च शरदां शतम् ॥

ब्रह्महत्यादिपापानां नाशः स्याच्छ्रवणेन तु ।
किम्पुनः पठनादस्य मुक्तिः स्यादनपायिनी ॥

इत्युक्त्वा स महादेवो भगवान्परमेश्वरः ।
पुनरप्याह भगवान् कृपया परया युतः ॥

दीयतां मम भक्तेभ्यो मदुक्तं भवघातकम् ।
इत्युक्त्वाऽन्तर्दधे देवः परमानन्दरूपधृक् ॥"

श्रीकृष्णः — एतदेव पुरा रामो लब्धवान्कुम्भसम्भवात् ।
अरण्ये दण्डकारण्ये प्रजपन् स रघूद्वहः ॥

नित्यं त्रिषवणस्नायी त्रिसन्ध्यासु स्मरन् शिवम् ।
तदाऽसौ देवदेवोऽपि प्रत्यक्षःप्राह राघवम् ॥

महापाशुपतं दिव्यं गृहाण च रघूद्वह ।
एतदासाद्य पौलस्त्यं जहि मा शोकमर्हसि ॥

तदाप्रभृति भूदेवाः प्रजपन्ति सुभक्तितः ।
गृह्ण(शृण्व)न्तु परया भक्त्या भवन्तःसर्व एव हि ॥

व्यासः — ततस्ते मुनयः सर्वे जगृहुर्मुनिपुङ्गवाः ।
सहस्रनामसद्विद्यां भक्तियुक्तेन चेतसा ॥

एतद्वः कथितं सर्वं हितार्थं मुनिपुङ्गवाः ।
गृह्णन्तु मम वाक्येन मुक्तिं प्राप्नुथ निश्चिताम् ॥

भवद्भिरात्मशिष्येभ्यो दीयतामिदमादरात् ।
नाम्नां सहस्रमेतद्धि लिखितं यन्निकेतने ।

अविमुक्तं तु तद्गेहं नित्यं (तत्र)तिष्ठति शङ्करः ।
अनेन मन्त्रितं भस्म खलु(खल) दुष्टविनाशनम् ॥

पिशाचस्य विनाशाय जप्तव्यमिदमुत्तमम् ।
नाम्नां सहस्रेणानेन समं किञ्चिन्न विद्यते ॥

इति श्रीपाद्मे पुराणे पञ्चपञ्चाशत्साहस्रिकायां संहितायां उत्तरभागे श्रीकृष्णमार्कण्डेयव्यासादिसंवादे वेदसारसहस्रं नाम एकोननवतितमोऽध्यायः ॥

॥ ॐ तत्सत् ॥

॥ श्रीः ॥

॥ श्रीगणेशाय नमः ॥

॥ श्रीशिवसहस्रनामावलिः ॥

ओं परायदेवाय नमः
शङ्कराय
महात्मने
कामिने
नीलकण्ठाय
निर्मलाय
कपर्दिने
निर्विकल्पाय
शान्ताय
निरहङ्कारिणे १०
अनर्घ्याय
विशालाय
सालहस्ताय
निरञ्जनाय
शर्वाय
श्रुताय
परमात्मने (परात्मने)
शिवाय
भर्गाय
गुणातीताय २०
वेधसे
महादेवाय
वीताय
पार्वतीपतये

ओं केवलाय नमः
महेशाय
विशुद्धाय
बुधात्मने
कैवल्याय
सुदेशाय ३०
निःस्पृहाय स्वरूपिणे
सोमविभूषाय
कालाय
अमिततेजसे
अजिराय
जगत्पित्रे
जनकाय
पिनाकिने
निराधाराय
सिद्धाय ४०
मायातीताय
बीजाय
सर्पभूषाय
पशूनां पतये
पुरन्दराय
भद्राय
पुरुषाय
महीयसे

ओं महासन्तोषरूपाय नमः

ज्ञानिने ५०

शुद्धबुद्धये

वृद्धस्वरूपाय

तपसे

परमात्मने

पूर्वजाय

सुरेशाय

ब्रह्मणे

अनन्तमूर्तये

निरक्षराय

सूक्ष्माय ६०

कैलासपतये

निरामयाय

कान्ताय

निरातङ्काय

निरालम्बाय

विश्वाय

नित्याय यतये

आत्मारामाय

भव्याय

पूज्याय ७०

परमेष्ठिने

विकर्तनाय

सूर्य्याय

शम्भवे

विश्वरूपिणे

ओं ताराय नमः

हंसनाथाय

प्रतिसर्याय

धरावरेशरुद्राय

भवाय ८०

अलङ्घ्यशक्तये

इन्द्रध्वंसनिधीशाय

कालहन्त्रे

मनस्विने

विश्वमात्रे

जगद्धात्रे

जगन्नेत्रे

जटिलाय

विरागाय

पवित्राय ९०

मृडाय

निरवद्याय

पात्राय

स्तेनानां पतये

नादाय

रविनेत्राय

व्योमकेशाय

चतुर्भोगाय

साराय

योगिने १००

अनन्तमायिने

धर्मिष्ठाय

ओं वरिष्ठाय नमः
पुरत्रयविघातिने
गरिष्ठाय
गिरीशाय
वरदाय
व्याघ्रचर्माम्बराय
दिशावस्त्राय
परमप्रेममन्त्राय १९०
प्रथमाय
सुचक्षुषे
आद्याय
शूलहस्ताय
शितिकण्ठाय
उग्राय
वामदेवाय
श्रीकण्ठाय
विश्वेश्वराय
सूर्याय १२०
गौरीशाय
वराय
मृत्युञ्जयाय
वीराय
वीरभद्राय
कामनाशाय
गुरवे
मुक्तिनाथाय
विरूपाक्षाय
ओं सूताय १३०
वह्निनेत्राय
जलन्धरशिरश्छेत्रे
हविषे
हितकारिणे
महाकालाय
वैद्याय
सङ्घृणेशाय
ओङ्काररूपाय
सोमनाथाय
रामेश्वराय १३०
शुचये
भौमेशाय
त्रियम्बकाय
निरीहाय
केदाराय
गङ्गाधराय
कवये
नागनाथाय
भस्मप्रियाय
सूद्याय १५०
लक्ष्मीशाय
पूर्णाय
भूतपतये
सर्वज्ञाय
दयाळवे
धर्माय

ओं धनादेशाय नमः
गजचर्माम्बराय
फालनेत्राय
यज्ञाय १६०
श्रीशैलपतये
कृशानुरेतसे
नीललोहिताय
अन्धकासुरहन्त्रे
पावनाय
बलाय
चैतन्याय
त्रिणेत्राय
दक्षनाशकराय
सहस्रशिरसे १७०
जयरूपाय
सहस्रचरणाय
योगिहृत्पद्मवासिने
सद्योजाताय
वन्द्याय
सर्वदेवमयाय
आमोदाय
प्रगल्भाय
गायत्रीवल्लभाय
व्योमाकाराय १८०
विप्राय
विप्रप्रियाय
अघोराय

ओं सुवेषाय नमः
श्वेतरूपाय
विद्वत्तमाय
चित्राय
विश्वग्रासाय
नन्दिने
अधर्मशत्रुरूपाय १९०
दुन्दुभेर्मर्दनाय
अजातशत्रवे
जगत्प्राणाय
ब्रह्मशिरश्छेत्रे
पञ्चवक्त्राय
खड्गिने
हरिकेशाय
पञ्चवर्णाय
वज्रिणे
पञ्चाक्षराय २००
गोवर्धनधराय
सर्वलोकानां प्रभवे
कालकूटविषादिने
सिद्धेश्वराय
सिद्धाय
सहस्रवदनाय
सहस्रहस्ताय
सहस्रनयनाय
सहस्रमूर्तये
जिष्णवे २१०

ओं जितशत्रवे नमः
काशीनाथाय
गेह्याय
विश्वसाक्षिणे
हेतवे सर्वभूतानाम्
(सर्वभूतानां) हेतवे
(सर्वजीवानां) पालकाय
जगत्संहारकाय
त्रिधावस्थाय
एकादशस्वरूपाय
वह्निमूर्तये २२०
नरसिह्ममहादर्पघातिने
शरभाय
भस्माभ्यक्ताय
तीर्थाय
जाह्नवीजनकाय
देवदानवदैत्यानां गुरवे
दलिताञ्जनभासाय
वायुरूपिणे
स्वेच्छामन्त्रस्वरूपाय
प्रसिद्धाय २३०
वृषध्वजाय
गोष्ठ्याय
जगद्यन्त्रप्रवर्तिने
अनाथाय
प्रदेशाय
विष्णुगर्वहराय

ओं हरेर्विधातुःकलहनाशाय नमः
दशहस्ताय
गगनाय
कैवल्यफलदात्रे २४०
परमाय
ज्ञानाय
ज्ञानगम्याय
घण्टारवप्रियाय
पद्मासनाय
पुष्टाय
निर्वाणाय
अयोनये
सुदेहाय
उत्तमाय २५०
अन्तकालाधिपतये
विशालाय
कुबेरबन्धवे
सोमाय
सुखदायिने
अमृतेश्वररूपाय
कौबेराय
प्रियंवदसमर्थाय
धन्विने
विभवे २६०
गिरिशाय
गिरित्राय
गिरिशन्ताय

ओं पारिजाताय नमः
पञ्चयज्ञाय
तरुणाय
विशिष्टाय
बालरूपधराय
जीवतेशाय
तुष्टाय २७०
पुष्टानां पतये
भवहेत्यै
हिरण्याय
कनिष्ठाय
मध्यमाय
विधात्रे
शूराय
सुभगाय
आदित्यतापनाय
रुद्रमन्यवे २८०
महाह्रदाय
ह्रस्वाय
वामनाय
तत्पुरुषाय
चतुर्हस्ताय
धूर्जटये
जगदीशाय
जगन्नाथस्वरूपाय
लीलाविग्रहरूपिणे
अनघाय २९०

ओं अमराय नमः
अमृताय
अच्छात्राय
लोकाध्यक्षाय
अनादिनिधनाय
व्यक्तेतराय
व्यक्ताय
परमाणवे
लघुस्थूलस्वरूपाय
परशुधारिणे ३००
खट्वाङ्गहस्ताय
नागहस्ताय
वरदाभयहस्ताय
घण्टाहस्ताय
घस्मराय
अजिताय
अणिमादिगुणेशाय
पञ्चब्रह्ममयाय
पुरातनाय
शुद्धाय ३१०
बलप्रमथनाय
पुण्योदयाय
पद्माय
विरक्ताय
उदाराय
विचित्राय
विचित्रगतये

ओं वाग्विशुद्धाय नमः
चितये
निर्गुणाय ३२०
परमेशाय
शेषाय
पद्मवराय
महेन्द्राय
सुशीलाय
करवीरप्रियाय
महापराक्रमाय
कालरूपिणे
विष्टरश्रवसे
लोकचूडारत्नाय ३००
साम्राज्यकल्पवृक्षाय
त्विषीमते
वरेण्याय
वज्ररूपाय
परमज्योतिषे
पद्मगर्भाय
सलिलाय
तत्वाधिकाय
सर्गाय
दीर्घाय ३४०
स्रग्विणे
पाण्डराङ्गाय
घोराय
ब्रह्मरूपिणे

ओं निष्कलाय नमः
प्रपथ्याय
जयाय
क्षेत्राय
क्षेत्राणां पतये
कलाधराय ३५०
पूताय
पञ्चभूतात्मने
अनिर्विण्णाय
तथ्याय
पापनाशकराय
विश्वतश्चक्षुषे
मन्त्रिणे
अनन्तरूपिणे
सिद्धसाधकरूपाय
मेदिनीरूपिणे ३५०
अगण्याय प्रतापाय
सुधाहस्ताय
श्रीवल्लभाय
ईध्रियाय
मधुराय
उपाधिरहिताय
सुकृतराशये
मुनीश्वराय
शिवानन्दाय
रिपुघ्नाय ३७०
तेजोराशये

ओं अनुत्तमाय नमः
चतुर्मूर्तिवपुःस्थाय
बुद्धीन्द्रियात्मने
उपद्रवहराय
प्रियसन्दर्शनाय
भूतनाथाय
मूलाय
वीतरागाय
नैष्कर्म्याय ३८०
विरूपाय
षट्चक्राय
विशुद्धये
कुलेशाय
अवनिभर्त्रे
भुवनेशाय
हिरण्यबाहवे
जीववरदाय
आदिदेवाय
भाग्याय ३९०
चन्द्रसञ्जीवनाय
हराय
बहुरूपाय
प्रसन्नाय
आनन्दपूरिताय
कूटस्थाय
मोक्षफलाय
शाश्वताय

ओं विरागिणे नमः
यज्ञभोक्त्रे ४००
सुषेणाय
दक्षयज्ञविघातिने
सर्वात्मने
विश्वपालाय
विश्वगर्भाय
गर्भाय
देवगर्भाय
संसारार्णवमग्नानां समुद्धरणहेतवे
मुनिप्रियाय
खल्लाय (खल्याय) ४१०
मूलप्रकृतये
समस्तसिद्धये
तेजोमूर्तये
आश्रमस्थापनाय
वर्णिने
सुन्दराय
मृगबाणार्पणाय
शारदावल्लभाय
विचित्रमायिने
अलङ्करिष्णवे ४२०
बहिर्मुखमहादर्पमथनाय
अष्टमूर्तये
निष्कलङ्काय
हव्याय भोज्याय

ओं यज्ञनाथाय नमः
मेध्याय
मुख्याय
विशिष्टाय
अम्बिकापतये
महादान्ताय ४३०
सत्यप्रियाय
सत्याय
प्रियनित्याय
नित्यतृप्ताय
वेदित्रे
मृदुहस्ताय
अर्धनारीश्वराय
कुठारायुधपाणये
वराहभेदिने
कङ्कालधारिणे ४४०
महार्थाय
सुसत्त्वाय
कीर्तिस्तम्भाय
कृतागमाय
वेदान्तपठिताय
अश्रोत्राय
श्रुतिमते
बहुश्रुतिधराय
अघ्राणाय
गन्धावघ्राणकारिणे ४५०
पादहीनाय

ओं वोढ्रे नमः
सर्वत्रगतये
व्यक्षाय
जननेत्राय
चिदात्मने
रसज्ञाय
रसनारहिताय
अमूर्ताय
मूर्ताय ४६०
सदसस्पतये
जितेन्द्रियाय
परञ्ज्योतिःस्वरूपाय
सर्वमर्त्यानामादिकर्त्रे
भुवन्तये
सर्गस्थितिविनाशानांकर्त्रे
प्रेरकाय
अन्तर्यामिणे
सर्वहृदिस्थाय
चक्रभ्रमणकर्त्रे ४७०
पुराणाय
वामदक्षिणहस्तोत्थलोकेश-
हरिशालिने
सकलकल्याणदायिने
प्रसवाय
स्वभावोदारधीराय
सूत्रकाराय
विषयार्णवमग्नानां
समुद्धरणसेतवे

ओं अस्नेहस्नेहरूपाय नमः
वार्तातिक्रान्तवर्तिने
यत्र सर्वं यतःसर्वं यत्र
(नमो नमः) ४८०
महार्णवाय
भास्कराय
भक्तिगम्याय
भक्तानां सुलभाय
दुष्टानां दुष्प्रधर्षाय
विवेकिनां विजयाय
अतर्किताय
लोकाय
सुलोकाय
पूरयित्रे ४९०
विशेषाय
शुभाय
कर्पूरदेहाय
सर्पहाराय
संसारपाराय
कमनीयाय
वह्निदर्पविघाताय
वायुदर्पविघातिने
जरातिगाय
वीर्याय ५००
विश्वव्यापिने
सूर्यकोटिप्रतीकाशाय
निष्क्रियाय

ओं चन्द्रकोटिसुशीताय नमः
विमलाय
गूढस्वरूपाय
दिशां पतये
सत्यप्रतिज्ञाय
समस्ताय
समाधये ५१०
एकरूपाय
शून्याय
विश्वनाभिह्रदाय
सर्वोत्तमाय
कौलाय
प्राणिनां सुहृदे
अन्नानां पतये
चिन्मात्राय
ध्येयाय
ध्यानगम्याय ५२०
ध्यानरूपाय
शाश्वतैश्वर्यविभवाय
वरिष्ठाय
गोप्त्रे
निधानाय
अग्रजाय
योगीश्वराय
योगाय
योगगम्याय
प्राणेश्वराय ५३०

ओं सर्वशक्तिधराय नमः
धर्माधाराय
धन्याय
पुष्कलाय
महेन्द्रोपेन्द्रचन्द्रार्कनमिताय
महर्षिवन्दिताय
प्रकाशाय
सुधर्मिणे
हिरण्यगर्भाय
हिरण्मयाय ५४०
जगद्बीजाय
हरये
सेव्याय
ऋतवे
आधिपत्याय
कामाय
यशसे
प्रचेतसे
ब्रह्ममयाय
सकलाय ५५०
रुक्मवर्णाय
ब्रह्मयोनये
योगात्मने
अभीताय
दिव्यनृत्ताय
जगतामेकबीजाय
मायाबीजाय

ओं सर्वहृन्निविष्टाय नमः
ब्रह्मचक्रभ्रमाय
ब्रह्मानन्दाय ५६०
महते
ब्रह्मण्याय
भूरिभारार्तिसंहर्त्रे
विधिसारथये
हिरण्यगर्भपुत्राणां प्राणसंरक्षणाय
दुर्वाससे
षड्विकाररहिताय
देहार्धकान्ताय
षडूर्मिरहिताय
प्रकृत्यै ५७०
भवनाशाय
ताम्राय
परमेष्ठिने
अनेक (अनन्त) कोटि-ब्रह्माण्डनायकाय
एकाकिने
निर्मलाय
द्रविणाय
दमाय
त्रिलोचनाय
शिपिविष्टाय ५८०
बन्धवे
त्रिविष्टपेश्वराय

ओं व्याघ्रेश्वराय नमः
विश्वेश्वराय
दात्रे
चन्द्रेश्वराय
व्यासेश्वराय
युधिने
यज्ञकेशाय
जैगीषव्येश्वराय ५९०
दिवोदासेश्वराय
नागेश्वराय
न्यायाय
न्यायनिर्वाहकाय
शरण्याय
सुपात्राय
कालचक्रप्रवर्तिने
विचक्षणाय
दंष्ट्राय
वेदाश्वाय ६००
नीलजीमूतदेहाय
परात्मज्योतिषे
शरणागतपालाय
महाबलपराय
सर्वपापहराय
महानादाय
कृष्णस्य जयदात्रे
बिल्वकेशाय
दिव्यभोगाय
दूताय ६१०

ओं कोविदाय नमः
कामपाशाय
चित्राय नमः
चित्राङ्गाय
मातामहाय
मातरिश्वने
निःसङ्गाय
सुनेत्राय
विदग्धेशाय
जयाय ६२०
व्याजसम्मर्दनाय
मध्यस्थाय
अङ्गुष्ठशिरसा लङ्कानाथ-
दर्पहराय
वैयाघ्रपुरवासाय
सर्वेश्वराय
परावरेशाय
जगत्स्थावरमूर्तये
अनुपमेशाय
शार्ङ्गिणे
विष्णुमूर्तये ६३०
नारायणाय
रामाय
सुदीप्ताय
ब्रह्माण्डमालाय
गोधराय
वरूथिने
सोमाय

ओं कूप्याय नमः
पातालवासिने
ताराधिनाथाय ६४०
वागीशाय
सदाचाराय
गौराय
स्वायुधाय
अतर्क्याय
अप्रमेयाय
प्रमाणाय
कलिग्रासाय
भक्तानां भुक्तिमुक्ति-
प्रदायिने
संसारमोचनाय ६५०
सच्चिदानन्दरूपाय
वर्णिने
लिङ्गरूपिणे
पापराशिहराय
गजारये
विदेहाय
त्रिलिङ्गरहिताय
अचिन्त्यशक्तये
अलङ्घ्यशासनाय
अच्युताय ६६०
राजाधिराजाय
चैतन्यविषयाय
शुद्धात्मने
ब्रह्मज्योतिषे

ओं स्वस्तिदाय नमः
मयोभुवे
दुर्विज्ञेयसामर्थ्याय
यज्वने
चक्रेश्वराय
नक्षत्रमालिने ६७०
अनर्थनाशाय
भस्मलेपकराय
सदानन्दाय
विदुषे
सगुणाय
विरोधिने
दुर्गमाय
शुभाङ्गाय
मृगव्याधाय
प्रियाय ६८०
धर्मधाम्ने
प्रयोगाय
विभागिने
नाद्याय
अमृतपाय
सोमपाय
तपस्विने
विचित्रवेषाय
पुष्टिसंवर्धनाय
चिरन्तनाय ६९०
धनुषे
वृषाणां पतये

ओं निर्मायाय नम:
अग्रगण्याय
व्योमातीताय
संवत्सराय
लोप्याय
स्थानदाय
स्थविष्णवे
व्यवसायफलान्ताय ७००
महाकर्तृप्रियाय
गुणत्रयस्वरूपाय
सिद्धस्वरूपिणे
स्वरूपरूपाय
स्वेच्छाय
पुरुषाय
कालात्पराय
वेद्याय
ब्रह्माण्डरूपिणे
अनित्यनित्यरूपाय ७१०
तदन्तर्वर्तिने
तीर्थ्याय
कूल्याय
पूर्णाय
वटवे
पञ्चतन्मात्ररूपाय
पञ्चकर्मेन्द्रियात्मने
विशृङ्खलाय
दर्पाय
विषयात्मने ७२०

ओं अनवद्याय नमः
शास्त्राय
स्वतन्त्राय
अमृताय
प्रौढाय
प्रज्ञाय
योगारूढाय
मन्त्रज्ञाय
प्रगल्पाय
प्रदीपविमलाय ७३०
विश्वावासाय
दक्षाय
वेदनि:श्वसिताय
यज्ञाङ्गाय
सुवीराय
नागचूडाय
व्याघ्राय
बाणहस्ताय
स्कन्दाय
दक्षिणे ७४०
क्षेत्रज्ञाय
रहस्याय
स्वस्थानाय
वरीयसे
गहनाय
विरामाय
सिद्धान्ताय
महीधराय

ओं गृह्याय नमः
वटवृक्षाय ७५०
ज्ञानदीपाय
दुर्गाय
सिद्धान्तैर्निश्चिताय
श्रीमते
मुक्तिबीजाय
कुशलाय
विवासिने
प्रेरक्षाय
विशोकाय
हविर्धानाय ७६०
गम्भीराय
सहायाय
भोजनाय
सुभोगिने
महायज्ञाय
तीक्ष्णाय
भूतचारिणे
प्रतिष्ठिताय
महोत्साहाय
परमार्थाय ७७०
शिशवे
प्रांशवे
कपालिने
सहजाय गृहस्थाय
सन्ध्यानाथाय
विष्णवे

ओं सद्भिःसम्पूजिताय नमः
वितलासुरघातिने
जनाधिपाय
योग्याय ७८०
कामेशाय
किरीटिने
अमोघविक्रमाय
नग्नाय
दलघातिने
सङ्ग्रामाय
नरेश्वराय
शुचिभस्मने
भूतिप्रियाय
भूम्ने ७९०
सेनाय
चतुराय
मनुष्यबाह्यगतये
कृतज्ञाय
शिखण्डिने
निर्लेपाय
जटार्द्राय
महाकालाय
भैरवे
विरूपरूपाय ८००
शक्तिगम्याय
सर्वाय
सदसत्सत्याय
सुव्रताय

ओं भक्तप्रियाय नमः
श्वेतरक्षापराय
सुकुमारमहापापहराय
रथिने
धर्मराजाय
धनाध्यक्षाय ८१०
सिद्धये
महाभूताय
कल्पाय
कल्पनारहिताय
ख्याताय
जितविश्वाय
गोकर्णाय
सुचारवे
श्रोत्रियाय
वदान्याय ८२०
दुर्लभाय
कुटुम्बिने
विरजाय (विरजसे)
सुगन्धाय
विश्वम्भराय
भवातीताय
तिष्याय
सामगाय
चिन्मयाय
शुक्लज्योतिषे ८३०
क्षेत्रगाय
अद्वैताय

ओं द्वितीयाय नमः
कल्पराजाय
भोगिने
सर्वभोगसमृद्धाय
साम्पराय
स्वप्रकाशाय
स्वच्छन्दाय
सुतन्तवे ८४०
सर्वज्ञमूर्तये
गुह्येशाय
सुशान्तये
शारदाय
सुशीलाय
कौशिकाय
धनाय
अभिरामाय
तत्वाय
व्यालकल्पाय ८५०
अरिष्टमथनाय
सुप्रतीकाय
आशवे
ब्रह्मगर्भाय
वरुणाय
अद्रये
कालाग्निरुद्राय
श्यामाय
सुजनाय
अहिर्बुध्न्याय ८६०

ओं जाराय नमः
दुष्टानां पतये
समयनाथाय
समयाय
गुहाय
दुर्लङ्घ्याय
छन्दस्साराय
दंष्ट्रिणे
ज्योतिर्लिङ्गाय
मित्राय ८७०
जगतां हितकारिणे
कारुण्यनिधये
श्लोकाय
जयशालिने
ज्ञानोदयाय
बीजाय
जगद्विभ्रमहेतवे
अवधूताय
शिष्टाय
छन्दसां पतये ८८०
फेन्याय
गुह्याय
सर्वबन्धविमोचिने
उदारकीर्तये
शश्वत्प्रसन्नवदनाय
वसवे
वेदकाराय
भ्राजिष्णुजिष्णवे

ओं चक्रिणे नमः
देवदेवाय ८९०
गदाहस्ताय
पुत्रिणे
पारिजातसुपुष्पाय
गणाधिपतये
सर्वशाखाधिपतये
प्रजनेशाय
सूक्ष्मप्रमाणभूताय
सुरपार्श्वगताय
अशरीरशरीराय
अपगल्भाय ९००
सुकेशाय
सुपुष्पाय
श्रुतये
पुष्पमालिने
मुनिध्येयाय
मुनये
बीजसंस्थमरीचये
चामुण्डाजनकाय
कृत्तिवाससे
व्युप्तकेशाय ९१०
योग्याय
धर्मपीठाय
महावीर्याय
दीप्ताय
बुद्धाय
अशनये

ओं विशिष्टेष्टाय नमः
सेनान्ये
द्विपदे
कारणानां कारणाय १२०
भगवते
बाणदर्पहराय
अतीन्द्रियाय
रम्याय
जनानन्दकराय
सदाशिवाय
सौम्याय
चिन्त्याय
शशिमौलिने(लये)
जातुकर्णाय १३०
सूर्याध्यक्षाय
ज्योतिषे
कुण्डलीशस्य वरदाय
अभयाय
वसन्ताय
सुरभये
जयारिमथनाय
प्रेम्णे
पुरञ्जयाय
पृषदश्वाय १४०
रोचिष्णवे
असुरजिते
श्वेतपीताय
चञ्चरीकाय

ओं तमिस्रमथनाय
प्रमाथिने
निदाघाय
चित्रगर्भाय
शिवालयाय
स्तुत्याय १५०
तीर्थदेवाय
पत्नीनां पतये
विचित्रशक्तये
निस्तुलरूपाय
सवित्रे
तपसे
अहङ्कारस्वरूपाय
मेघाधिपतये
अपाराय
तत्वविदे १६०
क्षयद्वीराय
पञ्चास्याय
अग्रगण्याय
विष्णुप्राणेश्वराय
अगोचराय
याम्याय
क्षेम्याय
बडवाग्नये
विक्रमाय
स्वतन्त्राय १७०
स्वतन्त्रगतये
वनानां पतये

ओं जमदग्नये नमः
अनावृताय
मुक्ताय
मातृकापतये
बीजकोशाय
दिव्यानन्दाय
विश्वदेवाय
शान्तरागाय ९८०
विलोचनसुदेवाय
हेमगर्भाय
अनाद्यन्ताय
चण्डाय नाथाय
ज्ञानस्कन्दाय
तुष्टाय

ओं कपिलाय महर्षये
त्रिकाग्निकालाय
देवसिह्याय
मणिपूराय ९९०
चतुर्वेदाय
स्वरूपाणां स्वरूपाय
अन्तर्यागाय
श्लोक्याय
वन्याय
महाधर्माय
प्रसन्नाय
सर्वात्मज्योतिषे
त्रिमूर्तीनां स्वयम्भुवे
अध्वातीताय १०००

॥ इति श्रीपद्मपुराणोक्ता वेदसारशिवसहस्रनामावलिः समाप्ता ॥

॥ साम्बशिवार्पणमस्तु ॥

॥ ॐ तत्सत् ॥